॥ श्रीरामजयम् ॥

श्री म द्वा ल्मी कि रा मा य णम्

अ र ण्य का ण्ड म्

धर्मालय संस्करणम् ।

The Dharmalaya Edition

Edited by

The Late Rao Sahib P. S. KRISHNASWAMI IYER,

Dharmalaya, Mylapore.

Published with the aid of

Sri. M. N. RAMASWAMY IYER

Banker, Palghat.

By

R. Subrahmanya Vadhyar & Sons,

BOOK-SELLERS & PUBLISHERS

KALPATHI-PALGHAT

Library Edition.] 1940 [Price Rs. 1—8—0

Printed at
THE SCHOLAR PRESS,
PALGHAT

॥ श्रीः ॥


॥ विषयानुक्रमणिका ॥

सर्गः	विषयः	श्लोकसंख्या	पृष्ठम्
1.	दण्डकारण्यनिवासितापसकृतस्वरक्षण-प्रार्थना	23	1
2.	विराधेन सीतापहरणम्	26	4
3.	विराधप्रहारः ...	26	7
4.	विराधमुक्तिः ...	32	10
5.	शरभङ्गस्याग्निप्रवेशः ...	40	15
6.	रक्षोवधप्रतिज्ञानम् ...	26	20
7.	सुतीक्ष्णसमागमः ...	24	23
8.	दण्डकारण्यप्रस्थानम् ...	20	26
9.	सीतयाऽऽयुधन्यासप्रार्थना	33	28
10.	रामेण आयुधधारणस्यावश्यकत्वोक्तिः	23	32
11.	अगस्त्यमहिमानुवर्णनम् ...	95	34
12.	अगस्त्यदर्शनम् ...	40	45
13.	पञ्चवटीं प्रति प्रस्थानम् ...	65	50
14.	जटायुर्दर्शनम् ...	37	57
15.	पर्णशालानिर्माणम् ...	32	62
16.	हेमन्तर्तुवर्णनम् ...	44	65
17.	शूर्पणखागमनम् ...	32	71
18.	शूर्पणखायाः कर्णनासाच्छेदनम्	26	74
19.	खरसमीपे अङ्गवैरूप्यकथनम्	28	78
20.	चतुर्दशराक्षसवधः ...	27	81

सर्गः	विषयः	श्लोकसंख्या	पृष्ठम्
21.	खराय राक्षसवधकथनम् ...	22	84
	दशमेऽह्नि गीताः श्लोकाः—	721	
22.	खरस्य युद्धायागमनम् ...	26	87
23.	उत्पातदर्शनम् ...	35	90
24.	रामस्य युद्धोद्योगः ...	36	94
25.	खरसैन्यवधः ...	49	98
26.	दूषणवधः	39	103
27.	त्रिशिरोवधः ...	21	108
28	खरयुद्धम्	33	110
29.	खरभर्त्सनम् ...	30	114
30.	खरवधः	42	118
31.	रावणं प्रति खरवधनिवेदनम्	50	123
32.	रावणसमीपे शूर्पणखागमनम्	25	129
33.	रावणनिन्दा ...	24	132
34.	सीताहरणे रावणप्रोत्साहनम्	28	135
35.	रावणस्य पुनर्मारीचाश्रमगमनम्	42	138
36.	साहाय्यकरणप्रार्थनम् ...	24	143
37.	मारीचकृतोपदेशः ...	26	146
38.	श्रीराममहिमानुवर्णनम् ...	33	149
39.	साहाय्यकरणनिषेधः ...	25	153
40.	मायामृगरूपग्रहणचोदना ...	28	156
41.	पुनर्मारीचोपदेशः ...	20	159
42.	मायामृगरूपग्रहणम् ...	35	162
	एकादशेऽह्नि गीताः श्लोकाः—	671	

सर्गः	विषयः	श्लोकसंख्या	पृष्ठम्
43.	सीताप्रलोभनम् ...	50	166
44.	मारीचवधः ...	28	171
45.	आश्रमाल्लक्ष्मणनिर्गमनम्	41	175
46.	आश्रमे रावणागमनम्	38	180
47.	रावणधिक्कारः ...	52	185
48.	रावणस्यात्मश्लाघा ...	24	191
49.	सीतापहरणम्	42	194
50.	जटायुषा रावणनिरोधः ...	28	199
51.	जटायूरावणयुद्धम् ...	47	202
52.	सीताविलापः ...	46	208
53.	रावणनिन्दा ...	27	213
54.	लङ्काप्राप्तिः	29	216
55.	सीताप्रलोभनम् ...	38	220
56.	संवत्सरावधिकरणम् ...	37	224
57.	दुर्निमित्तदर्शनम्	25	228
58.	सीतागुणानुवादः ...	20	231
59.	लक्ष्मणागमननिन्दा ...	27	234
60.	श्रीरामलक्ष्मणयोः पर्णशालागमनम्	40	237
61.	सीतान्वेषणम्	32	242
62.	श्रीरामविलापः	21	246
63.	लक्ष्मणेन श्रीरामसान्त्वनम्	20	248
	द्वादशेऽस्मिन् गीताः श्लोकाः —	712	
64.	श्रीरामक्रोधः	76	253
65.	क्रोधोपसंहारप्रार्थनम् ...	19	261

सर्गः	विषयः	श्लोकसंख्या	पृष्ठम्
66.	श्रीरामाश्वासनम्	20	264
67.	जटायुर्दर्शनम्	29	266
68.	जटायुस्संस्कारः	42	270
69.	अयोमुखीकबन्धयोर्दर्शनम्	51	275
70.	कबन्धहस्तच्छेदनम्.... ...	20	281
71.	कबन्धेन स्ववृत्तान्तकथनम्	34	283
72.	सीताप्राप्त्युपायकथनम् ...	31	287
73.	ऋश्यमूकाचलमार्गप्रदर्शनम्	46	291
74.	शबरीस्वर्गगतिः	37	296
75.	पम्पादर्शनम्	31	300
	आरण्यकाण्डे त्रयोदशेऽस्मिन् गीताः श्लोकाः—	436	
		2540	



॥ ॐ ॥

॥ अथ स्मार्तानां श्रीरामायणपठनोपक्रमेऽनुसन्धेयाः श्लोकाः ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ १ ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ २ ॥

दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।
भासा कुन्देन्दुशङ्खस्फटिकमणिनिभा भासमानाऽसमाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना ॥

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ ४ ॥

वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ।
शृण्वन् रामकथानादं को न याति परां गतिम् ॥ ५ ॥

यः पिबन् सततं रामचरितामृतसागरम् ।
अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥ ६ ॥

गोष्पदीकृतवारार्शिं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥ ७ ॥

अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥ ८ ॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ॥ ९ ॥

आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥
यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥
मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥
यः कर्णाञ्जलिसंपुटैरहरहः सम्यक् पिबत्यादरात्
वाल्मीकेर्वदनारविन्दगलितं रामायणाख्यं मधु ।
जन्मव्याधिजराविपत्तिमरणैरत्यन्तसोपद्रवं
संसारं स विहाय गच्छति पुमान्विष्णोः पदं शाश्वतम् ॥
तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम् ।
रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ॥
वाल्मीकिगिरिसंभूता रामसागरगामिनी ।
पुनातु भुवनं पुण्या रामायणमहानदी ॥ १५ ॥
श्लोकसारजलाकीर्णं सर्गकल्लोलसङ्कुलम् ।
काण्डग्राहमहामीनं वन्दे रामायणार्णवम् ॥ १६ ॥
वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ॥ १७ ॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

वामे भूमिसुता पुरश्च हनुमान् पश्चात्सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादिकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ॥

नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै ॥
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः॥



॥ पारायणसमापनसमये अनुसन्धेयश्लोकक्रमः ॥

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्ताः सुखिनो भवन्तु ॥ १ ॥

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितो ब्राह्मणास्सन्तु निर्भयाः ॥ २ ॥

अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः ।
अधनाः सधनाः सन्तु जीवन्तु शरदां शतम् ॥ ३ ॥

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं प्रोक्तं महापातकनाशनम् ॥ ४ ॥

शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा ।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा ॥ ५ ॥

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ ६ ॥

यन्मङ्गलं सहस्राक्षे सर्वदेवनमस्कृते ।
वृत्रनाशे समभवत्तत्ते भवतु मङ्गलम् ॥ ७ ॥

यन्मङ्गलं सुपर्णस्य विनताऽकल्पयत्पुरा ।
अमृतं प्रार्थयानस्य तत्ते भवतु मङ्गलम् ॥ ८ ॥

अमृतोत्पादने दैत्यान् घ्नतो वज्रधरस्य यत् ।
अदितिर्मङ्गलं प्रादात्तत्ते भवतु मङ्गलम् ॥ ९ ॥

त्रीन्विक्रमान् प्रक्रमतो विष्णोरमिततेजसः ।
यदासीन्मङ्गलं राम तत्ते भवतु मङ्गलम् ॥ १० ॥

ऋतवः सागरा द्वीपा वेदा लोका दिशश्च ते ।
मङ्गलानि महाबाहो दिशन्तु तव सर्वदा ॥ ११ ॥

कायेन वाचा मनसेन्द्रियैर्वा
बुध्याऽऽत्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयामि ॥ १२ ॥



॥ श्रीवैष्णवानां श्रीरामायणपठनोपक्रमेनुसन्धेयाः श्लोकाः ॥

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ १ ॥

वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ।
शृण्वन् रामकथानादं को न याति परां गतिम् ॥ २ ॥

यः पिबन् सततं रामचरितामृतसागरम् ।
अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥ ३ ॥

गोष्पदीकृतवाराशिं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥ ४ ॥

अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥ ५ ॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ॥ ७ ॥

आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥

यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥

वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ॥ १० ॥

तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम् ।
रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ॥

श्रीराघवं दशरथात्मजमप्रमेयं
सीतापतिं रघुकुलान्वयरत्नदीपम् ।
आजानुबाहुमरविन्ददलायताक्षं
रामं निशाचरविनाशकरं नमामि ॥ १२ ॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥



॥ पारायणसमापनक्रमः ॥

एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः ।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥ १ ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषामिन्दीवरश्यामो हृदये सुप्रतिष्ठितः ॥ २ ॥

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितो ब्राह्मणास्सन्तु निर्भयाः ॥ ३ ॥

कावेरी वर्धतां काले काले वर्षतु वासवः ।
श्रीरङ्गनाथो जयतु श्रीरङ्गश्रीश्च वर्धताम् ॥ ४ ॥

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्ताः सुखिनो भवन्तु ॥ ५ ॥

मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ ६ ॥

वेदवेदान्तवेद्याय मेघश्यामलमूर्तये ।
पुंसां मोहनरूपाय पुण्यश्लोकाय मङ्गलम् ॥ ७ ॥

विश्वामित्रान्तरङ्गाय मिथिलानगरीपतेः ।
भाग्यानां परिपाकाय भव्यरूपाय मङ्गलम् ॥ ८ ॥

पितृभक्ताय सततं भ्रातृभिः सह सीतया ।
नन्दिताखिललोकाय रामभद्राय मङ्गलम् ॥ ९ ॥

त्यक्तसाकेतवासाय चित्रकूटविहारिणे ।
सेव्याय सर्वयमिनां धीरोदाराय मङ्गलम् ॥ १० ॥

सौमित्रिणा च जानक्या चापबाणासिधारिणे ।
संसेव्याय सदा भक्त्या स्वामिने मम मङ्गलम् ॥ ११ ॥

दण्डकारण्यवासाय खण्डितामरशत्रवे ।
गृध्रराजाय भक्ताय मुक्तिदायास्तु मङ्गलम् ॥ १२ ॥

सादरं शबरीदत्तफलमूलाभिलाषिणे ।
सौलभ्यपरिपूर्णाय सत्त्वोद्रिक्ताय मङ्गलम् ॥ १३ ॥

हनुमत्समवेताय हरीशाभीष्टदायिने ।
वालिप्रमथनायास्तु महाधीराय मङ्गलम् ॥ १४ ॥

श्रीमते रघुवीराय सेतूल्लङ्घितसिन्धवे ।
जितराक्षसराजाय रणधीराय मङ्गलम् ॥ १५ ॥

आसाद्य नगरीं दिव्यामभिषिक्ताय सीतया ।
राजाधिराजराजाय रामभद्राय मङ्गलम् ॥ १६ ॥

मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥ १७ ॥

॥ अथ माध्वानां रामायणपठनोपक्रमेऽनुसन्धेयाः श्लोकाः ॥

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ १ ॥

लक्ष्मीनारायणं वन्दे तद्भक्तप्रवरो हि यः ।
श्रीमदानन्दतीर्थाख्यो गुरुस्तं च नमाम्यहम् ॥ २ ॥

वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते ॥ ३ ॥

सर्वविघ्नप्रशमनं सर्वसिद्धिकरं परम् ।
सर्वजीवप्रणेतारं वन्दे विजयदं हरिम् ॥ ४ ॥

सर्वाभीष्टप्रदं रामं सर्वारिष्टनिवारकम् ।
जानकीजानिमनिशं वन्दे मद्गुरुवन्दितम् ॥ ५ ॥

अभ्रमं भङ्गरहितमजडं विमलं सदा ।
आनन्दतीर्थमतुलं भजे तापत्रयापहम् ॥ ६ ॥

भवति यदनुभावादेडमूकोऽपि वाग्मी
जडमतिरपि जन्तुर्जायते प्राज्ञमौलिः ।
सकलवचनचेतोदेवता भारती सा
मम वचसि विधत्तां सन्निधिं मानसे च ॥ ७ ॥

मिथ्यासिद्धान्तदुर्ध्वान्तविध्वंसनविचक्षणः ।
जयतीर्थाख्यतरणिर्भासतां नो हृदम्बरे ॥ ८ ॥

चित्रैः पदैश्च गम्भीरैर्वाक्यैर्मानैरखण्डितैः ।
गुरुभावं व्यञ्जयन्ती भाति श्रीजयतीर्थवाक् ॥ ९ ॥

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ १० ॥

वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ।
शृण्वन् रामकथानादं को न याति परां गतिम् ॥ ११ ॥

यः पिबन् सततं रामचरितामृतसागरम् ।
अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥ १२ ॥

गोष्पदीकृतवारार्शिं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥ १३ ॥

अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥ १४ ॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥

उल्लङ्घ्यसिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम् ॥

आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥

यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥

वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ॥ १९ ॥

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ २० ॥

तदुपगतसमाससन्धियोगं समधुरोपनतार्थवाक्यबद्धम् ।
रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

वन्दे वन्द्यं विधिभवमहेन्द्रादिबृन्दारकेन्द्रैः
व्यक्तं व्याप्तं स्वगुणगणतो देशतः कालतश्च ।
धूतावद्यं सुखचितिमयैर्मङ्गलैर्युक्तमङ्गैः
सानाथ्यं नो विदधदधिकं ब्रह्म नारायणाख्यम् ॥

भूषारत्नं भुवनवलयस्याखिलाश्चर्यरत्नं
लीलारत्नं जलधिदुहितुर्देवतामौलिरत्नम् ।
चिन्तारत्नं जगति भजतां सत्सरोजद्युरत्नं
कौसल्याया लसतु मम हृन्मण्डले पुत्ररत्नम् ॥ २४ ॥

महाव्याकरणाम्भोधिमन्थमानसमन्दरम् ।
कवयन्तं रामकीर्त्या हनुमन्तमुपास्महे ॥ २५ ॥

मुख्यप्राणाय भीमाय नमो यस्य भुजान्तरम् ।
नानावीरसुवर्णानां निकषाश्मायितं बभौ ॥ २६ ॥

स्वान्तस्थानन्तशय्याय पूर्णज्ञानमहार्णसे ।
उत्तुङ्गवाक्तरङ्गाय मध्वदुग्धाब्धये नमः ॥ २७ ॥

वाल्मीकेर्गौः पुनीयान्नो महीधरपदाश्रया ।
यद्दुग्धमुपजीवन्ति कवयस्तर्णका इव ॥ २८ ॥

मूक्तिरत्नाकरे रम्ये मूलरामायणार्णवे ।
विहरन्तो महीयांसः प्रीयन्तां गुरवो मम ॥ २९ ॥

हयग्रीव हयग्रीव हयग्रीवेति यो वदेत् ।
तस्य निःसरते वाणी जह्नुकन्याप्रवाहवत् ॥ ३० ॥



पारायणसमापनक्रमः ॥


स्वस्ति प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्ताः सुखिनो भवन्तु ॥ १ ॥

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितो ब्राह्मणास्सन्तु निर्भयाः ॥ २ ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषामिन्दीवरश्यामो हृदये सुप्रतिष्ठितः ॥ ३ ॥

मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ ४ ॥

इत्यादिश्लोकाः श्रीवैष्णवपद्धतिवदनुसन्धेयाः ॥



ॐ

॥ श्रीगुरुभ्यो नमः ॥

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत-
श्रीरामचन्द्रस्वामिने नमः

॥ श्रीमद्वाल्मीकिरामायणम् ॥

आरण्यकाण्डम्



[पुरा कुशलवाभ्यां श्रीरामसन्निधावश्वमेधयज्ञवाटे
दशमेऽह्नि आरण्यकाण्डेप्रथमसर्गादारभ्य
एकविंशतिसर्गपर्यन्तं (६७१३—७४३३ श्लोकाः)
गीतम् । तस्मिन् दिने गीताः श्लोकाश्च ७२१ ॥]

॥ प्रथमः सर्गः ॥

दण्डकारण्यनिवासितापसकृतस्वरक्षणप्रार्थना ।

प्रविश्य तु महारण्यं दण्डकारण्यमात्मवान् ।
ददर्श रामो दुर्धर्षस्तापसाश्रममण्डलम् ॥ १ ॥

कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतम् ।
यथा प्रदीप्तं दुर्धर्षं गगने सूर्यमण्डलम् ॥ २ ॥

शरणं सर्वभूतानां सुसंमृष्टाजिरं सदा ।
मृगैर्बहुभिराकीर्णं पक्षिसङ्घैः समावृतम् ॥ ३ ॥

पूजितं च प्रनृत्तं च नित्यमप्सरसां गणैः ।
विशालैरग्निशरणैः स्रुग्भाण्डैरजिनैः कुशैः ॥ ४ ॥

समिद्भिस्तोयकलशैः फलमूलैश्च शोभितम् ।
आरण्यैश्च महावृक्षैः पुण्यैः स्वादुफलैर्वृतम् ॥ ५ ॥

बलिहोमार्चितं पुण्यं ब्रह्मघोषनिनादितम् ।
पुष्पैर्वन्यैः परिक्षिप्तं पद्मिन्या च सपद्मया ॥ ६ ॥

फलमूलाशनैर्दान्तैश्चीरकृष्णाजिनाम्बरैः ।
सूर्यवैश्वानराभैश्च पुराणैर्मुनिभिर्वृतम् ॥ ७ ॥

पुण्यैश्च नियताहारैश्शोभितं परमर्षिभिः ।
तद्ब्रह्मभवनप्रख्यं ब्रह्मघोषनिनादितम् ॥
ब्रह्मविद्भिर्महाभागैर्ब्राह्मणैरुपशोभितम् ॥ ८ ॥

स दृष्ट्वा राघवः श्रीमांस्तापसाश्रममण्डलम् ।
अभ्यगच्छन्महातेजा विज्यं कृत्वा महद्धनुः ॥ ९ ॥

दिव्यज्ञानोपपन्नास्ते रामं दृष्ट्वा महर्षयः ।
अभ्यगच्छंस्तथा प्रीता वैदेहीं च यशस्विनीम् ॥ १० ॥

ते तं सोममिवोद्यन्तं दृष्ट्वा वै धर्मचारिणः ।
लक्ष्मणं चैव दृष्ट्वा तु वैदेहीं च यशस्विनीम् ॥ ११ ॥

मङ्गलानि प्रयुञ्जानाः प्रत्यगृह्णन् दृढव्रताः ॥ १२ ॥

रूपसंहननं लक्ष्मीं सौकुमार्यं सुवेषताम् ।
ददृशुर्विस्मिताकारा रामस्य वनवासिनः ॥ १३ ॥

वैदेहीं लक्ष्मणं रामं नेत्रैरनिमिषैरिव ।
आश्चर्यभूतान् ददृशुस्सर्वे ते वनवासिनः ॥ १४ ॥

अत्रैनं हि महाभागास्सर्वभूतहिते रतम् ।
अतिथिं पर्णशालायां राघवं संन्यवेशयन् ॥ १५ ॥

ततो रामस्य सत्कृत्य विधिना पावकोपमाः ।
आजह्रुस्ते महाभागास्सलिलं धर्मचारिणः ॥ १६ ॥

मूलं पुष्पं फलं वन्यमाश्रमं च महात्मनः ।
निवेदयित्वा धर्मज्ञास्ततः प्राञ्जलयोऽब्रुवन् ॥ १७ ॥

धर्मपालो जनस्यास्य शरण्यस्त्वं महायशः ।
पूजनीयश्च मान्यश्च राजा दण्डधरो गुरुः ॥ १८ ॥

इन्द्रस्यैव चतुर्भागः प्रजा रक्षति राघव ।
राजा तस्माद्वरान् भोगान् भुङ्क्ते लोकनमस्कृतः ॥ १९ ॥

ते वयं भवता रक्ष्या भवद्विषयवासिनः ।
नगरस्थो वनस्थो वा त्वं नो राजा जनेश्वरः ॥ २० ॥

न्यस्तदण्डा वयं राजन् जितक्रोधा जितेन्द्रियाः ।
रक्षितव्यास्त्वया शश्वद्गर्भभूतास्तपोधनाः ॥ २१ ॥

एवमुक्त्वा फलैर्मूलैः पुष्पैर्वन्यैश्च राघवम् ।
अन्यैश्च विविधाहारैस्सलक्ष्मणमपूजयन् ॥ २२ ॥

तथाऽन्ये तापसास्सिद्धा रामं वैश्वानरोपमम् ।
न्यायवृत्ता यथान्यायं तर्पयामासुरीश्वरम् ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे प्रथमः सर्गः ॥

आदितः श्लोकाः ६७२५. आरण्यकाण्डे आदितः श्लोकाः २३ .



॥ द्वितीयः सर्गः ॥

विराधेन सीतापहरणम् ।

कृतातिथ्योऽथ रामस्तु सूर्यस्योदयनं प्रति ।
आमन्त्र्य स मुनीन् सर्वान् वनमेवान्वगाहत ॥ १ ॥

नानामृगगणाकीर्णं शार्दूलवृकसेवितम् ।
ध्वस्तवृक्षलतागुल्मं दुर्दर्शं सलिलाशयम् ॥ २ ॥

निष्कूजनानाशकुनि झिल्लिकागणनादितम् ।
लक्ष्मणानुगतो रामो वनमध्यं ददर्श ह ॥ ३ ॥

सीतया सह काकुत्स्थस्तस्मिन् घोरमृगायुते ।
ददर्श गिरिशृङ्गाभं पुरुषादं महास्वनम् ॥ ४ ॥

गम्भीराक्षं महावक्त्रं विकटं विषमोदरम् ।
बीभत्सं विषमं दीर्घं विकृतं घोरदर्शनम् ॥ ५ ॥

वसानं चर्म वैयाघ्रं वसार्द्रं रुधिरोक्षितम् ।
त्रासनं सर्वभूतानां व्यादितास्यमिवान्तकम् ॥ ६ ॥

त्रीन् सिंहांश्चतुरो व्याघ्रान् द्वौ वृकौ पृषतान्दश ।
सविषाणं वसादिग्धं गजस्य च शिरो महत् ॥ ७ ॥

अवसज्यायसे शूले विनदन्तं महास्वनम् ॥ ८ ॥

स रामं लक्ष्मणं चैव सीतां दृष्ट्वा च मैथिलीम् ।
अभ्यधावत सङ्क्रुद्धः प्रजाः काल इवान्तकः ॥ ९ ॥

स कृत्वा भैरवं नादं चालयन्निव मेदिनीम् ।
अङ्केनादाय वैदेहीमपक्रम्य ततोऽब्रवीत् ॥ १० ॥

युवां जटाचीरधरौ सभार्यौ क्षीणजीवितौ ।
प्रविष्टौ दण्डकारण्यं शरचापासिधारिणौ ॥ ११ ॥

कथं तापसयोर्वां च वासः प्रमदया सह ।
अधर्मचारिणौ पापौ कौ युवां मुनिदूषकौ ॥ १२ ॥

अहं वनमिदं दुर्गं विराधो नाम राक्षसः ।
चरामि सायुधो नित्यमृषिमांसानि भक्षयन् ॥ १३ ॥

इयं नारी वरारोहा मम भार्या भविष्यति ।
युवयोः पापयोश्चाहं पास्यामि रुधिरं मृधे ॥ १४ ॥

तस्यैवं ब्रुवतो धृष्टं विराधस्य दुरात्मनः ।
श्रुत्वा सगर्वितं वाक्यं संभ्रान्ता जनकात्मजा ॥
सीता प्रावेपतोद्वेगात्प्रवाते कदली यथा ॥ १५ ॥

तां दृष्ट्वा राघवः श्रीमान्विराधाङ्कगतां शुभाम् ।
अब्रवील्लक्ष्मणं वाक्यं मुखेन परिशुष्यता ॥ १६ ॥

पश्य सौम्य नरेन्द्रस्य जनकस्यात्मसंभवाम् ।
मम भार्यां शुभाचारां विराधाङ्के प्रवेपिताम् ॥
अत्यन्तसुखसंवृद्धां राजपुत्रीं यशस्विनीम् ॥ १७ ॥

यदभिप्रेतमस्मासु प्रियं वरकृतं च यत् ।
कैकेय्यास्तत्सुसंवृत्तं क्षिप्रमद्यैव लक्ष्मण ॥ १८ ॥

या न तुष्यति राज्येन पुत्रार्थे दीर्घदर्शिनी ।
ययाऽहं सर्वभूतानां हितः प्रस्थापितो वनम् ॥
अद्येदानीं सकामा सा या माता मम मध्यमा ॥ १९ ॥

परस्पर्शात्तु वैदेह्या न दुःखतरमस्ति मे ।
पितुर्वियोगात्सौमित्रे स्वराज्यहरणात्तथा ॥ २० ॥

इति ब्रुवति काकुत्स्थे बाष्पशोकपरिप्लुते ।
अब्रवील्लक्ष्मणः क्रुद्धो रुद्धो नाग इव श्वसन् ॥ २१ ॥

अनाथ इव भूतानां नाथस्त्वं वासवोपमः ।
मया प्रेष्येण काकुत्स्थ किमर्थं परितप्यसे ॥ २२ ॥

शरेण निहतस्याद्य मया क्रुद्धेन रक्षसः ।
विराधस्य गतासोर्हि मही पास्यति शोणितम् ॥ २३ ॥

राज्यकामे मम क्रोधो भरते यो बभूव ह ।
तं विराधे विमोक्ष्यामि वज्री वज्रमिवाचले ॥ २४ ॥

मम भुजबलवेगवेगितः
पततु शरोऽस्य महान्महोरसि ।
व्यपनयतु तनोश्च जीवितं
पततु ततः स महीं विघूर्णितः ॥ २५ ॥

इत्युक्त्वा लक्ष्मणः श्रीमान् राक्षसं प्रहसन्निव ।
को भवान्वनमभ्येत्य चरिष्यति यथासुखम् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे द्वितीयः सर्गः ॥

आदितः श्लोकाः ६७६१. आरण्यकाण्डे आदितः श्लोकाः ४९.



॥ तृतीयः सर्गः ॥

विराधः प्रहारः ।

अथोवाच पुनर्वाक्यं विराधः पूरयन्वनम् ।
आत्मानं पृच्छते ब्रूतं कौ युवां क्व गमिष्यतः ॥ १ ॥

तमुवाच ततो रामो राक्षसं ज्वलिताननम् ।
पृच्छन्तं सुमहातेजा इक्ष्वाकुकुलमात्मनः ॥ २ ॥

क्षत्रियौ वृत्तसंपन्नौ विद्धि नौ वनगोचरौ ।
त्वां तु वेदितुमिच्छावः कस्त्वं चरसि दण्डकान् ॥ ३ ॥

तमुवाच विराधस्तु रामं सत्यपराक्रमम् ।
हन्त वक्ष्यामि ते राजन्निबोध मम राघव ॥ ४ ॥

सुतः किल जयस्याहं मम माता शतह्रदा ।
विराध इति मामाहुः पृथिव्यां सर्वराक्षसाः ॥ ५ ॥

तपसा चापि मे प्राप्ता ब्रह्मणो हि प्रसादजा ।
शस्त्रेणावध्यता लोकेऽच्छेद्याभेद्यत्वमेव च ॥ ६ ॥

उत्सृज्य प्रमदामेनामनपेक्षौ यथागतम् ।
त्वरमाणौ पलायेथां न वां जीवितमाददे ॥ ७ ॥

तं रामः प्रत्युवाचेदं कोपसंरक्तलोचनः ।
राक्षसं विकृताकारं विराधं पापचेतसम् ॥ ८ ॥

क्षुद्र धिक् त्वां तु हीनार्थं मृत्युमन्वेषसे ध्रुवम् ।
रणे संप्राप्स्यसे तिष्ठ न मे जीवन् गमिष्यसि ॥ ९ ॥

ततः सज्यं धनुः कृत्वा रामः सुनिशितान् शरान् ।
सुशीघ्रमभिसन्धाय राक्षसं निजघान ह ॥ १० ॥

धनुषा ज्यागुणवता सप्तबाणान् मुमोच ह ।
रुक्मपुंखान् महावेगान् सुपर्णानिलतुल्यगान् ॥ ११ ॥

ते शरीरं विराधस्य भित्त्वा बर्हिणवाससः ।
निपेतुश्शोणितादिग्धाः धरण्यां पावकोपमाः ॥ १२ ॥

स विद्धो न्यस्य वैदेहीं शूलमुद्यम्य राक्षसः।
अभ्यद्रवत्सुसङ्क्रुद्धस्तदा रामं सलक्ष्मणम् ॥ १३ ॥

स विनद्य महानादं शूलं शक्रध्वजोपमम् ।
प्रगृह्याशोभत तदा व्यात्तानन इवान्तकः ॥ १४ ॥

अथ तौ भ्रातरौ दीप्तं शरवर्षं ववर्षतुः।
विराधे राक्षसे तस्मिन् कालान्तकयमोपमे ॥ १५ ॥

स प्रहस्य महारौद्रः स्थित्वाऽजृम्भत राक्षसः ॥ १६ ॥

विराधश्शूलमुद्यम्य राघवावभ्यधावत ॥ १७ ॥

तच्छूलं वज्रसंकाशं गगने ज्वलनोपमम् ।
द्वाभ्यां शराभ्यां चिच्छेद रामश्शस्त्रभृतां वरः ॥ १८ ॥

तद्रामविशिखच्छिन्नं शूलं तस्य कराद्भुवि ।
पपाताशनिना छिन्नं मेरोरिव शिलातलम् ॥ १९ ॥

तौ खड्गौ क्षिप्रमुद्यम्य कृष्णसर्पोपमौ शुभौ ।
तूर्णमापततस्तस्य तदा प्रहरतां बलात् ॥ ॥ २० ॥

स वध्यमानस्सुभृशं भुजाभ्यां परिगृह्य तौ ।
अप्रकम्प्यौ नरव्याघ्रौ रौद्रः प्रस्थातुमैच्छत ॥ २१ ॥

तस्याभिप्रायमाज्ञाय रामो लक्ष्मणमब्रवीत्।
वहत्वयमलं तावत् पथाऽनेन तु राक्षसः ॥ २२ ॥

अयमेव हि नः पन्था येन याति निशाचरः ॥ २३ ॥

स तु स्वबलवीर्येण समुत्क्षिप्य निशाचरः ।
बालाविव स्कन्धगतौ चकारातिबलौ ततः ॥ २४ ॥

तावारोप्य ततः स्कन्धं राघवौ रजनीचरः ।
विराधो निनदन् घोरं जगामाभिमुखो वनम् ॥ २५ ॥

वनं महामेघनिभं प्रविष्टो द्रुमैर्महद्भिर्विविधैरुपेतम् ।
नानाविधैः पक्षिशतैर्विचित्रं शिवायुतं व्यालमृगैर्विकीर्णम् ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे तृतीयः सर्गः ॥

आदितः श्लोकाः ६७८७. आरण्यकाण्डे आदितः श्लोकाः ७५.

चतुर्थः सर्गः

विराधमुक्तिः

ह्रियमाणौ तु तौ दृष्ट्वा वैदेही रामलक्ष्मणौ ।
उच्चैः स्वरेण चुक्रोश प्रगृह्य सुभुजा भुजौ ॥ १ ॥

एष दाशरथी रामस्सत्यवाञ्च्छीलवाञ्च्छुचिः ।
रक्षसा रौद्ररूपेण ह्रियते सहलक्ष्मणः ॥ २ ॥

मां वृका भक्षयिष्यन्ति शार्दूला द्वीपिनस्तथा ।
मां हरोत्सृज्य काकुत्स्थौ नमस्ते राक्षसोत्तम ॥ ३ ॥

तस्यास्तद्वचनं श्रुत्वा वैदेह्या रामलक्ष्मणौ ।
वेगं प्रचक्रतुर्वीरौ वधे तस्य दुरात्मनः ॥ ४ ॥

तस्य रौद्रस्य सौमित्रिस्सव्यं बाहुं बभञ्ज ह।
रामस्तु दक्षिणं बाहुं तरसा तस्य रक्षसः ॥ ५ ॥

स भग्नबाहुस्संविग्नो निपपाताशु राक्षसः।
धरण्यां मेघसङ्काशो वज्रभिन्न इवाचलः ॥ ६ ॥

मुष्टिभिर्जानुभिः पद्भिस्सूदयन्तौ तु राक्षसम्।
उद्यम्योद्यम्य चाप्येनं स्थण्डिले निष्पिपेषतुः ॥ ७ ॥

स विद्धो बहुभिर्बाणैः खड्गाभ्यां च परिक्षतः।
निष्पिष्टो बहुधा भूमौ न ममार स राक्षसः ॥ ८ ॥

तं प्रेक्ष्य रामस्सुभृशमवध्यमचलोपमम्।
भयेष्वभयदः श्रीमानिदं वचनमब्रवीत् ॥ ९ ॥

तपसा पुरुषव्याघ्र राक्षसोऽयं न शक्यते।
शस्त्रेण युधि निर्जेतुं राक्षसं निखनावहे ॥ १० ॥

तच्छ्रुत्वा राघवेणोक्तं राक्षसः प्रश्रितं वचः।
इदं प्रोवाच काकुत्स्थं विराधः पुरुषर्षभम् ॥ ११ ॥

हतोऽस्मि पुरुषव्याघ्र शक्रतुल्यबलेन वै।
मया तु पूर्वं त्वं मोहान्न ज्ञातः पुरुषर्षभः ॥ १२ ॥

कौसल्यासुप्रजा राम तात त्वं विदितो मया।
वैदेही च महाभागा लक्ष्मणश्च महाबलः ॥ १३ ॥

अपि शापादहं घोरां प्रविष्टो राक्षसीं तनुम् ।
तुम्बुरुर्नाम गन्धर्वश्शप्तो वैश्रवणेन ह ॥ १४ ॥

प्रसाद्यमानश्च मया सोऽब्रवीन्मां महायशाः ।
यदा दाशरथी रामस्त्वां वधिष्यति संयुगे
तदा प्रकृतिमापन्नो भवान् स्वर्गं गमिष्यति ॥ १५ ॥

इति वैश्रवणो राजा रम्भासक्तं पुराऽनघ ।
अनुपस्थीयमानो मां संक्रुद्धो व्याजहार ह ॥ १६ ॥

तव प्रसादाद्युक्तोऽहमभिशापात्सुदारुणात् ।
भवनं स्वं गमिष्यामि स्वस्ति वोऽस्तु परन्तप ॥ १७ ॥

अध्यर्धयोजने तात महर्षिस्सूर्यसन्निभः ।
इतो वसति धर्मात्मा शरभङ्गः प्रतापवान् ॥ १८ ॥

तं क्षिप्रमभिगच्छ त्वं स ते श्रेयो विधास्यति ।
अवटे चापि मां राम प्रक्षिप्य कुशली व्रज ॥ १९ ॥

रक्षसां गतसत्त्वानामेष धर्मः सनातनः ।
अवटे ये निधीयन्ते तेषां लोकास्सनातनाः ॥ २० ॥

एवमुक्त्वा तु काकुत्स्थं विराधः शरपीडितः ।
बभूव स्वर्गसंप्राप्तो न्यस्तदेहो महाबलः ॥ २१ ॥

तच्छ्रुत्वा राघवो वाक्यं लक्ष्मणं व्यादिदेश ह ॥ २२ ॥

कुञ्जरस्येव रौद्रस्य राक्षसस्यास्य लक्ष्मण ।
वनेऽस्मिन् सुमहच्छ्वभ्रं खन्यतां रौद्रकर्मणः ॥ २३ ॥

इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति ।
तस्थौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान् ॥ २४ ॥

ततः खनित्रमादाय लक्ष्मणः श्वभ्रमुत्तमम् ।
अखनत्पार्श्वतस्तस्य विराधस्य महात्मनः ॥ २५ ॥

तं मुक्तकण्ठं निष्पिष्य शङ्कुकर्णं महास्वनम् ।
विराधं प्राक्षिपच्छ्वभ्रे नदन्तं भैरवस्वनम् ॥ २६ ॥

तमाहवे निर्जितमाशुविक्रमौ
स्थिरावुभौ संयति रामलक्ष्मणौ ।
मुदाऽन्वितौ चिक्षिपतुर्भयावहं
नदन्तमुत्क्षिप्य बलेन राक्षसम् ॥ २७ ॥

अवध्यतां प्रेक्ष्य महासुरस्य तौ
शितेन शस्त्रेण तदा नरर्षभौ ।
समर्थ्य चात्यर्थविशारदावुभौ
बिले विराधस्य वधं प्रचक्रतुः ॥ २८ ॥

स्वयं विराधेन हि मृत्युरात्मनः
प्रसह्य रामेण वधार्थमीप्सितः।
निवेदितः काननचारिणा स्वयं
न मे वधश्शस्त्रकृतो भवेदिति ॥ २९ ॥

तदेव रामेण निशम्य भाषितं
कृता मतिस्तस्य बिलप्रवेशने ।
बिलं च रामेण बलेन रक्षसा
प्रवेश्यमानेन वनं विनादितम् ॥ ३० ॥

प्रहृष्टरूपाविव रामलक्ष्मणौ
विराधमुर्व्याः प्रदरे निहत्य तौ ।
ननन्दतुर्वीतभयौ महावने
शिलाभिरन्तर्दधतुश्च राक्षसम् ॥ ३१ ॥

ततस्तु तौ कार्मुकखड्गधारिणौ
निहत्य रक्षः परिगृह्य मैथिलीम् ।
विजह्रतुस्तौ मुदितौ महावने
दिवि स्थितौ चन्द्रदिवाकराविव ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे चतुर्थः सर्गः ॥

आदितः श्लोकाः ६८१९. आरण्यकाण्डे आदितः श्लोकाः १०७.



पञ्चमः सर्गः

शरभङ्गस्याग्निप्रवेशः

हत्वा तु तं भीमबलं विराधं राक्षसं वने।
ततः सीतां परिष्वज्य समाश्वास्य च वीर्यवान्
अब्रवील्लक्ष्मणं रामो भ्रातरं दीप्ततेजसम् ॥ १ ॥

कष्टं वनमिदं दुर्गं न च स्म वनगोचराः।
अभिगच्छामहे शीघ्रं शरभङ्गं तपोधनम् ॥ २ ॥

आश्रमं शरभङ्गस्य राघवोऽभिजगाम ह।
तस्य देवप्रभावस्य तपसा भावितात्मनः ॥ ३ ॥

समीपे शरभङ्गस्य ददर्श महदद्भुतम्।
विभ्राजमानं वपुषा सूर्यवैश्वानरोपमम् ॥ ४ ॥

अवरुह्य रथोत्सङ्गात्सकाशे विबुधानुगम्।
असंस्पृशन्तं वसुधां ददर्श विबुधेश्वरम् ॥ ५ ॥

सुप्रभाभरणं देवं विरजोऽम्बरधारिणम्।
तद्विधैरेव बहुभिः पूज्यमानं महात्मभिः ॥ ६ ॥

हरिभिर्वाजिभिर्युक्तमन्तरिक्षगतं रथम्।
ददर्शादूरतस्तस्य तरुणादित्यसन्निभम् ॥ ७ ॥

पाण्डुराभ्रघनप्रख्यं चन्द्रमण्डलसन्निभम्।
अपश्यद्विमलं छत्रं चित्रमाल्योपशोभितम् ॥ ८ ॥

चामरव्यजने चाग्र्ये रुक्मदण्डे महाधने ।
गृहीते वरनारीभ्यां धूयमाने च मूर्धनि ॥ ९ ॥

गन्धर्वामरसिद्धाश्च बहवः परमर्षयः ।
अन्तरिक्षगतं देवं वाग्भिरग्र्याभिरीडिरे ॥ १० ॥

सह संभाषमाणे तु शरभङ्गेण वासवे ।
दृष्ट्वा शतक्रतुं तत्र रामो लक्ष्मणमब्रवीत् ॥
रामोऽथ रथमुद्दिश्य लक्ष्मणाय प्रदर्शयन् ॥ ११ ॥

अर्चिष्मन्तं श्रिया जुष्टमद्भुतं पश्य लक्ष्मण ।
प्रतपन्तमिवादित्यमन्तरिक्षगतं रथम् ॥ १२ ॥

ये हयाः पुरुहूतस्य पुरा शक्रस्य नः श्रुताः ।
अन्तरिक्षगता दिव्यास्त इमे हरयो ध्रुवम् ॥ १३ ॥

इमे च पुरुषव्याघ्रा ये तिष्ठन्त्यभितो रथम् ।
शतं शतं कुण्डलिनो युवानः खड्गपाणयः ॥
विस्तीर्णविपुलोरस्काः परिघायतबाहवः ॥ १४ ॥

शोणांशुवसनाः सर्वे व्याघ्रा इव दुरासदाः ।
उरोदेशेषु सर्वेषां हारा ज्वलनसन्निभाः ॥
रूपं बिभ्रति सौमित्रे पञ्चविंशतिवार्षिकम् ॥ १५ ॥

एतद्धि किल देवानां वयो भवति नित्यदा ।
यथेमे पुरुषव्याघ्राः । दृश्यन्ते प्रियदर्शनाः ॥ १६ ॥

इहैव सह वैदेह्या मुहूर्तं तिष्ठ लक्ष्मण।
यावज्जानाम्यहं व्यक्तं क एष श्रुतिमात्रथे ॥ १७ ॥

तमेवमुक्त्वा सौमित्रिमिहैव स्थीयतामिति।
अभिचक्राम काकुत्स्थः शरभङ्गाश्रमं प्रति ॥ १८ ॥

ततस्समभिगच्छन्तं प्रेक्ष्य रामं शचीपतिः।
शरभङ्गमनुज्ञाप्य विबुधानिदमब्रवीत् ॥ १९ ॥

इहोपयात्यसौ रामो यावन्मां नाभिभाषते।
निष्ठां नयतु तावत्तु ततो मां द्रष्टुमर्हति ॥ २० ॥

जितवन्तं कृतार्थं च द्रष्टाऽहमचिरादिमम्।
कर्म ह्यनेन कर्तव्यं महदन्यैस्सुदुष्करम् ॥
तावद्गच्छामहे शीघ्रं यावन्मां नाभिभाषते ॥ २१ ॥

इति वज्री तमामन्त्र्य मानयित्वा च तापसम्।
रथेन हरियुक्तेन ययौ दिवमरिन्दमः ॥ २२ ॥

प्रयाते तु सहस्राक्षे राघवस्सपरिच्छदः।
अग्निहोत्रमुपासीनं शरभङ्गमुपागमत् ॥ २३ ॥

तस्य पादौ च संगृह्य रामस्सीता च लक्ष्मणः।
निषेदुस्समनुज्ञाता लब्धवासा निमन्त्रिताः ॥ २४ ॥

ततश्शक्रोपयानं तु पर्यपृच्छत्स राघवः।
शरभङ्गश्च तत्सर्वं राघवाय न्यवेदयत् ॥ २५ ॥

मामेष वरदो राम ब्रह्मलोकं निनीषति ।
जितमुग्रेण तपसा दुष्प्रापमकृतात्मभिः ॥ २६ ॥

अहं ज्ञात्वा नरव्याघ्र वर्तमानमदूरतः ।
ब्रह्मलोकं न गच्छामि त्वामदृष्ट्वा प्रियातिथिम् ॥ २७ ॥

त्वयाऽहं पुरुषव्याघ्र धार्मिकेण महात्मना ।
समागम्य गमिष्यामि त्रिदिवं देवसेवितम् ॥ २८ ॥

अक्षया नरशार्दूल मया लोका जिताश्शुभाः ।
ब्राह्मयाश्च नाकपृष्ठ्याश्च प्रतिगृह्णीष्व मामकान् ॥ २९ ॥

एवमुक्तो नरव्याघ्रस्सर्वशास्त्रविशारदः ।
ऋषिणा शरभङ्गेण राघवो वाक्यमब्रवीत् ॥ ३० ॥

अहमेवाहरिष्यामि सर्वान् लोकान्महामुने ।
आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ ३१ ॥

राघवेणैवमुक्तस्तु शक्रतुल्यबलेन वै ।
शरभङ्गो महाप्राज्ञः पुनरेवाब्रवीद्वचः ॥ ३२ ॥

इह राम महातेजास्सुतीक्ष्णो नाम धार्मिकः ।
वसत्यरण्ये धर्मात्मा स ते श्रेयो विधास्यति ॥ ३३ ॥

सुतीक्ष्णमभिगच्छ त्वं शुचौ देशे तपस्विनम् ।
रमणीये वनोद्देशे स ते वासं विधास्यति ॥
इमां मन्दाकिनीं राम प्रतिस्रोतामनुव्रज ॥ ३४ ॥

नदीं पुष्पोडुपवहां ततस्तत्र गमिष्यसि ।
एष पन्था नरव्याघ्र मुहूर्तं पश्य तात माम् ॥
यावज्जहामि गात्राणि जीर्णां त्वचमिवोरगः ॥ ३५ ॥

ततोऽग्निं सुसमाधाय हुत्वा चाऽऽज्येन मन्त्रवित्।
शरभङ्गो महातेजाः प्रविवेश हुताशनम् ॥ ३६ ॥

तस्य रोमाणि केशांश्च ददाहाग्निर्महात्मनः।
जीर्णां त्वचं तथाऽस्थीनि यच्च मांसं सशोणितम् ॥
रामस्तु विस्मितो भ्रात्रा भार्यया च सहात्मवान् ॥ ३७ ॥

स च पावकसङ्काशः कुमारस्समपद्यत ।
उत्थायाग्निचयात्तस्माच्छरभङ्गो व्यरोचत ॥ ३८ ॥

स लोकानाहिताग्नीनामृषीणां च महात्मनाम्।
देवानां च व्यतिक्रम्य ब्रह्मलोकं व्यरोहत ॥ ३९ ॥

स पुण्यकर्मा भवने द्विजर्षभः
पितामहं सानुचरं ददर्श ह ।
पितामहश्चापि समीक्ष्य तं द्विजं
ननन्द सुस्वागतमित्युवाच ह ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे पञ्चमः सर्गः ॥

षष्ठः सर्गः

रक्षोवधप्रतिज्ञानम् ॥

शरभङ्गे दिवं याते मुनिसङ्घास्समागताः ।
अभ्यगच्छन्त काकुत्स्थं रामं ज्वलिततेजसम् ॥ १ ॥

वैखानसा वालखिल्यास्संप्रक्षाला मरीचिपाः ।
अश्मकुट्टाश्च बहवः पत्राहाराश्च तापसाः ॥ २ ॥

दन्तोलूखलिनश्चैव तथैवोन्मज्जकाः परे ।
गात्रशय्या अशय्याश्च तथैवाभ्रावकाशकाः ॥ ३ ॥

मुनयस्सलिलाहाराः वायुभक्षास्तथाऽपरे ।
आकाशनिलयाश्चैव तथा स्थण्डिलशायिनः ॥ ४ ॥

व्रतोपवासिनो दान्तास्तथाऽऽर्द्रपटवाससः ।
सजपाश्च तपोनित्यास्तथा पञ्चतपोऽन्विताः ॥ ५ ॥

सर्वे ब्राह्म्या श्रिया जुष्टा दृढयोगास्समाहिताः ।
शरभङ्गाश्रमे राममभिजग्मुश्च तापसाः ॥ ६ ॥

अभिगम्य च धर्मज्ञा रामं धर्मभृतां वरम् ।
ऊचुः परमधर्मज्ञमृषिसङ्घास्समाहिताः ॥ ७ ॥

त्वमिक्ष्वाकुकुलस्यास्य पृथिव्याश्च महारथ ।
प्रधानश्चासि नाथश्च देवानां मघवानिव ॥ ८ ॥

विश्रुतस्त्रिषु लोकेषु यशसा विक्रमेण च ।
पितृभक्तिश्च सत्यं च त्वयि धर्मश्च पुष्कलः ॥ ९ ॥

त्वामासाद्य महात्मानं धर्मज्ञं धर्मवत्सलम् ।
अर्थित्वान्नाथ वक्ष्यामस्तच्च नः क्षन्तुमर्हसि ॥ १० ॥

अधर्मस्तु महांस्तात भवेत्तस्य महीपतेः ।
यो हरेद्बलिषड्भागं न च रक्षति पुत्रवत् ॥ ११ ॥

युञ्जानः स्वानिव प्राणान् प्राणैरिष्टान् सुतानिव ।
नित्ययुक्तस्सदा रक्षन्सर्वान्विषयवासिनः ॥ १२ ॥

प्राप्नोति शाश्वतीं राम कीर्तिं स बहुवार्षिकीम् ।
ब्रह्मणः स्थानमासाद्य तत्र चापि महीयते ॥ १३ ॥

यत्करोति परं धर्मं मुनिर्मूलफलाशनः ।
तत्र राज्ञश्चतुर्भागः प्रजा धर्मेण रक्षतः ॥ १४ ॥

सोऽयं ब्राह्मणभूयिष्ठो वानप्रस्थगणो महान् ।
त्वन्नाथोऽनाथवद्राम राक्षसैर्बाध्यते भृशम् ॥ १५ ॥

एहि पश्य शरीराणि मुनीनां भावितात्मनाम् ।
हतानां राक्षसैर्घोरैर्बहूनां बहुधा वने ॥ १६ ॥

पम्पानदीनिवासानामनुमन्दाकिनीमपि ।
चित्रकूटालयानां च क्रियते कदनं महत् ॥ १७ ॥

एवं वयं न मृष्यामो विप्रकारं तपस्विनाम् ।
क्रियमाणं वने घोरं रक्षोभिर्भीमकर्मभिः ॥ १८ ॥

ततस्त्वां शरणार्थं च शरण्यं समुपस्थिताः ।
परिपालय नो राम वध्यमानान्निशाचरैः ॥ १९ ॥

परा त्वत्तो गतिर्वीर पृथिव्यां नोपपद्यते ।
परिपालय नः सर्वान् राक्षसेभ्यो नृपात्मज ॥ २० ॥

एतच्छ्रुत्वा तु काकुत्स्थस्तापसानां तपस्विनाम् ।
इदं प्रोवाच धर्मात्मा सर्वानेव तपस्विनः ॥ २१ ॥

नैवमर्हथ मां वक्तुमाज्ञप्तोऽहं तपस्विनाम् ।
केवलेनात्मकार्येण प्रवेष्टव्यं मया वनम् ॥
विप्रकारमपाक्रष्टुं राक्षसैर्भवतामिमम् ॥ २२ ॥

पितुस्तु निर्देशकरः प्रविष्टोऽहमिदं वनम् ।
भवतामर्थसिद्ध्यर्थमागतोऽहं यदृच्छया ॥ २३ ॥

तस्य मेऽयं वने वासो भविष्यति महाफलः ॥ २४ ॥

तपस्विनां रणे शत्रून् हन्तुमिच्छामि राक्षसान् ।
पश्यन्तु वीर्यमृषयस्सभ्रातुर्मे तपोधनाः ॥ २५ ॥

दत्त्वाऽभयं चापि तपोधनानां धर्मे धृतात्मा सह लक्ष्मणेन।
तपोधनैश्चापि सहार्यवृत्तस्सुतीक्ष्णमेवाभिजगाम वीरः ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे षष्ठस्सर्गः ॥

सप्तमः सर्गः

सुतीक्ष्णसमागमः

रामस्तु सहितो भ्रात्रा सीतया च परन्तपः ।
सुतीक्ष्णस्याश्रमपदं जगाम सह तैर्द्विजैः ॥ १ ॥

ते गत्वाऽदूरमध्वानं नदीस्तीर्त्वा बहूदकाः ।
ददृशुर्विपुलं शैलं महामेघमिवोन्नतम् ॥ २ ॥

ततस्तदिक्ष्वाकुवरौ सन्ततं विविधैर्द्रुमैः ।
काननं तौ विविशतुस्सीतया सह राघवौ ॥ ३ ॥

प्रविष्टस्तु वनं घोरं बहुपुष्पफलद्रुमम् ।
ददर्शाश्रममेकान्ते चीरमालापरिष्कृतम् ॥ ४ ॥

तत्र तापसमासीनं मलपङ्कजडाधरम् ।
रामः सुतीक्ष्णं विधिवत्तपोवृद्धमभाषत ॥ ५ ॥

रामोऽहमस्मि भगवन् भवन्तं द्रष्टुमागतः ।
त्वं माऽभिवद धर्मज्ञ महर्षे सत्यविक्रम ॥ ६ ॥

स निरीक्ष्य ततो वीरं रामं धर्मभृतां वरम् ।
समाश्लिष्य च बाहुभ्यामिदं वचनमब्रवीत् ॥ ७ ॥

स्वागतं खलु ते वीर राम धर्मभृतां वर ।
आश्रमोऽयं त्वयाऽऽक्रान्तस्सनाथ इव सांप्रतम् ॥ ८ ॥

प्रतीक्षमाणस्त्वामेव नारोहेऽहं महायशः ।
देवलोकमितो वीर देहं त्यक्त्वा महीतलात् ॥ ९ ॥

चित्रकूटमनुप्राप्तो राज्यभ्रष्टोऽसि मे श्रुतः ॥ १० ॥

इहोपयातः काकुत्स्थ देवराजः शतक्रतुः ।
उपागम्य च मे देवो महादेवस्सुरेश्वरः ॥
सर्वान् लोकान् जितानाह मम पुण्येन कर्मणा ॥ ११ ॥

तेषु देवर्षिजुष्टेषु जितेषु तपसा मया ।
मत्प्रसादात्सभार्यस्त्वं विहरस्व सलक्ष्मणः ॥ १२ ॥

तमुग्रतपसा युक्तं महर्षिं सत्यवादिनम् ।
प्रत्युवाचात्मवान् रामो ब्रह्माणमिव कश्यपः ॥ १६ ॥

अहमेवाहरिष्यामि स्वयं लोकान् महामुने ।
आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ १४ ॥

भवान् सर्वत्र कुशलस्सर्वभूतहिते रतः ।
आख्यातश्शरभङ्गेण गौतमेन महात्मना ॥ १५ ॥

एवमुक्तस्तु रामेण महर्षिर्लोकविश्रुतः ।
अब्रवीन्मधुरं वाक्यं हर्षेण महताऽऽप्लुतः ॥ १६ ॥

अयमेवाश्रमो राम गुणवान् रम्यतामिह ।
ऋषिसङ्घानुचरितस्सदा मूलफलायुतः ॥ १७ ॥

इममाश्रममागम्य मृगसङ्घा महायशः ।
अटित्वा प्रतिगच्छन्ति लोभयित्वाऽकुतोभयाः ॥
नान्यो दोषो भवेदत्र मृगेभ्योऽन्यत्र विद्धि वै ॥ १८ ॥

तच्छ्रुत्वा वचनं तस्य महर्षेर्लक्ष्मणाग्रजः ।
उवाच वचनं धीरो विकृष्य सशरं धनुः ॥ १९ ॥

तानहं सुमहाभाग मृगसङ्घान् समागतान् ।
हन्यां निशितधारेण शरेणाशनिवर्चसा ॥ २० ॥

भवांस्तत्राभिषज्येत किं स्यात् कृच्छ्रतरं ततः ।
एतस्मिन्नाश्रमे वासं चिरं तु न समर्थये ॥ २१ ॥

तमेवमुक्त्वा वरदं रामः सन्ध्यामुपागमत् ॥ २२ ॥

अन्वास्य पश्चिमां सन्ध्यां तत्र वासमकल्पयत् ।
सुतीक्ष्णस्याश्रमे रामस्सीतया लक्ष्मणेन च ॥ २३ ॥

ततः शुभं तापसभोज्यमन्नं
स्वयं सुतीक्ष्णः पुरुषर्षभाभ्याम् ।
ताभ्यां सुसत्कृत्य ददौ महात्मा
सन्ध्यानिवृत्तौ रजनीं निरीक्ष्य ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे सप्तमः सर्गः ॥

आदितः श्लोकाः ६९०९ आरण्यकाण्डे आदितः श्लोकाः १९७

अष्टमः सर्गः

दण्डकारण्यप्रस्थानम् ॥

रामस्तु सहसौमित्रिस्सुतीक्ष्णेनाभिपूजितः ।
परिणाम्य निशां तत्र प्रभाते प्रत्यबुध्यत ॥ १ ॥

उत्थाय तु यथाकालं राघवः सह सीतया ।
उपस्पृश्य सुशीतेन जलेनोत्पलगन्धिना ॥ २ ॥

अथ तेऽग्निं सुरांश्चैव वैदेही रामलक्ष्मणौ ।
काल्यं विधिवदभ्यर्च्य तपस्विशरणे वने ॥ ३ ॥

उदयन्तं दिनकरं दृष्ट्वा विगतकल्मषाः ।
सुतीक्ष्णमभिगम्येदं श्लक्ष्णं वचनमब्रुवन् ॥ ४ ॥

सुखोषिताः स्म भगवन् त्वया पूज्येन पूजिताः ।
आपृच्छामः प्रयास्यामो मुनयस्त्वरयन्ति नः ॥ ५ ॥

त्वरामहे वयं द्रष्टुं कृत्स्नमाश्रममण्डलम् ।
ऋषीणां पुण्यशीलानां दण्डकारण्यवासिनाम् ॥ ६ ॥

अभ्यनुज्ञातुमिच्छामस्सहैभिर्मुनिपुङ्गवैः ।
धर्मनित्यैस्तपोदान्तैर्विशिखैरिव पावकैः ॥ ७ ॥

अविषह्यातपो यावत्सूर्यो नाऽतिविराजते ।
अमार्गेणागतां लक्ष्मीं प्राप्येवान्वयवर्जितः ॥ ८ ॥

तावदिच्छामहे गन्तुमित्युक्त्वा चरणौ मुनेः ।
ववन्दे सहसौमित्रिस्सीता सह राघवः ॥ ९ ॥

तौ संस्पृशन्तौ चरणावुत्थाप्य मुनिपुङ्गवः ।
गाढमाश्लिष्य सस्नेहमिदं वचनमब्रवीत् ॥ १० ॥

अरिष्टं गच्छ पन्थानं राम सौमित्रिणा सह ।
सीतया चाऽनया सार्धं छाययेवानुवृत्तया ॥ ११ ॥

पश्याश्रमपदं रम्यं दण्डकारण्यवासिनाम् ।
एषां तपस्विनां वीर तपसा भावितात्मनाम् ॥ १२ ॥

सम्राज्यफलमूलानि पुष्पितानि वनानि च ।
प्रशान्तमृगयूथानि शान्तपक्षिगणानि च ॥ १३ ॥

फुल्लपङ्कजषण्डानि प्रसन्नसलिलानि च ।
कारण्डवविकीर्णानि तटाकानि सरांसि च ॥ १४ ॥

द्रक्ष्यसे दृष्टिरम्याणि गिरिप्रस्रवणानि च ।
रमणीयान्यरण्यानि मयूराभिरुतानि च ॥ १५ ॥

गम्यतां वत्स सौमित्रे भवानपि च गच्छतु ।
आगन्तव्यं त्वया तात पुनरेवाश्रमं मम ॥ १६ ॥

एवमुक्तस्तथेत्युक्त्वा काकुत्स्थस्सहलक्ष्मणः ।
प्रदक्षिणं मुनिं कृत्वा प्रस्थातुमुपचक्रमे ॥ १७ ॥

ततश्शुभतरे तूणी धनुषी चायतेक्षणा ।
ददौ सीता तयोर्भ्रात्रोः खड्गौ च विमलौ ततः ॥ १८ ॥

आबध्य च शुभे तूणी चापौ चादाय सस्वनौ ।
निष्क्रान्तावाश्रमाद्गन्तुमुभौ तौ रामलक्ष्मणौ ॥ १९ ॥

श्रीमन्तौ रूपसंपन्नौ दीप्यमानौ स्वतेजसा ।
प्रस्थितौ धृतचापौ तौ सीतया सह राघवौ ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकिये आदिकाव्ये
आरण्यकाण्डे अष्टमः सर्गः ॥

आदितः श्लोकाः ६९२९ आरण्यकाण्डे आदितः श्लोकाः २१७



नवमः सर्गः

सीतयाऽऽयुधन्यासप्रार्थना ॥

सुतीक्ष्णेनाभ्यनुज्ञातं प्रस्थितं रघुनन्दनः ।
हृद्यया स्निग्धया वाचा भर्तारमिदमब्रवीत् ॥ १ ॥
अयं धर्मस्सुसूक्ष्मेण विधिना प्राप्यते महान् ।
निवृत्तेन तु शक्योऽयं व्यसनात् कामजादिह ॥ २ ॥
त्रीण्येव व्यसनान्यत्र कामजानि भवन्त्युत ।
मिथ्यावाक्यं गुरुतरं तस्माद्गुरुतरावुभौ ॥
परदाराभिगमनं विना वैरं च रौद्रता ॥ ३ ॥
मिथ्यावाक्यं न ते भूतं न भविष्यति राघव ।
कुतोऽभिलाषणं स्त्रीणां परेषां धर्मनाशनम् ॥ ४ ॥
तव नास्ति मनुष्येन्द्र न चाभूत्ते कदाचन ।
मनस्यपि तथा राम न चैतद्विद्यते क्वचित् ॥ ५ ॥
स्वदारनिरतस्त्वं च नित्यमेव नृपात्मज ।
धर्मिष्ठस्सत्यसन्धश्च पितुर्निर्देशकारकः ॥ ६ ॥

त्वयि सत्यं च धर्मश्च त्वयि सर्वं प्रतिष्ठितम् ॥ ७ ॥
तच्च सर्वं महाभाग शक्यं बोद्धुं जितेन्द्रियैः ।
तव वश्येन्द्रियत्वं च जानामि शुभदर्शन ॥ ८ ॥
तृतीयं यदिदं रौद्रं परप्राणाभिहिंसनम् ।
निर्वैरं क्रियते मोहात्तच्च ते समुपस्थितम् ॥ ९ ॥
प्रतिज्ञातस्त्वया वीर दण्डकारण्यवासिनाम् ।
ऋषीणां रक्षणार्थाय वधस्संयति रक्षसाम् ॥ १० ॥
एतन्निमित्तं च वनं दण्डका इति विश्रुतम् ।
प्रस्थितस्त्वं सह भ्रात्रा धृतबाणशरासनः ॥ ११ ॥
ततस्त्वां प्रस्थितं दृष्ट्वा मम चिन्ताकुलं मनः ।
त्वद्वृत्तं चिन्तयन्त्या वै भवेन्निश्रेयसं हितम् ॥ १२ ॥
न हि मे रोचते वीर गमनं दण्डकान् प्रति ।
कारणं तत्र वक्ष्यामि वदन्त्याः श्रूयतां मम ॥ १३ ॥
त्वं हि बाणधनुष्पाणि भ्रात्रा सह वनं गतः ।
दृष्ट्वा वनचरान् सर्वान् कचित् कुर्याश्शरव्ययम् ॥ १४ ॥
क्षत्रियाणां च हि धनुर्हुताशस्येन्धनानि च ।
समीपतः स्थितं तेजो बलमुच्छ्रयते भृशम् ॥ १५ ॥
पुरा किल महाबाहो तपस्वी सत्यवाक् शुचिः ।
कस्मिंश्चिदभवत्पुण्ये वने रतमृगद्विजे ॥ १६ ॥
तस्यैव तपसो विघ्नं कर्तुमिन्द्रश्शचीपतिः ।
खड्गपाणिरथागच्छदाश्रमं भटरूपधृत् ॥ १७ ॥

तस्मिंस्तदाश्रमपदे निशितः खड्ग उत्तमः ।
स न्यासविधिना दत्तः पुण्ये तपसि तिष्ठतः ॥ १८ ॥

स [illegible]प्य न्यासरक्षणतत्परः ।
वने तु विरचत्येव रक्षन् प्रत्ययमात्मनः ॥ १९ ॥

यत्र गच्छत्युपादातुं मूलानि च फलानि च ।
न विना याति तं खड्गं न्यासरक्षणतत्परः ॥ २० ॥

नित्यं शस्त्रं परिवहन् क्रमेण स तपोधनः ।
चकार रौद्रीं स्वां बुद्धिं त्यक्त्वा तपसि निश्चयम् ॥ २१ ॥

ततः स रौद्रेऽभिरतः प्रमत्तो धर्मकर्शितः ।
तस्य शस्त्रस्य संवासाज्जगाम नरकं मुनिः ॥ २२ ॥

एवमेतत् पुरावृत्तं शस्त्रसंयोगकारणम् ॥ २३ ॥

अग्निसंयोगवद्धेतुश्शस्त्रसंयोग उच्यते ।
स्नेहाच्च बहुमानाच्च स्मारये त्वां न शिक्षये ॥ २४ ॥

न कथंचन सा कार्या गृहीतधनुषा त्वया ।
बुद्धिर्वैरं विना हन्तुं राक्षसान् दण्डकाश्रितान् ॥

अपराधं विना हन्तुं लोकान् वीर न कामये ॥ २५ ॥

क्षत्रियाणां तु वीराणां वनेषु निरतात्मनाम् ।
धनुषा कार्यमेतावदार्तानामभिरक्षणम् ॥ २६ ॥

क्व च शस्त्रं क्व च वनं क्व च क्षात्रं तपः क्व च ।
व्याविद्धमिदमस्माभिर्देशधर्मस्तु पूज्यताम् ॥ २७ ॥

तदार्य कलुषा बुद्धिर्जायते शस्त्रसेवनात् ।
पुनर्गत्वा त्वयोध्यायां क्षत्रधर्मं चरिष्यसि ॥ २८ ॥

अक्षया तु भवेत्प्रीतिः श्वश्रूश्वशुरयोर्मम ।
यदि राज्यं हि संन्यस्य भवेस्त्वं निरतो मुनिः ॥ २९ ॥

धर्मादर्थः प्रभवते धर्मात्प्रभवते सुखम् ।
धर्मेण लभते सर्वं धर्मसारमिदं जगत् ॥ ३० ॥

आत्मानं नियमैस्तैस्तैः कर्शयित्वा प्रयत्नतः ।
प्राप्यते निपुणैर्धर्मो न सुखाल्लभ्यते सुखम् ॥ ३१ ॥

नित्यं शुचिमतिस्सौम्य चर धर्मं तपोवने ।
सर्वं तु विदितं तुभ्यं त्रैलोक्यमपि तत्त्वतः ॥ ३२ ॥

स्त्रीचापलादेतदुदाहृतं मे
धर्मं च वक्तुं तव कः समर्थः ।
विचार्य बुद्ध्या तु सहानुजेन
यद्रोचते तत् कुरु मा चिरेण ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे नवमस्सर्गः ॥

आदितः श्लोकाः ६९६२ आरण्यकाण्डे आदितः श्लोकाः २५१



दशमः सर्गः

रामेण आयुधधारणस्यावश्यकत्वोक्तिः ॥

इत्यमेतत्तु वैदेह्या व्याहृतं भर्तृभक्तया ।
श्रुत्वा धर्मे स्थितो रामः प्रत्युवाचाऽथ जानकीम् ॥ १ ॥

हितमुक्तं त्वया देवि स्निग्धया सदृशं वचः ।
कुलं व्यपदिशन्त्या च धर्मज्ञे जनकात्मजे ॥ २ ॥

किं नु वक्ष्याम्यहं देवि त्वयैवोक्तमिदं वचः ।
क्षत्रियैर्धार्यते चापो नार्तशब्दो भवेदिति ॥ ३ ॥

ते चार्ता दण्डकारण्ये मुनयस्संशितव्रताः ।
मां सीते स्वयमागम्य शरण्याश्शरणं गताः ॥ ४ ॥

वसन्तो धर्मनिरता वने मूलफलाशनाः ।
न लभन्ते सुखं भीता राक्षसैः क्रूरकर्मभिः ॥ ५ ॥

काले काले च निरता नियमैर्विविधैर्वने ।
भक्ष्यन्ते राक्षसैर्भीमैर्नरमांसोपजीविभिः ॥ ६ ॥

ते भक्ष्यमाणा मुनयो दण्डकारण्यवासिनः ।
अस्मानभ्यवपद्येति मामूचुर्द्विजसत्तमाः ॥ ७ ॥

मया तु वचनं श्रुत्वा तेषामेवं मुखाच्च्युतम् ।
कृत्वा चरणशुश्रूषां वाक्यमेतदुदाहृतम् ॥ ७ ॥

प्रसीदन्तु भवन्तो मे ह्रीरेषा हि ममाऽतुला ।
यदीदृशैरहं विप्रैरुपस्थेयैरुपस्थितः ॥
किं करोमीति च मया व्याहृतं द्विजसन्निधौ ॥ ९ ॥

सर्वैरेतैस्समागम्य वागियं समुदाहृता ॥ १० ॥

राक्षसैर्दण्डकारण्ये बहुभिः कामरूपिभिः ।
अर्दिताः स्म दृढं राम भवान्नस्त्रातुमर्हति ॥ ११ ॥

होमकाले तु संप्राप्ते पर्वकालेषु चानघ ।
धर्षयन्ति स्म दुर्धर्षा राक्षसाः पिशिताशनाः ॥ १२ ॥

राक्षसैर्धर्षितानां च तापसानां तपस्विनाम् ।
गतिं मृगयमाणानां भवान्नः परमा गतिः ॥ १३ ॥

कामं तपःप्रभावेन शक्ता हन्तुं निशाचरान् ।
चिरार्जितं तु नेच्छामस्तपः खण्डयितुं वयम् ॥ १४ ॥

बहुविघ्नं तपो नित्यं दुश्चरं चैव राघव।
तेन शापं न मुञ्चामो भक्ष्यमाणाश्च राक्षसैः ॥ १५ ॥

तदर्द्यमानान् रक्षोभिर्दण्डकारण्यवासिभिः ।
रक्ष नस्त्वं सह भ्रात्रा त्वन्नाथा हि वयं वने ॥ १६ ॥

मया चैतद्वचः श्रुत्वा कात्स्न्यर्येन परिपालनम् ।
ऋषीणां दण्डकारण्ये संश्रुतं जनकात्मजे ॥ १७ ॥

संश्रुत्य च न शक्ष्यामि जीवमानः प्रतिश्रवम् ।
मुनीनामन्यथाकर्तुं सत्यमिष्टं हि मे सदा ॥ १८ ॥

अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् ।
न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥ १९ ॥

तदवश्यं मया कार्यमृषीणां परिपालनम् ।
अनुक्तेनापि वैदेहि प्रतिज्ञायाऽथ किं पुनः ॥ २० ॥

मम स्नेहाच्च सौहार्दादिदमुक्तं त्वयाऽनघे ।
परितुष्टोऽस्म्यहं सीते न ह्यनिष्टोऽनुशिष्यते ॥ २१ ॥

सदृशं चानुरूपं च कुलस्य तव शोभने ।
सधर्मचारिणी मे त्वं प्राणेभ्योऽपि गरीयसी ॥ २२ ॥

इत्येवमुक्त्वा वचनं महात्मा
सीतां प्रियां मैथिलराजपुत्रीम् ।
रामो धनुष्मान् सह लक्ष्मणेन
जगाम रम्याणि तपोवनानि ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे दशमः सर्गः ॥

आदितः श्लोकाः ६९८५ आरण्यकाण्डे आदितः श्लोकाः २७३



एकादशः सर्गः

अगस्त्यमहिमानुवर्णनम् ॥

अग्रतः प्रययौ रामः सीता मध्ये सुमध्यमा ।
पृष्ठतस्तु धनुष्पाणिर्लक्ष्मणोऽनुजगाम ह ॥ १ ॥

तौ पश्यमानौ विविधाञ्छैलप्रस्थान् वनानि च ।
नदीश्च विविधा रम्या जग्मतुः सह सीतया ॥ २ ॥

सारसांश्चक्रवाकांश्च नदीपुलिनचारिणः ।
सरांसि च सपद्मानि युक्तानि जलजैः खगैः ॥ ३ ॥

यूथबद्धांश्च पृषतान् मदोन्मत्तान् विषाणिनः ।
महिषांश्च वराहांश्च नागांश्च द्रुमवैरिणः ॥ ४ ॥

ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे ।
ददृशुः सहिता रम्यं तटाकं योजनायतम् ॥ ५ ॥

पद्मपुष्करसंबाधं गजयूथैरलङ्कृतम् ।
सारसैर्हंसकादम्बैः सङ्कुलं जलजातिभिः ॥ ६ ॥

प्रसन्नसलिले रम्ये तस्मिन् सरसि शुश्रुवे ।
गीतवादित्रनिर्घोषो न च कश्चन दृश्यते ॥ ७ ॥

ततः कौतूहलाद्रामो लक्ष्मणश्च महारथः ।
मुनिं धर्मभृतं नाम प्रष्टुं समुपचक्रमे ॥ ८ ॥

इदमत्यद्भुतं श्रुत्वा सर्वेषां नो महामुने ।
कौतूहलं महज्जातं किमिदं साधु कथ्यताम् ॥ ९ ॥

तेनैवमुक्तो धर्मात्मा राघवेण मुनिस्तदा ।
प्रभवं सरसः कृत्स्नमाख्यातुमुपचक्रमे ॥ १० ॥

इदं पञ्चाप्सरो नाम तटाकं सार्वकालिकम् ।
निर्मितं तपसा राम मुनिना माण्डुकर्णिना ॥ ११ ॥

स हि तेपे तपस्तीव्रं माण्डुकर्णिर्महामुनिः ।
दशवर्षसहस्राणि वायुभक्षो जलाश्रयः ॥ १२ ॥

ततः प्रव्यथिताः सर्वे देवाः साग्निपुरोगमाः ।
अब्रुवन् वचनं सर्वे परस्परसमागताः ॥ १३ ॥

अस्माकं कस्यचित् स्थानमेष प्रार्थयते मुनिः ।
इति संविग्नमनसः सर्वे ते त्रिदिवौकसः ॥ १४ ॥

ततः कर्तुं तपोविघ्नं सर्वैर्देवैर्नियोजिताः ।
प्रधानाप्सरसः पञ्च विद्युच्चलितवर्चसः ॥ १५ ॥

अप्सरोभिस्ततस्ताभिर्मुनिर्दृष्टपरावरः ।
नीतो मदनवश्यत्वं सुराणां कार्यसिद्धये ॥ १६ ॥

ताश्चैवाप्सरसः पञ्च मुनेः पत्नीत्वमागताः ।
तटाके निर्मितं तासामस्मिन्नन्तर्हितं गृहम् ॥ १७ ॥

तत्रैवाप्सरसः पञ्च निवसन्त्यो यथासुखम् ।
रमयन्ति तपोयोगान्मुनिं यौवनमास्थितम् ॥ १८ ॥

तासां सङ्क्रीडमानानां वादित्रनिःस्वनः ।
श्रूयते भूषणोन्मिश्रो गीतशब्दो मनोहरः ॥ १९ ॥

आश्चर्यमिति तस्यैतद्वचनं भावितात्मनः ।
राघवः प्रतिजग्राह सह भ्रात्रा महायशाः ॥ २० ॥

एवं कथयमानस्य ददर्शाश्रममण्डलम् ॥ २१ ॥

प्रविश्य सह वैदेह्या लक्ष्मणेन च राघवः ।
उवास मुनिभिः सर्वैः पूज्यमानो महात्मभिः ॥ २२ ॥

तथा तस्मिन् स काकुत्स्थः श्रीमत्याश्रममण्डले।
उषित्वा तु सुखं तत्र पूज्यमानो महर्षिभिः ॥ २३ ॥

जगाम चाश्रमांस्तेषां पर्यायेण तपस्विनाम् ।
येषामुषितवान् पूर्वं सकाशे स महास्त्रवित् ॥ २४ ॥

क्वचित् परिदशान् मासानेकं संवत्सरं क्वचित् ।
क्वचिच्च चतुरो मासान् पञ्च षट् चापरान् क्वचित् ॥ २५ ॥

अपरत्राधिकं मासादप्यर्धमधिकं क्वचित् ।
त्रीन् मासानष्टमासांश्च राघवो न्यवसत् सुखम् ॥ २६ ॥

तथा संवसतस्तस्य मुनीनामाश्रमेषु वै ।
रमतश्चानुकूल्येन ययुः संवत्सरा दश ॥ २७ ॥

परिवृत्य च धर्मज्ञो राघवः सह सीतया ।
सुतीक्ष्णस्याश्रमं श्रीमान् पुनरेवाजगाम ह ॥ २८ ॥

स तमाश्रममासाद्य मुनिभिः प्रतिपूजितः ।
तत्रापि न्यवसद्रामः किञ्चित् कालमरिन्दमः ॥ २९ ॥

तदाश्रमस्थो विनयात् कदाचित्तं महामुनिम् ।
उपासीनः स काकुत्स्थः सुतीक्ष्णमिदमब्रवीत् ॥ ३० ॥

अस्मिन्नरण्ये भगवन्नगस्त्यो मुनिसत्तमः ।
वसतीति मया नित्यं कथाः कथयतां श्रुतम् ॥ ३१ ॥

न तु जानामि तं देशं वनस्यास्य महत्तया ।
कुलाश्रममिदं पुण्यं महर्षेस्तस्य धीमतः ॥ ३२ ॥

प्रसादात्तत्र भवतः सानुजः सह सीतया ।
अगस्त्यमभिगच्छेयमभिवादयितुं मुनिम् ॥ ३३ ॥

मनोरथो महानेष हृदि संपरिवर्तते ।
यदहं तं मुनिवरं शुश्रूषेयमपि स्वयम् ॥ ३४ ॥

इति रामस्य स मुनिः श्रुत्वा धर्मात्मनो वचः ।
सुतीक्ष्णः प्रत्युवाचेदं प्रीतो दशरथात्मजम् ॥ ३५ ॥

अहमप्येतदेव त्वां वक्तुकामः सलक्ष्मणम् ।
अगस्त्यमभिगच्छेति सीतया सह राघव ॥ ३६ ॥

दिष्ट्या त्विदानीमर्थेऽस्मिन् स्वयमेव ब्रवीषि माम् ।
अहमाख्यामि ते राम यत्रागस्त्यो महामुनिः ॥ ३७ ॥

योजनान्याश्रमात्तात याहि चत्वारि वै ततः ।
दक्षिणेन महाञ्छ्रीमानगस्त्यभ्रातुराश्रमः ॥ ३८ ॥

स्थलप्राये वनोद्देशे पिप्पलीवनशोभिते ।
बहुपुष्पफले रम्ये नानाशकुनिनादिते ॥ ३९ ॥

पद्मिन्यो विविधास्तत्र प्रसन्नसलिलाः शिवाः।
हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः ॥ ४० ॥

तत्रैकां रजनीं व्युष्य प्रभाते राम गम्यताम्।
दक्षिणां दिशमास्थाय वनषण्डस्य पार्श्वतः ॥ ४१ ॥

ततोगस्त्याश्रमपदं गत्वा योजनमन्तरम्।
रमणीये वनोद्देशे बहुपादपसंवृते ॥ ४२ ॥

रंस्यते तत्र वैदेही लक्ष्मणश्च सह त्वया ॥ ४३ ॥

यदि बुद्धिः कृता द्रष्टुमगस्त्यं तं महामुनिम्।
अद्यैव गमने बुद्धिं रोचयस्व महायशः ॥ ४४ ॥

इति रामो मुनेः श्रुत्वा सह भ्रात्राऽभिवाद्य च।
प्रतस्थेऽगस्त्यमुद्दिश्य सानुजः सह सीतया ॥ ४५ ॥

पश्यन् वनानि चित्राणि पर्वतांश्चाभ्रसन्निभान्।
सरांसि सरितश्चैव सानूनि विविधानि च ॥ ४६ ॥

सुतीक्ष्णेनोपदिष्टेन गत्वा तेन पथा सुखम्।
इदं परमसंहृष्टो वाक्यं लक्ष्मणमब्रवीत् ॥ ४७ ॥

एतदेवाश्रमपदं नूनं तस्य महात्मनः।
अगस्त्यस्य मुनेर्भ्रातुर्दृश्यते पुण्यकर्मणः ॥ ४८ ॥

यथा हि मे वनस्यास्य जाताः पथि सहस्रशः।
सन्नताः फलभारेण पुष्पभारेण च द्रुमाः ॥ ४९ ॥

पिप्पलीनां च पक्वानां वनादस्मादुपागतः ।
मन्थोऽयं पवनोत्क्षिप्तः सहसा कटुकोदयः ॥ ५० ॥

तत्र तत्र च दृश्यन्ते संक्षिप्ताः काष्ठसञ्चयाः ।
लूनाश्च पथि दृश्यन्ते दर्भा वैडूर्यवर्चसः ॥ ५१ ॥

एतच्च वनमध्यस्थं कृष्णाभ्रशिखरोपमम् ।
पावकस्याश्रमस्थस्य धूमाग्रं संप्रदृश्यते ॥ ५२ ॥

विविक्तेषु च तीर्थेषु कृतस्नाता महर्षयः ।
पुष्पोपहारं कुर्वन्ति कुसुमैः स्वयमार्जितैः ॥ ५३ ॥

तत् सुतीक्ष्णस्य वचनं यथा सौम्य मया श्रुतम् ।
अगस्त्यस्याश्रमो भ्रातुर्नूनमेष भविष्यति ॥ ५४ ॥

निगृह्य तरसा मृत्युं लोकानां हितकाम्यया ।
यस्य भ्रात्रा कृतेयं दिक् शरण्या पुण्यकर्मणा ॥ ५५ ॥

इहैकदा किल क्रूरो वातापिरपि चेल्वलः ।
भ्रातरौ सहितावास्तां ब्राह्मणघ्नौ महासुरौ ॥ ५६ ॥

धारयन् ब्राह्मणं रूपमिल्वलः संस्कृतं वदन् ।
आमन्त्रयति विप्रान् स्म श्राद्धमुद्दिश्य निर्घृणः ॥ ५७ ॥

भ्रातरं संस्कृतं कृत्वा ततस्तं मेषरूपिणम् ।
तान् द्विजान् भोजयामास श्राद्धदृष्टेन कर्मणा ॥ ५८ ॥

ततो भुक्तवतां तेषां विप्राणामिल्वलोऽब्रवीत् ।
वातापे निष्क्रमस्वेति स्वरेण महता वदन् ॥ ५९ ॥

ततो भ्रातुर्वचः श्रुत्वा वातापिर्मेषवन्नदन् ।
भित्त्वा भित्त्वा शरीराणि ब्राह्मणानां विनिष्पतत् ॥ ६० ॥

ब्राह्मणानां सहस्राणि तैरेवं कामरूपिभिः ।
विनाशितानि संहत्य नित्यशः पिशिताशनैः ॥ ६१ ॥

अगस्त्येन तदा देवैः प्रार्थितेन महर्षिणा ।
अनुकूलः किल श्राद्धे भक्षितः स निशाचरः ॥ ६२ ॥

ततः सम्पन्नमित्युक्त्वा दत्त्वा हस्तावसेचनम् ।
भ्रातरं निष्क्रमस्वेति चेल्वलः सोऽभ्यभाषत ॥ ६३ ॥

तं तथा भाषमाणं तु भ्रातरं विप्रघातिनम् ।
अब्रवीत् प्रहसन् धीमानगस्त्यो मुनिसत्तमः ॥ ६४ ॥

कुतो निष्क्रमितुं शक्तिर्मया जीर्णस्य रक्षसः ।
भ्रातुस्ते मेषरूपस्य गतस्य यमसादनम् ॥ ६५ ॥

अथ तस्य वचः श्रुत्वा भ्रातुर्निधनसंश्रितम् ।
प्रधर्षयितुमारेभे मुनिं क्रोधान्निशाचरः ॥ ६६ ॥

सोऽभिद्रवन्मुनिश्रेष्ठं मुनिना दीप्ततेजसा ।
चक्षुषाऽनलकल्पेन निर्दग्धो निधनं गतः ॥ ६७ ॥

तस्यायमाश्रमो भ्रातुस्तटाकवनशोभितः ।
विप्रानुकम्पया येन कर्मैतदुष्करं कृतम् ॥ ६८ ॥

एवं कथयमानस्य तस्य सौमित्रिणा सह ।
रामस्यास्तंगतः सूर्यः सन्ध्याकालोऽभ्यवर्तत ॥ ६९ ॥

उपास्य पश्चिमां सन्ध्यां सह भ्राता यथाविधि ।
प्रविवेशाश्रमपदं तमृषिं सोऽभ्यवादयत् ॥ ७० ॥

सम्यक् प्रतिगृहीतश्च मुनिना तेन राघवः ।
न्यवसत्तां निशामेकां प्राश्य मूलफलानि च ॥ ७१ ॥

तस्यां रात्र्यां व्यतीतायां विमले सूर्यमण्डले ।
भ्रातरं तमगस्त्यस्य आमन्त्रयत राघवः ॥ ७२ ॥

अभिवादये त्वां भगवन् सुखमध्युषितो निशाम् ।
आमन्त्रये त्वां गच्छामि गुरुं ते द्रष्टुमग्रजम् ॥ ७३ ॥

गम्यतामिति तेनोक्तो जगाम रघुनन्दनः ।
यथोद्दिष्टेन मार्गेण वनं तच्चावलोकयन् ॥ ७४ ॥

निवारान् पनसांस्तालान्
तिमिशान् वञ्जुलान्धवान् ।
चिरिबिल्वान् मधूकांश्च
विल्वानपि च तिन्दुकान् ॥ ७५ ॥

पुष्पितान् पुष्पिताग्राभिर्लताभिरनुवेष्टितान् ।
ददर्श रामः शतशस्तत्र कान्तारपादपान् ॥ ७६ ॥

हस्तिहस्तैर्विमृदितान् वानरैरुपशोभितान् ।
मत्तैः शकुनिसङ्घैश्च शतशश्च प्रणादितान् ॥ ७७ ॥

ततोऽब्रवीत् समीपस्थं रामो राजीवलोचनः ।
पृष्ठतोऽनुगतं वीरं लक्ष्मणं लक्ष्मिवर्धनम् ॥ ७८ ॥

स्निग्धपत्रा यथा वृक्षा यथा क्षान्ता मृगद्विजाः ।
आश्रमो नातिदूरस्थो महर्षेर्भावितात्मनः ॥ ७९ ॥

अगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा ।
आश्रमो दृश्यते तस्य परिश्रान्तश्रमापहः ॥ ८० ॥

आज्यधूमाकुलवनश्चीरमालापरिष्कृतः ।
प्रशान्तमृगयूथश्च नानाशकुनिनादितः ॥ ८१ ॥

निगृह्य तरसा मृत्युं लोकानां हितकाम्यया ।
दक्षिणा दिक्कृता येन शरण्या पुण्यकर्मणा ॥ ८२ ॥

तस्येदमाश्रमपदं प्रभावाद्यस्य राक्षसैः ।
दिगियं दक्षिणा त्रासाद्दृश्यते नोपभुज्यते ॥ ८३ ॥

यदा प्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा ।
तदा प्रभृति निर्वैराः प्रशान्ता रजनीचराः ॥ ८४ ॥

नाम्ना चेयं भगवतो दक्षिणा दिक्प्रदक्षिणा ।
प्रथिता त्रिषु लोकेषु दुर्धर्षा क्रूरकर्मभिः ॥ ८५ ॥

मार्गं निरोद्धुं निरतो भास्करस्याचलोत्तमः ।
निदेशं पालयन् यस्य विन्ध्यः शैलो न वर्धते ॥ ८६ ॥

अयं दीर्घायुषस्तस्य लोके विश्रुतकर्मणः ।
अगस्त्यस्याश्रमः श्रीमान् विनीतजनसेवितः ॥ ८७ ॥

एष लोकार्चितः साधुर्हिते नित्यरतः सताम् ।
अस्मानभिगतानेष श्रेयसा योजयिष्यति ॥ ८८ ॥

आराधयिष्याम्यहमगस्त्यं तं महामुनिम् ।
शेषं च वनवासस्य सौम्य वत्स्याम्यहं सुखम् ॥ ८९ ॥

अत्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
अगस्त्यं नियताहारं सततं पर्युपासते ॥ ९० ॥

नात्र जीवेन्मृषावादी क्रूरो वा यदि वा शठः ।
नृशंसः कामवृत्तो वा मुनिरेष तथाविधः ॥ ९१ ॥

अत्र देवाश्च यक्षाश्च नागाश्च पतगैः सह ।
वसन्ति नियताहारा धर्ममाराधयिष्णवः ॥ ९२ ॥

अत्र सिद्धा महात्मानो विमानै सूर्यसन्निभः ।
त्यक्तदेहा नवैर्देहैः स्वर्याताः परमर्षयः ॥ ९३ ॥

यक्षत्वममरत्वं च राज्यानि विविधानि च ।
अत्र देवाः प्रयच्छन्ति भूतैराराधिताः शुभैः ॥ ९४ ॥

आगताः स्माश्रमपदं सौमित्रे प्रविशाग्रतः।
निवेदयस्व मां प्राप्तमृषये सीतया सह ॥ ९५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकादशः सर्गः ॥

आदितः श्लोकाः ७०८० आरण्यकाण्डे आदितः श्लोकाः ३६८



द्वादशः सर्गः

अगस्त्यदर्शनम् ॥

स प्रविश्याश्रमपदं लक्ष्मणो राघवानुजः।
अगस्त्यशिष्यमासाद्य वाक्यमेतदुवाच ह ॥ १ ॥

राजा दशरथो नाम ज्येष्ठस्तस्य सुतो बली।
रामः प्राप्तो मुनिं द्रष्टुं भार्यया सह सीतया ॥ २ ॥

लक्ष्मणो नाम तस्याऽहं भ्राता त्ववरजो हितः।
अनुकूलश्च भक्तश्च यदि ते श्रोत्रमागतः ॥ ३ ॥

ते वयं वनमत्युग्रं प्रविष्टाः पितृशासनात्।
द्रष्टुमिच्छामहे सर्वे भगवन्तं निवेद्यताम् ॥ ४ ॥

तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य तपोधनः।
तथेत्युक्त्वाऽग्निशरणं प्रविवेश निवेदितुम् ॥ ५ ॥

स प्रविश्य मुनिश्रेष्ठं तपसा दुष्प्रधर्षणम् ।
कृताञ्जलिरुवाचेदं रामागमनमञ्जसा ॥
यथोक्तं लक्ष्मणेनैव शिष्योऽगस्त्यस्य संमतः ॥ ६ ॥

पुत्रौ दशरथस्येमौ रामो लक्ष्मण एव च ।
प्रविष्टावाश्रमपदं सीतया सह भार्यया ॥ ७ ॥

द्रष्टुं भवन्तमायातौ शुश्रूषार्थमरिन्दमौ ।
यदत्रानन्तरं तत्त्वमाज्ञापयितुमर्हसि ॥ ८ ॥

ततः शिष्यादुपश्रुत्य प्राप्तं रामं सलक्ष्मणम् ।
वैदेहीं च महाभागामिदं वचनमब्रवीत् ॥ ९ ॥

दिष्ट्या रामश्चिरस्याद्य द्रष्टुं मां समुपस्थितः ।
मनसा कांक्षितं ह्यस्य मयाऽप्यागमनं प्रति ॥ १० ॥

गम्यतां सत्कृतो रामस्सभार्यस्सहलक्ष्मणः ।
प्रवेश्यतां समीपं मे किञ्चासौ न प्रवेशितः ॥ ११ ॥

एवमुक्तस्तु मुनिना धर्मज्ञेन महात्मना ।
अभिवाद्याब्रवीच्छिष्यस्तथेति नियताञ्जलिः ॥ १२ ॥

ततो निष्क्रम्य सम्भ्रान्तश्शिष्यो लक्ष्मणमब्रवीत् ।
क्वासौ रामो मुनिं द्रष्टुमेतु प्रविशतु स्वयम् ॥ १३ ॥

ततो गत्वाऽऽश्रमद्वारं शिष्येण सह लक्ष्मणः ।
दर्शयामास काकुत्स्थं सीतां च जनकात्मजाम् ॥ १४ ॥

तं शिष्यः प्रश्रितं वाक्यमगस्त्यवचनं ब्रुवन् ।
प्रावेशयद्यथान्यायं सत्कारार्हं सुसत्कृतम् ॥ १५ ॥

प्रविवेश ततो रामस्सीतया सहलक्ष्मणः ।
प्रशान्तहरिणाकीर्णमाश्रमं ह्यवलोकयन् ॥ १६ ॥

स तत्र ब्रह्मणः स्थानमग्नेः स्थानं तथैव च ।
विष्णोः स्थानं महेन्द्रस्य स्थानं चैव विवस्वतः ॥ १७ ॥

सोमस्थानं भगस्थानं स्थानं कौबेरमेव च ।
धातुर्विधातुः स्थाने च वायोः स्थानं तथैव च ॥ १८ ॥

स्थानं च पाशहस्तस्य वरुणस्य महात्मनः ।
स्थानं तथैव गायत्र्या वसूनां स्थानमेव च ॥ १९ ॥

नागराजस्य च स्थानमनन्तस्य महात्मनः ।
कार्तिकेयस्य च स्थानं धर्मस्थानं च पश्यति ॥ २० ॥

ततः शिष्यैः परिवृतो मुनिरप्यभिनिष्पतत् ।
तं ददर्शाग्रतो रामो मुनीनां दीप्ततेजसाम् ॥ २१ ॥

अब्रवीद्वचनं रामो लक्ष्मणं लक्ष्मिवर्धनम् ॥ २२ ॥

एष लक्ष्मण निष्कामत्यगस्त्यो भगवानृषिः ॥ २३ ॥

औदार्येणावगच्छामि निधानं तपसामिदम् ॥ २४ ॥

एवमुक्त्वा महाबाहुरगस्त्यं सूर्यवर्चसम् ।
जग्राह परमप्रीतस्तस्य पादौ परन्तपः ॥ २५ ॥

अभिवाद्य तु धर्मात्मा तस्थौ रामः कृताञ्जलिः।
सीतया सह वैदेह्या तदा रामस्सलक्ष्मणः ॥ २६ ।

प्रतिगृह्य च काकुत्स्थमर्चयित्वाऽऽसनोदकैः ।
कुशलप्रश्नमुक्त्वा च आस्यतामिति चाब्रवीत् ॥ २७ ॥

अग्निं हुत्वा प्रदायार्घ्यमतिथीन् प्रतिपूज्य च ।
वानप्रस्थेन धर्मेण स तेषां भोजनं ददौ ॥ २८ ॥

प्रथमं चोपविश्याथ धर्मज्ञो मुनिपुङ्गवः ।
उवाच राममासीनं प्राञ्जलिं धर्मकोविदम् ॥ २९ ॥

अन्यथा खलु काकुत्स्थ
तपस्वी समुदाचरन् ।
दुःसाक्षीव परे लोके
स्वानि मांसानि भक्षयेत् ॥ ३० ॥

राजा सर्वस्य लोकस्य धर्मचारी महारथः ।
पूजनीयश्च मान्यश्च भवान् प्राप्तः प्रियातिथिः ॥ ३१ ॥

एवमुक्त्वा फलैर्मूलैः पुष्पैरन्यैश्च राघवम् ।
पूजयित्वा यथाकामं पुनरेवाब्रवीद्वचः ॥ ३२ ॥

इदं दिव्यं महच्चापं हेमवज्रविभूषितम् ।
वैष्णवं पुरुषव्याघ्र निर्मितं विश्वकर्मणा ।
अमोघस्सूर्यसङ्काशो ब्रह्मदत्तश्शरोत्तमः ॥ ३३ ॥

दत्तौ मम महेन्द्रेण तूणी चाक्षयसायकौ
सम्पूर्णौ निशितैर्बाणैर्ज्वलद्भिरिव पावकैः ॥ ३४ ॥

महारजतकोशोऽयमसिर्हेमविभूषितः ॥ ३५ ॥

अनेन धनुषा राम हत्वा सङ्ख्ये महासुरान्
आजहार श्रियं दीप्तां पुरा विष्णुर्दिवौकसाम् ॥ ३६ ॥

तद्धनुस्तौ च तूणीरौ शरं खड्गं च मानद
जयाय प्रतिगृह्णीष्व वज्रं वज्रधरो यथा ॥ ३७ ॥

इदं च ते तनुत्राणमभेद्यं मघवान्ददौ
स्पर्शयानुपमं वीर प्रतिगृह्णीष्व मानद ॥ ३८ ॥

जये च संशयं प्राप्य चिन्तयिष्यसि विह्वलन्
हरियुग्यं रथं दिव्यमुपनेष्यति मातलिः ॥ ३९ ॥

एवमुक्त्वा महातेजास्समस्तं तद्वरायुधम्
दत्त्वा रामाय भगवानगस्त्यः पुनरब्रवीत् ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे द्वादशः सर्गः ॥

आदितः श्लोकाः ७१२० आरण्यकाण्डे आदितः श्लोकाः ४०८



त्रयोदशः सर्गः

पञ्चवटिप्रति प्रस्थानम् ॥

सुखं स्वप महाबाहो ससीतस्सहलक्ष्मणः ।
रविरस्तं गतस्सौम्य सन्ध्याकालोऽप्युपागमत् ॥ १ ॥

एते निशाचरा राम निलीना मृगपक्षिणः ।
नगाग्रेषु भृशं लीना दृश्यन्ते सुसमाहिताः ॥
नैशेन तमसा व्याप्तमप्रकाशं नभःस्थलम् ॥ २ ॥

एवमुक्तो महाबाहुरगस्त्येन महात्मना ।
उपास्य पश्चिमां सन्ध्यां रामस्सौमित्रिणा सह ॥ ३ ॥

अभिवाद्य महात्मानमगस्त्यमृषिसत्तमम् ।
सुष्वाप रजनीमेकां पूजितः परमर्षिणा ॥ ४ ॥

सुखोषितस्तदा रामस्सन्ध्यामन्वास्य सानुजः ।
कृतपूर्वाह्णिकस्तस्थौ स्नात्वा हुतहुताशनः ॥ ५ ॥

लक्ष्मणेन सह भ्राता सीतया च परन्तपः ।
उपागच्छद्यतात्मा अगस्त्यं सूर्यवर्चसम् ॥ ६ ॥

स दृष्ट्वा राघवं श्रीमानगस्त्यस्संयताञ्जलिम् ।
प्रतिपूज्य यथान्यायमिदं वचनमब्रवीत् ॥ ७ ॥

कच्चित्सुखा निशा राम व्यतीता रघुनन्दन ।
तव सभ्रातृभार्यस्य ममाश्रमपदे शुभे ॥ ८ ॥

अगस्त्येनैवमुक्तस्तु काकुत्स्थो वाक्यमब्रवीत् ।
मानिताः स्म यथान्यायं त्वया पूज्येन पूजिताः ॥ ९ ॥

शयनासनदानेन भोजनाच्छादनैश्शुभैः ।
राज्ञो दशरथस्यैव पुरस्यान्तःपुरे यथा ।
सुखोषिताः स्म भगवन् सर्वकामैरुपस्थिताः ॥ १० ॥

सुखोपविष्टे रामे तु सहसीते सलक्ष्मणे ।
स तेन ऋषिसङ्घेन अगस्त्यो वाक्यमब्रवीत् ॥ ११ ॥

कालोऽयं गतभूयिष्ठो यः कालस्तव राघव ।
समयो यो नरेन्द्रेण कृतो दशरथेन ते ।
तीर्णप्रतिज्ञः काकुत्स्थ सुखं राम निवत्स्यसि ॥ १२ ॥

धन्यस्ते जनको राम स राजा रघुनन्दन ।
यस्त्वया ज्येष्ठपुत्रेण ययातिरिव तारितः ॥ १३ ॥

एवमुक्तस्ततो रामः प्रत्युवाच कृताञ्जलिः ।
प्रीतः प्रीततरं वाक्यं प्रत्युवाच महायशाः ॥ १४ ॥

धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गव ।
प्रीयमाणस्तु सुप्रीतो नास्ति धन्यतरो मम ॥ १५ ॥

मया न तारितो राजा स्वगुणैरेव तारितः ।
स्वर्गं दशरथः प्राप्तः स्वकृतैः पुण्यकर्मभिः ॥ १६ ॥

अयं तु देशो निखिलस्सर्व एव महातपः ।
अशरण्यश्शरण्योऽभूद्यथैव विनिवेशितः ।
तथाऽऽख्याह्यर्थतत्त्वेन परं कौतूहलं मम ॥ १७ ॥

श्रुत्वा तु वचनं तस्य रामस्य मधुराक्षरम् ।
प्रत्युवाच ततो राममगस्त्यो भगवानृषिः ॥ १८ ॥

शृणु राघव तत्त्वेन देशस्याऽस्य यथातथम् ॥ १९ ॥

दण्डकेन परित्यक्तो ह्ययं देशो महात्मना ।
भार्गवस्य च शापेन निर्मनुष्यमृगोऽभवत् ॥ २० ॥

वृक्षगुल्मलताहीनं तापसैरभिवर्जितम् ।
कान्तारमभवत्तात घोरं परमदारुणम् ॥
योजनार्धसहस्रन्तु विन्ध्यपादस्तु दक्षिणः ॥ २१ ॥

नानुवर्षति पर्जन्यो नानुवाति सुखोऽनिलः ।
रक्षःप्रतिभयं घोरमासीत्परमदारुणम् ॥ २२ ॥

[illegible] ह्येतदासीदमानुषम् ।
गन्धर्वैर्ऋषिसङ्घैश्च देवैश्च परिवर्जितम् ॥ २३ ॥

कस्य चित्त्वथ कालस्य दैवयोगादहं नृप ।
हिमवच्छिखरादेशादिह प्राप्तोऽस्मि मानद ॥ २४ ॥

ततो मया समाहूतः पर्जन्यो जलदैस्सह ।
स्वच्छन्दवर्षश्च कृतः कञ्चित्कालमरिन्दम ॥ २५ ॥

यमस्य चैव चारास्तु बहून्यब्दशतानि वै ।
तेजसा मृत्युभूताश्च व्याधयश्च विसर्जिताः ॥ २६ ॥

हिमवत्पादजा वृक्षाश्चिन्तिता मनसाऽऽगताः ।
प्रवृत्ताश्चपुनर्नद्यः फुल्लपङ्कजमण्डिताः ॥ २७ ॥

तटाकानि च रम्याणि सरितश्च सरांसि च ॥ २८ ॥

प्रवृद्धवनषण्डन्तु स्फीतसस्यवनाकुलम् ।
अचिरेणाऽभवद्रम्यं सर्षिसङ्घानुसेवितम् ॥ २९ ॥

केवलं त्वभिशापेन तस्यैव रघुनन्दन ।
सोपद्रुतमिवाप्येतद्राक्षसैरुग्रकर्मभिः ॥ ३० ॥

यदाप्रभृति चापि त्वं चित्रकूटमुपागतः ।
तदाप्रभृति रक्षांसि विप्रकुर्वन्ति तापसान् ॥ ३१ ॥

ऋषीणामभयं वीर दातुमर्हसि मानद ॥ ३२ ॥

अस्माद्धि कारणाद्राम दण्डकारण्यवासिनाम् ।
त्राणार्थमिह संप्राप्तस्त्रातुमर्हति नो भवान् ॥ ३३ ॥

समर्थोऽस्यसि काकुत्स्थ त्रैलोक्य स्यापि रक्षणे ।
किं पुनर्वीर रक्षांसि द्विजमन्युहतानि वै ॥ ३४ ॥

अयमिक्ष्वाकुपुत्रेण दण्डकेन महाबल ।
देशो निराकृतो राजञ्छापदोषेण राघव ॥ ३५ ॥

दण्डकारण्यमखिलं दर्शनादेव राघव ।
शापस्यान्ताय काकुत्स्थ प्राप्तस्त्वमरिमर्दन ॥ ३६ ॥

सत्त्वं मन्युपरावृत्तैः पितृभिस्सं निराकृतम् ।
तारय त्वं महाबाहो दण्डकारण्यमद्य वै ॥ ३७ ॥

एवमुक्तस्तदा रामः प्रत्युवाच महामुनिम् ।
आश्चर्यमिदमाख्यातं देशस्याऽस्य यथा तथम् ॥ ३८ ॥

एवमुक्तस्तु रामेण महर्षिस्त्विदमब्रवीत् ॥ ३९ ॥

राम प्रीतोऽस्मि भद्रं ते परितुष्टोऽस्मि लक्ष्मण ।
अभिवादयितुं यन्मां प्राप्तौ स्थः सह सीतया ॥ ४० ॥

अध्वश्रमेण वां खेदो बाधते प्रचुरश्रमः ।
व्यक्तमुत्कण्ठते चापि मैथिली जनकात्मजा ॥ ४१ ॥

एषा हि सुकुमारी च दुःखैश्च न विमानिता ।
प्राज्यदोषं वनं प्राप्ता भर्तृस्नेहप्रचोदिता ॥ ४२ ॥

यथैषा रमते राम इह सीता तथा कुरु ।
दुष्करं कृतवत्येषा वने त्वामनुगच्छति ॥ ४३ ॥

एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन ।
समस्थमनुरज्यन्ति विषमस्थं त्यजन्ति च ॥ ४४ ॥

शतह्रदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा ।
गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः ॥ ४५ ॥

इयं तु भवतो भार्या दोषैरेतैर्विवर्जिता ।
श्लाघ्या च व्यपदेश्या च यथा देवेष्वरुन्धती ॥ ४६ ॥

अलङ्कृतोऽयं देशश्च यत्र सौमित्रिणा सह ।
वैदेह्या चानया राम वत्स्यसि त्वमरिन्दम ॥ ४७ ॥

एवमुक्तस्तु मुनिना राघवस्संयताञ्जलिः ।
उवाच प्रश्रितं वाक्यमृषिं दीप्तमिवानलम् ॥ ४८ ॥

धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गवः ।
गुणैस्सभ्रातृभार्यस्य वरदः परितुष्यति ॥ ४९ ॥

किन्तु व्यादिश मे देशं सोदकं बहुकाननम् ।
यत्राश्रमपदं कृत्वा वसेयं निरतस्सुखम् ॥ ५० ॥

ततोऽब्रवीन्मुनिश्रेष्ठः श्रुत्वा रामस्य भाषितम् ।
ध्यात्वा मुहूर्तं धर्मात्मा धीरो धीरतरं वचः ॥ ५१ ॥

इतो द्वियोजने तात बहुमूलफलोदकः ।
देशो बहुमृगः श्रीमान् पञ्चवट्यभिविश्रुतः ॥ ५२ ॥

तत्र गत्वाऽऽश्रमपदं कृत्वा सौमित्रिणा सह ।
रंस्यसे त्वं पितुर्वाक्यं यथोक्तमनुपालयन् ॥ ५३ ॥

विदितो ह्येष वृत्तान्तो मम सर्वस्तवानघ ।
तपसश्च प्रभावेन स्नेहाद्दशरथस्य च ॥ ५४ ॥

हृदयस्थश्च ते छन्दो विज्ञातस्तपसा मया ।
इह वासं प्रतिज्ञाय मया सह तपोवने ॥ ५५ ॥

अतश्च त्वामहं ब्रूमि गच्छ पञ्चवटीमितः ॥ ५६ ॥

स हि रम्यो वनोद्देशो मैथिली तत्र रंस्यते ।
स देशः श्लाघनीयश्च नातिदूरे च राघव ॥ ५७ ॥

गोदावर्यास्समीपे च मैथिली तत्र रंस्यते ।
प्राज्यमूलफलश्चैव नानाद्विजगणायुतः ॥ ५८ ॥

विविक्तश्च महाबाहो पुण्यो रम्यस्तथैव च ॥ ५९ ॥

भवानपि सदारश्च शक्तश्च परिरक्षणे ।
अपि चात्र वसन्त्राम तापसान् पालयिष्यसि ॥ ६० ॥

एतदालक्ष्यते वीर मधूकानां महद्वनम् ।
उत्तरेणास्य गन्तव्यं न्यग्रोधमभिगच्छता ॥ ६१ ॥

ततः स्थलमुपारुह्य पर्वतस्याविदूरतः ।
ख्यातः पञ्चवटीत्येव नित्यपुष्पितकाननः ॥ ६२ ॥

अगस्त्येनैवमुक्तस्तु रामस्सौमित्रिणा सह।
सत्कृत्यामन्त्रयामास तमृषिं सत्यवादिनम् ॥ ६३ ॥

तौ तु तेनाभ्यनुज्ञातौ कृतपादाभिवन्दनौ।
तमाश्रमं पश्चवटीं जग्मतुस्सह सीतया ॥ ६४ ॥

गृहीतचापौ तु नराधिपात्मजौ
विषक्ततूणौ समरेष्वकातरौ।
यथोपदिष्टेन पथा महर्षिणा
प्रजग्मतुः पश्चवटीं समाहितौ ॥ ६५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे त्रयोदशः सर्गः ॥

आदितः श्लोकाः ७१८५ आरण्यकाण्डे आदितः श्लोकाः ४७३



चतुर्दशः सर्गः

जटायुदर्शनम् ॥

अथ पश्चवटीं गच्छन्नन्तरा रघुनन्दनः।
आससाद महाकायं गृध्रं भीमपराक्रमम् ॥ १ ॥

तं दृष्ट्वा तौ महाभागौ वटस्थं रामलक्ष्मणौ।
मेनाते राक्षसं पक्षिं ब्रुवाणो को भवानिति ॥ २ ॥

स तौ मधुरया वाचा सौम्यया प्रीणयन्निव।
उवाच वत्स मां विद्धि वयस्यं पितुरात्मनः ॥ ३ ॥

स तं पितृसखं बुध्वा पूजयामास राघवः ।
स तस्य कुलमव्यग्रमथ पप्रच्छ नाम च ॥ ४ ॥

रामस्य वचनं श्रुत्वा कुलमात्मानमेव च ।
आचचक्षे द्विजस्तस्मै सर्वभूतसमुद्भवम् ॥ ५ ॥

पूर्वकाले महाबाहो ये प्रजापतयोऽभवन् ।
तान्मे निगदतस्सर्वानादितः शृणु राघव ॥ ६ ॥

कर्दमःप्रथमस्तेषां विश्रुतस्तदनन्तरः ।
शेषश्च संश्रयश्चैव बहुपुत्रश्च वीर्यवान् ॥ ७ ॥

स्थाणुर्मरीचिरत्रिश्च क्रतुश्चैव महाबलः ।
पुलस्त्यश्चाङ्गिराश्चैव प्रचेताः पुलहस्तथा ॥ ८ ॥

दक्षो विवस्वानपरोऽरिष्टनेमिश्च राघव ।
कश्यपश्च महातेजास्तेषामासीच्च पश्चिमः ॥ ९ ॥

प्रजापतेस्तु दक्षस्य बभूवुरिति नः श्रुतम् ।
षष्टिर्दुहितरो राम यशस्विन्यो महायशः ॥ १० ॥

कश्यपः प्रतिजग्राह तासामष्टौ सुमध्यमाः ।
अदितिं च दितिं चैव दनूमपि च कालिकाम्
ताम्रां क्रोधवशां चैव मनुं चाप्यनलामपि ॥ ११ ॥

तास्तु कन्यास्ततः प्रीतः कश्यपः पुनरब्रवीत् ।
पुत्रांस्त्रैलोक्यभर्तॄन्वै जनयिष्यथ मत्समान् ॥ १२ ॥

अदितिस्तन्मना राम दितिश्च दनुरेव च ।
कालिका च महाबाहो शेषास्त्वमनसोऽभवन् ॥ १३ ॥

अदित्यां जज्ञिरे देवास्त्रयस्त्रिंशदरिन्दम ।
आदित्या वसवो रुद्रा ह्यश्विनौ च परन्तप ॥ १४ ॥

दितिस्त्वजनयत्पुत्रान् दैत्यांस्तात यशस्विनः ।
तेषामियं वसुमती पुराऽऽसीत्सवनार्णवा ॥ १५ ॥

दनुरप्यजनयत्पुत्रमश्वग्रीवमरिन्दम ।
नरकं कालिकं चैव कालिकाऽपि व्यजायत ॥ १६ ॥

क्रौञ्चीं भासीं तथा श्येनीं धृतराष्ट्रीं तथा शुकीम् ।
ताम्राऽपि सुषुवे कन्याः पञ्चैता लोकविश्रुताः ॥ १७ ॥

उलूकान् जनयत्क्रौञ्ची भासी भासान् व्यजायत ।
श्येनी श्येनांश्च गृध्रांश्च व्यजायत सुतेजसः ॥ १८ ॥

धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः ।
चक्रवाकांश्च भद्रं ते विजज्ञे साऽपि भामिनी ॥ १९ ॥

शुकी नतां विजज्ञे तु नताया विनता सुता ॥ २० ॥

दश क्रोधवशा राम विजज्ञे ह्यात्मसम्भवाः ।
मृगीं च मृगमन्दां च हरिं भद्रमदामपि ॥ २१ ॥

मातङ्गीमपि शार्दूलीं श्वेतां च सुरभिं तथा ।
सर्वलक्षणसम्पन्नां सुरसां कद्रुकामपि ॥ २२ ॥

अपत्यं तु मृगास्सर्वे मृग्या नरवरोत्तम ।
ऋक्षाश्च मृगमन्दायास्सृमराश्चमरास्तथा ॥ २३ ॥

हर्याश्च हरयोऽपत्यं वानराश्च तरस्विनः ।
ततस्त्विरावतीं नाम जज्ञे भद्रमदा सुताम् ॥ २४ ॥

तस्यास्त्वैरावतः पुत्रो लोकनाथो महागजः ।
मातङ्गास्त्वथ मातङ्ग्या अपत्यं मनुजर्षभ ॥ २५ ॥

गोलांगूलांश्च शार्दूली व्याघ्रांश्चाजनयत्सुतान् ।
दिशागजांश्च काकुत्स्थ श्वेताऽप्यजनयत्सुतान् ॥ २६ ॥

ततो दुहितरौ राम सुरभिर्द्वे व्यजायत ।
रोहिणीं नाम भद्रं ते गन्धर्वीं च यशस्विनीं ॥ २७ ॥

रोहिण्यजनयद्वा वै गन्धर्वीं वाजिनस्सुतान् ।
सुरसाऽजनयन्नागान्त्राम कद्रूस्तु पन्नगान् ॥ २८ ॥

मनुर्मनुष्यान्जनयत्पुत्रान्यशस्विनः ।
ब्राह्मणान् क्षत्रियान्वैश्याञ्च्छूद्रांश्च मनुजर्षभ ॥ २९ ॥

मुखतो ब्राह्मणा जाता
बाहुभ्यां क्षत्रियास्तथा
ऊरुभ्यां जज्ञिरेवैश्याः
पद्भ्यां शूद्रा इति श्रुतिः ॥ ३० ॥

सर्वान्पुण्यफलान्वृक्षाननलाऽपि व्यजायत ।
जज्ञे राम महाबाहो तांश्च सर्वान्महीरुहान् ॥ ३१ ॥

विनता तु शुकीपौत्री कद्रूश्च सुरसास्वसा ।
कद्रूर्नागं सहस्राक्षं विजज्ञे धरणीधरम् ॥ ३२ ॥

द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च ।
तस्माज्जातोऽहमरुणात्सम्पातिस्तु ममाग्रजः ।
जटायुरिति मां विद्धि श्येनीपुत्रमरिन्दम ॥ ३३ ॥

सोऽहं राम सहायस्ते भविष्यामि यदीच्छसि ।
इदं दुर्गं हि कान्तारं मृगराक्षससेवितम् ॥ ३४ ॥

सीतां च तात रक्षिष्ये त्वयि याते सलक्ष्मणे ॥ ३५ ॥

जटायुषं तु प्रतिपूज्य राघवो
मुदा परिष्वज्य च सन्ननोऽभवत् ।
पितुर्हि शुश्राव सखित्वमात्मवान्
जटायुषा संकथितं पुनः पुनः ॥ ३६ ॥

स तत्र सीतां परिदाय मैथिलीं
सहैव तेनातिबलेन पक्षिणा ।
जगाम तां पश्चवटीं सलक्ष्मणो
रिपून्दिधक्षन् शलभानिवानलः ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे चतुर्दशः सर्गः ॥

पञ्चदशः सर्गः

पर्णशालानिर्माणम् ॥

ततः पञ्चवटीं गत्वा नानाव्यालमृगायुताम् ।
उवाच भ्रातरं रामस्सौमित्रिं दीप्ततेजसम् ॥ १ ॥

आगताः स्म यथोद्दिष्टमगस्त्येन महर्षिणा ।
अयं पञ्चवटीदेशस्सौम्य पुष्पितपादपः ॥ २ ॥

सर्वतश्चार्यतां दृष्टिः काननेषु निपुणो ह्यसि ।
आश्रमः कतरस्मिन्नो देशे भवति संमतः ॥ ३ ॥

रमते यत्र वैदेही त्वमहं चैव लक्ष्मण ।
तादृशो दृश्यतां देशस्सन्निकृष्टजलाशयः ॥ ४ ॥

वनरामण्यकं यत्र जलरामण्यकं तथा ।
सन्निकृष्टं च यत्र स्यात् समित्पुष्पकुशोदकम् ॥ ५ ॥

एवमुक्तस्तु रामेण लक्ष्मणस्संयताञ्जलिः
सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीत् ॥ ६ ॥

परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते ।
स्वयं तु रुचिरे देशे क्रियतामिति मां वद ॥ ७ ॥

सुप्रीतस्तेन वाक्येन लक्ष्मणस्य महाद्युतिः ।
विमृशन्नुचयामास देशं सर्वगुणान्वितम् ॥ ८ ॥

स तं रुचिरमाक्रम्य देशमाश्रमकर्मणि ।
हस्ते गृहीत्वा हस्तेन रामस्सौमित्रिमब्रवीत् ॥ ९ ॥

अयं देशस्समः श्रीमान् पुष्पितैस्तरुभिर्वृतः ।
इहाश्रमपदं सौम्य यथावत्कर्तुमर्हसि ॥ १० ॥

इयमादित्यसङ्काशैः पद्मैस्सुरभिगन्धिभिः ।
अदूरे दृश्यते रम्या पद्मिनी पद्मसेविता ॥ ११ ॥

यथाऽऽख्यातमगस्त्येन मुनिना भावितात्मना ।
इयं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता ॥ १२ ॥

हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ॥ १३ ॥

नातिदूरेण चासन्ने मृगयूथावपीडिताः ।
मयूरनादिता रम्याः प्रांशवो बहुकन्दराः ॥ १४ ॥

दृश्यन्ते गिरयस्सौम्य पुष्पितैस्तरुभिर्वृताः ॥ १५ ॥

सौवर्णैः राजतैस्ताम्रैर्देशे देशे च धातुभिः ।
गवाक्षिता इवाभान्ति गजाः परमभक्तिभिः ॥ १६ ॥

सालैस्तालैस्तमालैश्च खर्जूरपनसाम्रकैः ।
निवारैस्तिमिशैश्चैव पुन्नागैश्चोपशोभितः ॥ १७ ॥

चूतैरशोकैस्तिलकैश्चम्पकैः केतकैरपि ।
पुष्पगुल्मलतोपेतैस्तैस्तैस्तरुभिरावृताः ॥ १८ ॥

चन्दनैः स्पन्दनैर्नीपैः पर्णासैर्लिकुचैरपि ।
धवाश्वकर्णखदिरैश्शमी किंशुकपाटलैः ॥ १९ ॥

इदं पुण्यमिदं मेध्यमिदं बहुमृगद्विजम् ।
इह वत्स्यामि सौमित्रे सार्धमेतेन पक्षिणा ॥ २० ॥

एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा ।
अचिरेणाश्रमं भ्रातुश्चकार सुमहाबलः ॥ २१ ॥

पर्णशालां सुविपुलां तत्र सङ्घातमृत्तिकाम् ।
सुस्तम्भां मस्करैर्दीर्घैः कृतवंशां सुशोभनाम् ॥ २२ ॥

शमीशाखाभिरास्तीर्यं दृढपाशावपाशिताम् ।
कुशकाशशरैः पर्णैस्सुपरिच्छादितां तथा ॥ २३ ॥

समीकृततलां रम्यां चकार लघुविक्रमः ।
निवासं राघवस्यार्थे प्रेक्षणीयमनुत्तमम् ॥ २४ ॥

स गत्वा लक्ष्मणः श्रीमान्नदीं गोदावरीं तदा ।
स्नात्वा पद्मानि चादाय सफलः पुनरागतः ॥ २५ ॥

ततः पुष्पबलिं कृत्वा शान्तिं च स यथाविधि ।
दर्शयामास रामाय तदाश्रमपदं कृतम् ॥ २६ ॥

स तं दृष्ट्वा कृतं सौम्यमाश्रमं सह सीतया ।
राघवः पर्णशालायां हर्षमाहारयत्परम् ॥ २७ ॥

स संहृष्टः परिष्वज्य बाहुभ्यां लक्ष्मणं तदा ।
अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत् ॥ २८ ॥

प्रीतोऽस्मि ते महत्कर्म त्वया कृतमरिन्दम ।
प्रदेयो यन्निमित्तं ते परिष्वङ्गो मया कृतः ॥ २९ ॥

भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण ।
त्वया पुत्रेण धर्मात्मा न संवृत्तः पिता मम ॥ ३० ॥

एवं लक्ष्मणमुक्त्वा तु राघवो लक्ष्मिवर्द्धनः ।
तस्मिन्देशे बहुफले न्यवसत्सुसुखं सुखी ॥ ३१ ॥

कञ्चित्कालं स धर्मात्मा सीतया लक्ष्मणेन च ।
अन्वास्यमानो न्यवसत् स्वर्गलोके यथाऽमरः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे पञ्चदशः सर्गः ॥

आदितः श्लोकाः ७२९८ आरण्यकाण्डे आदितः श्लोकाः ५८६

षोडशः सर्गः

हेमन्तर्तुवर्णनम् ॥

वसतस्तस्य तु सुखं राघवस्य महात्मनः ।
शरद्व्यपाये हेमन्त ऋतुरिष्टः प्रवर्तते ॥ १ ॥

स कदाचित्प्रभातायां शर्वर्यां रघुनन्दनः ।
प्रययावभिषेकार्थं रम्यां गोदावरीं नदीम् ॥ २ ॥

प्रहः कलशहस्तस्तं सीतया सह वीर्यवान् ।
पृष्ठतोऽनुव्रजन् भ्राता सौमित्रिरिदमब्रवीत् ॥ ३ ॥

अयं स कालस्संप्राप्तः प्रियो यस्ते प्रियंवद ।
अलङ्कृत इवाभाति येन संवत्सरः शुभः ॥ ४ ॥

नीहारपरुषो लोकः पृथिवी सस्यमालिनी ।
जलान्यनुपभोग्यानि सुभगो हव्यवाहनः ॥ ५ ॥

नवाग्रयणपूजाभिरभ्यर्च्य पितृदेवताः ।
कृताग्रयणकाः काले सन्तो विगतकल्मषाः ॥ ६ ॥

प्राज्यकामा जनपदास्सम्पन्नतरगोरसाः ।
विचरन्ति महीपाला यात्रास्था विजिगीषवः ॥ ७ ॥

सेवमाने दृढं सूर्ये दिशमन्तकसेविताम् ।
विहीनतिलकेव स्त्री नोत्तरा दिक् प्रकाशते ॥ ८ ॥

प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च साम्प्रतम् ।
यथार्थनामा सुव्यक्तं हिमवान् हिमवान् गिरिः ॥ ९ ॥

अत्यन्तसुखसञ्चारा मध्याह्ने स्पर्शतस्सुखाः ।
दिवसास्सुभगादित्याश्छायासलिलदुर्भगाः ॥ १० ॥

मृदुसूर्यास्सनीहाराः
पटुशीतास्समारुताः ।
शून्यारण्या हिमध्वस्ता
दिवसा भान्ति साम्प्रतम् ॥ ११ ॥

निवृत्ताकाशशयनाः पुष्यनीता हिमारुणाः ।
शीताः वृद्धतरायामास्त्रियामा यान्ति साम्प्रतम् ॥ १२ ॥

रविसंक्रान्तसौभाग्यस्तुषारारुणमण्डलः ।
निश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥ १३ ॥

ज्योत्स्ना तुषारमलिना पौर्णमास्यां न राजते ।
सीतेव चातपश्यामा लक्ष्यते न तु शोभते ॥ १४ ॥

प्रकृत्या शीतलस्पर्शो हिमविद्धश्च साम्प्रतम् ।
प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः ॥ १५ ॥

बाष्पच्छन्नान्यरण्यानि यवगोधूमवन्ति च ।
शोभन्तेऽभ्युदिते सूर्ये नदद्भिः क्रौञ्चसारसैः ॥ १६ ॥

खर्जूरपुष्पाकृतिभिश्शिरोभिः पूर्णतण्डुलैः ।
शोभन्ते किञ्चिदानम्राश्शालयः कनकप्रभाः ॥ १७ ॥

निमग्नाः कर्णिकाग्रेषु शूकैः कनकपिङ्गलैः ।
गन्धान् केदारपद्मानां जिघ्रन्ति वनशालयः ॥ १८ ॥

मयूखैरुपसर्पद्भिर्हिमनीहारसंवृतैः ।
दूरमभ्युदितस्सूर्यश्शशाङ्क इव लक्ष्यते ॥ १९ ॥

अग्राह्यवीर्यः पूर्वाह्णे मध्याह्ने स्पर्शतस्सुखः ।
संरक्तः किञ्चिदापाण्डुरातपश्शोभते क्षितौ ॥ २० ॥

अवश्यायनिपातेन किञ्चित्प्लक्किन्नशाद्वला ।
वनानां शोभते भूमिर्निविष्टतरुणातपा ॥ २१ ॥

संस्पृशन्विपुलं शीतमुदकं द्विरदस्सुखम् ।
अत्यर्थं तृषितो वन्यः प्रतिसंहरते करम् ॥ २२ ॥

एते हि सम्युपासीना विहगा जलचारिणः ।
न विगाहन्ति सलिलमप्रगल्भा इवाहवम् ॥ २३ ॥

अवश्यायतमोनद्धा नीहारतमसा वृताः ।
प्रसुप्ता इव लक्ष्यन्ते विपुष्पा वनराजयः ॥ २४ ॥

बाष्पसंछन्नसलिला रुतविज्ञेयसारसाः ।
हिमार्द्रवालुकैस्तीरैस्सरितो भान्ति साम्प्रतम् ॥ २५ ॥

तुषारपतनाच्चैव मृदुत्वाद्भास्करस्य च ।
शैत्यादग्राह्यमप्याशु प्रायेण रसवज्जलम् ॥ २६ ॥

जराजर्जरितैः पर्णैश्शीर्णकेसरकर्णिकैः ।
नालशेषैर्हिमध्वस्तैर्न भान्ति कमलाकराः ॥ २७ ॥

अस्मिंस्तु पुरुषव्याघ्रः काले दुःखसमन्वितः ।
तपश्चरति धर्मात्मा त्वद्भक्त्या भरतः पुरे ॥ २८ ॥

त्यक्त्वा राज्यं च मानं च भोगांश्च विविधान् बहून् ।
तपस्वी नियताहारश्शेते शीते महीतले ॥ २९ ॥

सोऽपि वेलामिमां नूनमभिषेकार्थमुद्यतः ।
वृतः प्रकृतिभिर्नित्यं प्रयाति सरयूं नदीम् ॥ ३० ॥

अल्पसारो वृद्धः सुकुमारो हिमार्दितः ।
कथं त्वपररात्रेषु सरयूमवगाहते ॥ ३१ ॥

पद्मपत्रेक्षणः श्यामः श्रीमान् निरुदरो महान् ।
धर्मज्ञः सत्यवादी च ह्रीनिषेधो जितेन्द्रियः ॥ ३२ ॥

प्रियाभिभाषी मधुरो दीर्घबाहुरिन्दमः ।
सन्त्यज्य विविधान् भोगानार्यं सर्वात्मना श्रितः ॥ ३३ ॥

जितः स्वर्गस्तव भ्राता भरतेन महात्मना ।
वनस्थमपि तापस्ये यस्त्वामनुविधीयते ॥ ३४ ॥

न पित्र्यमनुवर्तन्ते मातृकं द्विपदा इति ।
ख्यातो लोकप्रवादोऽयं भरतेनान्यथा कृतः ॥ ३५ ॥

भर्ता दशरथो यस्यास्साधुश्च भरतस्सुतः ।
कथं नु साऽम्बा कैकेयी तादृशी क्रूरदर्शिनी ॥ ३६ ॥

इत्येवं लक्ष्मणे वाक्यं स्नेहाद्भुवति धार्मिके ।
परिवादं जनन्यास्तमसहन्राघवोऽब्रवीत् ॥ ३७ ॥

न तेऽम्बा मध्यमा तात गर्हितव्या कथञ्चन ।
तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुरु ॥ ३८ ॥

निश्चिताऽपि हि मे बुद्धिर्वनवासे दृढव्रता ।
भरतस्नेहसन्तप्ता बालिशीक्रियते पुनः ॥ ३९ ॥

संस्मराम्यस्य वाक्यानि प्रियाणि मधुराणि च ।
हृद्यान्यमृतकल्पानि मनःप्रह्लादनानि च ॥ ४० ॥

कदा ह्यहं समेष्यामि भरतेन महात्मना ।
शत्रुघ्नेन च वीरेण त्वया च रघुनन्दन ॥ ४१ ॥

इत्येवं विलपंस्तत्र प्राप्य गोदावरीं नदीम् ।
चक्रेऽभिषेकं काकुत्स्थस्सानुजस्सह सीतया ॥ ४२ ॥

तर्पयित्वाऽथ सलिलैस्ते पितॄन्देवता अपि ।
स्तुवन्ति स्मोदितं सूर्यं देवताश्च समाहिताः ॥ ४३ ॥

कृताभिषेकः स रराज रामः
सीता द्वितीयः सहलक्ष्मणेन ।
कृताभिषेकस्त्वगराजपुत्र्या
रुद्रस्सनन्दी भगवानिवेशः ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे षोडशः सर्गः ॥

सप्तदशः सर्गः ॥

शूर्पणखागमनम् ।

कृताभिषेको रामस्तु सीता सौमित्रिरेव च ।
तस्माद्गोदावरीतीरात्ततो जग्मुस्स्वमाश्रमम् ॥ १ ॥

आश्रमं तमुपागम्य राघवस्सह लक्ष्मणः ।
कृत्वा पौर्वाह्णिकं कर्म पर्णशालामुपागमत् ॥ २ ॥

उवास सुखितस्तत्र पूज्यमानो महर्षिभिः ।
लक्ष्मणेन सह भ्रात्रा चकार विविधाः कथाः ॥ ३ ॥

स रामः पर्णशालायामासीनस्सह सीतया ।
विरराज महाबाहुश्चित्रया चन्द्रमा इव ॥ ४ ॥

तथाऽऽसीनस्य रामस्य कथासंसक्तचेतसः ।
तं देशं राक्षसी काचिदाजगाम यदृच्छया ॥ ५ ॥

सा तु शूर्पणखा नाम दशग्रीवस्य रक्षसः ।
भगिनी राममासाद्य ददर्श त्रिदशोपमम् ॥ ६ ॥

सिंहोरस्कं महाबाहुं पद्मपत्रनिभेक्षणम् ।
आजानुबाहुं दीप्तास्यमतीव प्रियदर्शनम् ॥ ७ ॥

गजविक्रान्तगमनं जटामण्डलधारिणम् ।
सुकुमारं महासत्त्वं पार्थिवव्यञ्जनान्वितम् ॥ ८ ॥

राममिन्दीवरश्यामं कन्दर्पसदृशप्रभम् ।
बभूवेन्द्रोपमं दृष्ट्वा राक्षसी काममोहिता ॥ ९ ॥

सुमुखं दुर्मुखी रामं वृत्तमध्यं महोदरी ।
विशालाक्षं विरूपाक्षी सुकेशं ताम्रमूर्धजा ॥ १० ॥

प्रीतिरूपं विरूपा सा सुस्वरं भैरवस्वरा ।
तरुणं दारुणा वृद्धा दक्षिणं वामभाषिणी ॥ ११ ॥

न्यायवृत्तं सुदुर्वृत्ता प्रियमप्रियदर्शना ।
शरीरजसमाविष्टा राक्षसी राममब्रवीत् ॥ १२ ॥

जटी तापसरूपेण सभार्यश्शरचापधृत् ।
आगतस्त्वमिमं देशं कथं राक्षससेवितम् ।
किमागमनकार्यं ते तत्त्वमाख्यातुमर्हसि ॥ १३ ॥

एवमुक्तस्तु राक्षस्या शूर्पणख्या परन्तपः ।
ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे ॥ १४ ॥

अनृतं न हि रामस्य कदाचिदपि संमतम् ।
विशेषेणाऽश्रमस्थस्य समीपे स्त्रीजनस्य च ॥ १५ ॥

आसीद्दशरथो नाम राजा त्रिदशविक्रमः ।
तस्याऽहमग्रजः पुत्रो रामो नाम जनैः श्रुतः ॥ १६ ॥

भ्राताऽयं लक्ष्मणो नाम यवीयान्मामनुव्रतः ।
इयं भार्या च वैदेही मम सीतेति विश्रुता ॥ १७ ॥

नियोगात्तु नरेन्द्रस्य पितुर्मातुश्च यन्त्रितः ।
धर्मार्थं धर्मकांक्षी च वनं वस्तुमिहागतः ॥ १८ ॥

त्वां तु वेदितुमिच्छामि कथ्यतां काऽसि कस्य वा ॥

न हि तावन्मनोज्ञाङ्गी राक्षसी प्रतिभासि मे ।
इह वा किन्निमित्तं त्वमागता ब्रूहि तत्त्वतः ॥ २० ॥

साऽब्रवीद्वचनं श्रुत्वा राक्षसी मदनातुरा ।
श्रूयतां राम वक्ष्यामि तत्त्वार्थं वचनं मम ॥ २१ ॥

अहं शूर्पणखा नाम राक्षसी कामरूपिणी ।
अरण्यं विचरामीदमेका सर्वभयङ्करा ॥ २२ ॥

रावणो नाम मे भ्राता राक्षसो राक्षसाधिपः ।
वीरो विश्रवसः पुत्रो यदि ते श्रोत्रमागतः ॥ २३ ॥

प्रबुद्धनिद्रश्च तथा कुम्भकर्णो महाबलः ।
विभीषणश्च धर्मात्मा न तु राक्षसचेष्टितः ॥ २४ ॥

प्रख्यातवीर्यौ च रणे भ्रातरौ खरदूषणौ ।
तानहं समतिक्रान्ता राम त्वा पूर्वदर्शनात् ॥ २५ ॥

समुपेताऽस्मि भावेन भर्तारं पुरुषोत्तमम् ॥ २६ ॥

अहं प्रभावसम्पन्ना स्वच्छन्दगामिनी ।
चिराय भव मे भर्ता सीतया किं करिष्यसि ॥ २७ ॥

विकृता च विरूपा च न चेयं सदृशी तव ।
अहमेवाऽनुरूपा ते भार्यारूपेण पश्य माम् ॥ २८ ॥

इमां विरूपामसतीं करालां निर्णतोदरीम् ।
अनेन सह ते भ्रात्रा भक्षयिष्यामि मानुषीम् ॥ २९ ॥


ततः पर्वतशृङ्गाणि वनानि विविधानि च ।
पश्यन् सह मया कामी दण्डकान्विचरिष्यसि ॥ ३० ॥

इत्येवमुक्त्वा काकुत्स्थं प्रहस्य मदिरेक्षणा ।
देवी लक्ष्मणमध्ये तु बभूवावस्थिता पुनः ॥ ३१ ॥

संप्रहासनिमित्तं तु रामश्शूर्पणखां ततः ।
इदं वचनमारेभे वक्तुं वाक्यविशारदः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे सप्तदशः सर्गः ॥

आदितः श्लोकाः ७३३० आरण्यकाण्डे आदितः श्लोकाः ६१८



अष्टादशः सर्गः ॥

शूर्पणखायाः कर्णनासाच्छेदनम् ।

तां तु शूर्पणखां रामः कामपाशावपाशिताम् ।
स्वच्छया श्लक्ष्णया वाचा स्मितपूर्वमथाब्रवीत् ॥ १ ॥

कृतदारोऽस्मि भवति भार्येयं दयिता मम ।
त्वद्विधानां तु नारीणां सुदुःखा ससपत्नता ॥ २ ॥

अजस्त्वेष मे भ्राता शीलवान्प्रियदर्शनः ।
श्रीमानकृतदारश्च लक्ष्मणो नाम वीर्यवान् ॥ ३ ॥

अपूर्वी भार्यया चार्यी तरुणः प्रियदर्शनः ।
अनुरूपश्च ते भर्ता रूपस्यास्य भविष्यति ॥ ४ ॥

एनं भज विशालाक्षि भर्तारं भ्रातरं मम ।
असपत्ना वरारोहे मेरुमर्कप्रभा यथा ॥ ५ ॥

इति रामेण सा प्रोक्ता राक्षसी काममोहिता ।
विसृज्य रामं सहसा ततो लक्ष्मणमब्रवीत् ॥ ६ ॥

अस्य रूपस्य ते युक्ता भार्याऽहं वरवर्णिनी ।
मया सह सुखं सर्वान्दण्डकान्विचरिष्यसि ॥ ७ ॥

एवमुक्तस्तु सौमित्री राक्षस्या वाक्यकोविदः ।
ततः शूर्पणखां स्मित्वा लक्ष्मणो वाक्यमब्रवीत् ॥ ८ ॥

कथं दासस्य मे दासी भार्या भवितुमिच्छसि ।
सोऽहमार्येण परवान् भ्रात्रा कमलवर्णिनि ॥ ९ ॥

समृद्धार्थस्य सिद्धार्था मुदिता कामरूपिणी ।
आर्यस्य त्वं विशालाक्षि भार्या भव यवीयसी ॥ १० ॥

एनां विरूपामसतीं करालां निर्णतोदरीम् ।
भार्यां वृद्धां परित्यज्य त्वामेवैष भजिष्यति ॥ ११ ॥

कोऽहि रूपमिदं श्रेष्ठं सन्त्यज्य वरवर्णिनि ।
मानुषीषु वरारोहे कुर्याद्भावं विचक्षणः ॥ १२ ॥

इति सा लक्ष्मणेनोक्ता कराला निर्णतोदरी ।
मन्यते तद्वचस्तथ्यं परिहासाविचक्षणा ॥ १३ ॥

सा रामं पर्णशालायामुपविष्टं परन्तपम् ।
सीतया सह दुर्धर्षमब्रवीत्काममोहिता ॥ १४ ॥

इमां विरूपामसतीं करालां निर्णतोदरीम् ।
वृद्धां भार्यामवष्टभ्य मां त्वं न बहुमन्यसे ॥ १५ ॥

अद्येमांभक्षयिष्यामि पश्यतस्तव मानुषीम् ।
त्वया सह चरिष्यामि निःसपत्ना यथासुखम् ॥ १६ ॥

इत्युक्त्वा मृगशाबाक्षीमलातसदृशेक्षणा ।
अभ्यधावत्सुसङ्क्रुद्धा महोल्का रोहिणीमिव ॥ १७ ॥

तां मृत्युपाशप्रतिमामापतन्तीं महाबलः ।
निगृह्य रामः कुपितस्ततो लक्ष्मणमब्रवीत् ॥ १८ ॥

क्रूरैरनार्यैस्सौमित्रे परिहासः कथञ्चन ।
न कार्यः पश्य वैदेहीं कथञ्चित्सौम्य जीवतीम् ॥ १९ ॥

इमां विरूपामसतीमतिमत्तां महोदरीम् ।
राक्षसीं पुरुषव्याघ्र विरूपयितुमर्हसि ॥ २० ॥

इत्युक्तो लक्ष्मणस्तस्याः क्रुद्धो रामस्यपश्यतः ।
उद्धृत्य खड्गं चिच्छेद कर्णनासं महाबलः ॥ २१ ॥

विकृत्तकर्णनासा तु विस्वरं सा विनद्य च ।
यथागतं प्रदुद्राव घोरा शूर्पणखा वनम् ॥ २२ ॥

सा विरूपा महाघोरा राक्षसी शोणितोक्षिता ।
ननाद विविधान्नादान् यथा प्रावृषि तोयदः ॥ २३ ॥

सा विक्षरन्ती रुधिरं बहुधा घोरदर्शना ।
प्रगृह्य बाहू गर्जन्ती प्रविवेश महावनम् ॥ २४ ॥

ततस्तु सा राक्षससङ्घसंवृतं
खरं जनस्थानगतं विरूपिता ।
उपेत्य तं भ्रातरमुग्रदर्शनं
पपात भूमौ गगनाद्यथाऽशनिः ॥ २५ ॥

ततः सभार्यं भयमोहमूर्च्छिता
सलक्ष्मणं राघवमागतं वनम् ।
विरूपणं चात्मनि शोणितोक्षिता
शशंस सर्वं भगिनी खरस्य सा ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे अष्टादशः सर्गः ॥

एकोनविंशः सर्गः

खरसमीपे अङ्गवैरूप्यकथनम् ॥

तां तथा पतितां दृष्ट्वा विरूपां शोणितोक्षिताम् ।
भगिनीं क्रोधसन्तप्तः खरः पप्रच्छ राक्षसः ॥ १ ॥

उत्तिष्ठ तावदाख्याहि प्रमोहं जहि सम्भ्रमम् ।
व्यक्तमाख्याहि केन त्वमेवंरूपा विरूपिता ॥ २ ॥

कः कृष्णसर्पमासीनमाशीविषमनागसम् ।
तुदत्यभिसमापन्नमङ्गुल्यग्रेण लीलया ॥ ३ ॥

कः कालपाशमासज्य कण्ठे मोहान्न बुध्यते ।
यस्त्वामद्य समासाद्य पीतवान्विषमुत्तमम् ॥ ४ ॥

बलविक्रमसम्पन्ना कामगा कामरूपिणी ।
इमामवस्थां नीता त्वं केनान्तकसमा मता ॥ ५ ॥

देवगन्धर्वभूतानामृषीणां च महात्मनाम् ।
कोऽयमेवं महावीर्यस्त्वां विरूपां चकार ह ॥ ६ ॥

न हि पश्याम्यहं लोके यः कुर्यान्मम विप्रियम् ।
अमरेषु सहस्राक्षं महेन्द्रं पाकशासनम् ॥ ७ ॥

अद्याहं मार्गणैः प्राणानादास्ये जीवितान्तकैः ।
सलिले क्षीरमासक्तं निष्पिबन्निव सारसः ॥ ८ ॥

निहतस्य मया सङ्ख्ये शरसङ्कृत्तमर्मणः ।
सफेनं रुधिरं रक्तं मेदिनी कस्य पास्यति ॥ ९ ॥

करय पत्ररथाः कायान्मांसमुत्कृत्य सङ्गताः ।
प्रहृष्टा भक्षयिष्यन्ति निहतस्य मया रणे ॥ १० ॥
तं न देवा न गन्धर्वा न पिशाचा न राक्षसाः ।
मयाऽपकृष्टं कृपणं शक्तास्त्रातुं महाहवे ॥ ११ ॥
उपलभ्य शनैस्संज्ञां तं मे शंसितुमर्हसि ।
येन त्वं दुर्विनीतेन वने विक्रम्य निर्जिता ॥ १२ ॥
इति भ्रातुर्वचः श्रुत्वा क्रुद्धस्य च विशेषतः ।
ततश्शूर्पणखा वाक्यं सबाष्पमिदमब्रवीत् ॥ १३ ॥
तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥ १४ ॥
फलमूलाशनौ दान्तौ तापसौ धर्मचारिणौ ।
पुत्रौ दशरथस्यास्तां भ्रातरौ रामलक्ष्मणौ ॥ १५ ॥
शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् ॥ १६ ॥
गन्धर्वराजप्रतिमौ पार्थिवव्यञ्जनान्वितौ ।
देवौ वा मानुषौ वा तौ न [illegible] ॥ १७ ॥
तरुणी रूपसम्पन्ना सर्वाभरणभूषिता ।
दृष्टा तत्र मया नारी तयोर्मध्ये सुमध्यमा ॥ १८ ॥
ताभ्यामुभाभ्यां सम्भूय प्रमदामधिकृत्य ताम् ।
इमामवस्थां नीताऽहं यथाऽनाथाऽसती तथा ॥ १९ ॥
तस्याश्चानृजुवृत्तायास्तयोश्च हतयोरहम् ।
सपत्नं पातुमिच्छामि रुधिरं रणमूर्धनि ॥ २० ॥

एष मे प्रथमः कामः कृतस्तात त्वया भवेत् ।
तस्यास्तयोश्च रुधिरं पिबेयमहमाहवे ॥ २१ ॥
इति तस्यां ब्रुवाणायां चतुर्दश महाबलान् ।
व्यादिदेश खरः क्रुद्धो राक्षसानन्तकोपमान् ॥ २२ ॥
मानुषौ शस्त्रसम्पन्नौ चीरकृष्णाजिनाम्बरौ ।
प्रविष्टौ दण्डकारण्यं घोरं प्रमदया सह ॥ २३ ॥
तौ हत्वा तां च दुर्वृत्तामपावर्तितुमर्हथ ।
इयं च रुधिरं तेषां भगिनी मम पास्यति ॥ २४ ॥
मनोरथोऽयमिष्टोऽस्या भगिन्या मम राक्षसाः ।
शीघ्रं सम्पाद्यतां गत्वा तौ प्रमथ्य स्वतेजसा ॥ २५ ॥
युष्माभिर्निहतौ दृष्ट्वा तावुभौ भ्रातरौ रणे ।
इयं प्रहृष्टा मुदिता रुधिरं युधि पास्यति ॥ २६ ॥
इति प्रतिसमादिष्टा राक्षसास्ते चतुर्दश ।
तत्र जग्मुस्तया सार्धं घना वातेरिता यथा ॥ २७ ॥

ततस्तु ते तं सुमुदग्रतेजसं
तथा सुतीक्ष्णप्रदराश्च राक्षसाः ।
दुरासदं धर्षयितुं न चाशकन्
वनद्विपा दीप्तमिवाग्निमुद्धतम् ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकोनविंशः सर्गः ॥

विंशः सर्गः

चतुर्दशराक्षसवधः ॥

ततः शूर्पणखा घोरा राघवाश्रममागता ।
रक्षसामाचचक्षे तौ भ्रातरौ सह सीतया ॥ १ ॥

ते रामं पर्णशालायामुपविष्टं महाबलम् ।
दृष्ट्वासीतया सार्धं वैदेह्या लक्ष्मणेन च ॥ २ ॥

तान्दृष्ट्वा राघवः श्रीमानागतां तां च राक्षसीम् ।
अब्रवीद्भ्रातरं रामो लक्ष्मणं दीप्ततेजसम् ॥ ३ ॥

मुहूर्तं भव सौमित्रे सीतायाः प्रत्यनन्तरः ।
इमान्यस्या वधिष्यामि पदवीमागतानिह ॥ ४ ॥

वाक्यमेतत्ततः श्रुत्वा रामस्य विदितात्मनः ।
तथेति लक्ष्मणो वाक्यं रामस्य प्रत्यपूजयत् ॥ ५ ॥

राघवोऽपि महच्चापं चामीकरविभूषितम् ।
चकार सज्यं धर्मात्मा तानि रक्षांसि चाब्रवीत् ॥ ६ ॥

पुत्रौ दशरथस्तावां भ्रातरौ रामलक्ष्मणौ ।
प्रविष्टौ सीतया सार्धं दुश्चरं दण्डकावनम् ॥ ७ ॥

फलमूलाशनौ दान्तौ तापसौ धर्मचारिणौ ।
वसन्तौ दण्डकारण्ये किमर्थमुपहिंसथ ॥ ८ ॥

युष्मान् पापात्मकान् हन्तुं विप्रकारान्महाहवे ।
ऋषीणां तु नियोगेन प्राप्तोऽहं सशरायुधः ॥ ९ ॥

तिष्ठतैवात्र सन्तुष्टा नोपावर्तितुमर्हथ ।
यदि प्राणैरिहार्थो वा निवर्तध्वं निशाचराः ॥ १० ॥

तस्य तद्वचनं श्रुत्वा राक्षसास्ते चतुर्दश ।
ऊचुर्वाचं सुसङ्क्रुद्धा ब्रह्मघ्नाश्शूलपाणयः ॥ ११ ॥

संरक्तनयना घोरा रामं रक्तान्तलोचनम् ।
परुषा मधुरभाषं हृष्टा दृष्टपराक्रमम् ॥ १२ ॥

क्रोधमुत्पाद्य नो भर्तुः खरस्य सुमहात्मनः ।
त्वमेव ह्यस्यसे प्राणानद्यास्माभिर्हतो युधि ॥ १३ ॥

का हि ते शक्तिरेकस्य बहूनां रणमूर्धनि ।
अस्माकमग्रतः स्थातुं किं पुनर्योद्धुमाहवे ॥ १४ ॥

एभिर्बाहुविमुक्तैर्नः परिघैश्शूलपट्टसैः ।
प्राणांस्त्यक्ष्यसि वीर्यं च धनुश्च करपीडितम् ॥ १५ ॥

इत्येवमुक्त्वा संरब्धा राक्षसास्ते चतुर्दश ।
चिक्षिपुस्तानि शूलानि राघवं प्रति दुर्जयम् ॥ १६ ॥

तानि शूलानि काकुत्स्थस्समस्तानि चतुर्दश ।
तावद्भिरेव चिच्छेद शरैः काञ्चनभूषितैः ॥ १७ ॥

ततः पश्चान्महातेजा नाराचान् सूर्यसन्निभान् ।
जग्राह परमक्रुद्धश्चतुर्दश शिलाशितान् ॥ १८ ॥

गृहीत्वा धनुरायम्य लक्ष्यानुद्दिश्य राक्षसान् ।
मुमोच राघवो बाणान् वज्रानिव शतक्रतुः ॥ १९ ॥

रुक्मपुङ्खाश्च विशिखाः प्रदीप्ता हेमभूषणाः ॥ २० ॥
ते भित्त्वा रक्षसां वेगाद्वक्षांसि रुधिराप्लुताः ।
विनिष्पेतुस्तदा भूमौ न्यमज्जन्ताशनिस्वनाः ॥ २१ ॥
तैर्भिन्नहृदया भूमौ छिन्नमूला इव द्रुमाः ।
निपेतुश्शोणितस्नाता विकृता विगतासवः ॥ २२ ॥
तान् भूमौ पतितान् दृष्ट्वा राक्षसी क्रोधमूर्च्छिता ।
परित्रस्ता पुनस्तत्र व्यसृजद्भैरवस्वनान् ॥ २३ ॥
सा नदन्ती महानादं जवाच्छूर्पणखा पुनः ॥ २४ ॥
उपगम्य खरं सा तु किञ्चित्संशुष्कशोणिता ।
पपात पुनरेवार्ता सनिर्यासेव वल्लरी ॥ २५ ॥
भ्रातुस्समीपे शोकार्ता ससर्ज निनदं मुहुः ।
भूमौ शयाना दुःखार्ता लब्धसंज्ञा चिरात्पुनः ॥
सस्वरं मुमुचे बाष्पं विषण्णवदना तदा ॥ २६ ॥

निपातितान् प्रेक्ष्य रणे तु राक्षसान्
प्रधाविता शूर्पणखा पुनस्ततः ।
वधं च तेषां निखिलेन रक्षसां
शशंस सर्वं भगिनी खरस्य सा ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे विंशः सर्गः ॥

एकविंशः सर्गः

खराय राक्षसवधकथनम् ॥

स पुनः पतितां दृष्ट्वा क्रोधाच्छूर्पणखां खरः ।
उवाच व्यक्तया वाचा तामनर्थार्थमागताम् ॥ १ ॥

मया त्विदानीं शूरास्ते राक्षसा रुधिराशनाः ।
त्वत्प्रियार्थं विनिर्दिष्टाः किमर्थं रुद्यते पुनः ॥ २ ॥

भक्ताश्चैवानुरक्ताश्च हिताश्च मम नित्यशः ।
हन्यमाना न हन्यन्ते न न कुर्युर्वचो मम ॥ ३ ॥

किमेतच्छ्रोतुमिच्छामि कारणं यत्कृते पुनः ।
हा नाथेति विनर्दन्ती सर्पवद्वेष्टसे क्षितौ ॥ ४ ॥

अनाथवद्विलपसि किं नु नाथे मयि स्थिते ।
उत्तिष्ठोत्तिष्ठ मामेवं वैक्लब्यं त्यज्यतामिह ॥ ५ ॥

सा त्वेवमुक्ता दुर्धर्षा खरेण परिसान्त्विता ।
विमृज्य नयने सास्रे खरं भ्रातरमब्रवीत् ॥ ६ ॥

अस्मीदानीमहं प्राप्ता हृतश्रवणनासिका ।
शोणितौघपरिक्लिन्ना त्वया च परिसान्त्विता ॥ ७ ॥

प्रेषिताश्च त्वया शूरा राक्षसास्ते चतुर्दश ।
निहन्तुं राघवं घोरं मत्प्रियार्थं सलक्ष्मणम् ॥ ८ ॥

ते तु रामेण सामर्षाश्शूलपट्टिशपाणयः ।
समरे निहतास्सर्वे सायकैर्मर्मभेदिभिः ॥ ९ ॥

तान् भूमौ पतितान् दृष्ट्वा क्षणेनैव महाबलान् ।
रामस्य च महत्कर्म महांस्त्रासोऽभवन्मम ॥ १० ॥

साऽस्मि भीता समुद्विग्ना विषण्णा च निशाचर ।
शरणं त्वां प्रपन्नाऽहं सर्वतो भयदर्शिनी ॥ ११ ॥

विषादनक्राध्युषिते परित्रासोर्मिमालिनि ।
किं मां न त्रायसे मग्नां विपुले शोकसागरे ॥ १२ ॥

एते च निहता भूमौ रामेण निशितैश्शरैः ।
ये च मे पदवीं प्राप्ता राक्षसाः पिशिताशनाः ॥ १३ ॥

मयि ते यद्यनुक्रोशो यदि रक्षस्सु तेषु च ।
दण्डकारण्यनिलयं जहि राक्षसकण्टकम् ॥ १४ ॥

यदि राममिमं न त्वमद्य वधिष्यसि ।
तव चैवाग्रतः प्राणांस्त्यक्ष्यामि निरपत्रपा ॥ १५ ॥

बुद्ध्याऽहमनुपश्यामि न त्वं रामस्य संयुगे ।
स्थातुं प्रतिमुखे शक्तस्सचापस्य महात्मनः ॥ १६ ॥

शूरमानी न शूरस्त्वं मिथ्याऽऽरोपितविक्रमः ।
मानुषौ यौ न शक्नोषि हन्तुं तौ रामलक्ष्मणौ ॥ १७ ॥

रामेण यदि ते शक्तिस्तेजो वाऽस्ति निशाचर ।
दण्डकारण्यनिलयं जहि तं कुलपांसन ॥ १८ ॥

निस्सत्त्वस्याल्पवीर्यस्य वासस्ते कीदृशस्त्विह ।
अपयाहि जनस्थानात्त्वरितस्सह बान्धवैः ॥ १९ ॥

स हि तेजस्समायुक्तो रामो दशरथात्मजः ।
भ्राता चास्य महावीर्यो येन चास्मि विरूपिता ॥ २० ॥

रामतेजोभिभूतो हि त्वं क्षिप्रं विनशिष्यसि ॥ २१ ॥

एवं विलप्य बहुशो राक्षसी विततोदरी ।
भ्रातुस्समीपे दुःखार्ता नष्टसंज्ञा बभूव सा ।
कराभ्यामुदरं हत्वा रुरोद भृशदुःखिता ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकविंशः सर्गः ॥

आदितः श्लोकाः ७४३३ आरण्यकाण्डे आदितः श्लोकाः ७२१

इत्यार्षे श्रीमद्रामायणे दशमेऽह्नि वर्तमानकथाप्रसङ्गः ॥



द्वाविंशः सर्गः

खरस्य युद्धायागमनम् ॥

एवमाधर्षितः शूरः शूर्पणख्या खरस्ततः ।
उवाच रक्षसां मध्ये खरः खरतरं वचः ॥ १ ॥

तवावमानः प्रभवःक्रोधोऽयमतुलो मम ।
न शक्यते धारयितुं लवणाम्भ इवोत्थितम् ॥ २ ॥

न रामं गणये वीर्यान्मानुषं क्षीणजीवितम् ।
आत्मदुश्चरितैः प्राणान् हतो योऽद्य विमोक्ष्यति ॥

बाष्पः संह्रियतामेष सम्भ्रमश्च विमुच्यताम् ।
अहं रामं सह भ्रात्रा नयामि यमसादनम् ॥ ४ ॥

परश्वधहतस्याद्य मन्दप्राणस्य संयुगे ।
रामस्य रुधिरं रक्तमुष्णं पास्यसि राक्षसि ॥ ५ ॥

सा प्रहृष्टा वचः श्रुत्वा खरस्य वदनाच्च्युतम् ।
प्रशशंस पुनर्मौर्ख्याद्भ्रातरं रक्षसां वरम् ॥ ६ ॥

तया परुषितः पूर्वं पुनरेव प्रशंसितः ।
अब्रवीद्दूषणं नाम खरः सेनापतिं तदा ॥ ७ ॥

चतुर्दशसहस्राणि मम चित्तानुवर्तिनाम् ।
रक्षसां भीमवेगानां समरेष्वनिवर्तिनाम् ॥ ८ ॥

नीलजीमूतवर्णानां घोराणां क्रूरकर्मणाम् ।
लोकर्हिंसाविहाराणां बलिनामुग्रतेजसाम् ॥ ९ ॥

तेषां शार्दूलदर्पाणां महास्यानां महात्मनाम् ।
सर्वोद्योगमुदीर्णानां रक्षसां सौम्य कारय ॥ १० ॥

उपस्थापय मे क्षिप्रं रथं सौम्य धनूंषि च ।
शरांश्च चित्रान् खड्गांश्च शक्तिश्च विविधाः शिताः ॥ ११ ॥

अग्रे निर्यातुमिच्छामि पौलस्त्यानां महात्मनाम् ।
वधार्थं दुर्विनीतस्य रामस्य रणकोविदः ॥ १२ ॥

इति तस्य ब्रुवाणस्य सूर्यवर्णं महारथम् ।
सदश्वै शबलैर्युक्तमाचचक्षेऽथ दूषणः ॥ १३ ॥

तं मेरुशिखराकारं तप्तकाञ्चनसन्निभम् ।
हेमचक्रमसंबाधं वैडूर्यमयकूबरम् ॥ १४ ॥

मत्तैः पुष्पैर्द्रुमैः शैलैश्चन्द्रार्कैः काञ्चनैः ।
मङ्गलैः पक्षिसङ्घैश्च ताराभिरभिसंवृतम् ॥ १५ ॥

ध्वजनिस्त्रिंशसम्पन्नं किङ्किणीजालभूषितम् ।
सदश्वयुक्तं सोऽमर्षादारुरोह रथं खरः ॥ १६ ॥

निशाम्य तु रथस्थं तं राक्षसा भीमविक्रमाः ।
तस्थुः सम्परिवार्यैनं दूषणं च महाबलम् ॥ १७ ॥

खरस्तु तान्महेष्वासान् घोरवर्मायुधध्वजान् ।
निर्यातेत्यब्रवीद्दृष्टो रथस्थः सर्वराक्षसान् ॥ १८ ॥

ततस्तद्राक्षसं सैन्यं घोरवर्मायुधध्वजम् ।
निर्जगाम जनस्थानान्महानादं महाजवम् ॥ १९ ॥
मुद्गरैः पट्टिशैः शूलैः सुतीक्ष्णैश्च परश्वधैः ।
खड्गैश्चक्रैश्च हस्तस्थैर्भ्राजमानैश्च तोमरैः ॥ २० ॥
शक्तिभिः परिघैर्घोरैरतिमात्रैश्च कार्मुकैः ।
गदासिमुसलैर्वज्रैर्गृहीतैर्भीमदर्शनैः ॥ २१ ॥
राक्षसानां सुघोराणां सहस्राणि चतुर्दश ।
निर्यातानि जनस्थानात् खरचित्तानुवर्तिनाम् ॥ २२ ॥
तांस्तु निर्धावतो दृष्ट्वा राक्षसान् भीमदर्शनान् ।
खरस्यापि रथः किञ्चिज्जगाम तदनन्तरम् ॥ २३ ॥
ततस्ताञ्च्छबलान्श्वांस्तप्तकाञ्चनभूषितान् ।
खरस्य मतमाज्ञाय सारथिः समचोदयत् ॥ २४ ॥
स चोदितो रथः शीघ्रं खरस्य रिपुघातिनः ।
शब्देनापूरयामास दिशश्च प्रदिशस्तथा ॥ २५ ॥

प्रवृद्धमन्युस्तु खरः खरस्वनो
रिपोर्वधार्थं त्वरितो यथाऽन्तकः ।
अचूचुदत् सारथिमुन्नदन् भृशं
महाबलो मेघ इवाश्मवर्षवान् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे द्वाविंशः सर्गः ॥

आदितः श्लोकाः 7459 आरण्यकाण्डे आदितः श्लोकाः 747

त्रयोविंशः सर्गः

उत्पातदर्शनम् ॥

तं प्रयान्तं बलं घोरमशिवं शोणितोदकम् ।
अभ्यवर्षन्महामेघस्तुमुलो गर्दभारुणः ॥ १ ॥

निपेतुस्तुरगास्तस्य रथयुक्ता महाजवाः ।
समे पुष्पचिते देशे राजमार्गे यदृच्छया ॥ २ ॥

श्यामं रुधिरपर्यन्तं बभूव परिवेषणम् ।
अलातचक्रप्रतिमं परिगृह्य दिवाकरम् ॥ ३ ॥

ततो ध्वजमुपागम्य हेमदण्डं समुच्छ्रितम् ।
समाक्रम्य महाकायस्तस्थौ गृध्रः सुदारुणः ॥ ४ ॥

जनस्थानसमीपे तु समागम्य खरस्वनाः ।
विस्वरान् विविधांश्चक्रुर्मांसादा मृगपक्षिणः ॥ ५ ॥

व्याजह्रुश्च प्रदीप्तायां दिशि वै भैरवस्वनम् ।
अशिवं यातुधानानां शिवा घोरा महास्वनाः ॥ ६ ॥

प्रभिन्नगजसङ्काशास्तोयशोणितधारिणः ।
आकाशं तदनाकाशं चक्रुर्भीमा बलाहकाः ॥ ७ ॥

बभूव तिमिरं घोरमुद्धतं रोमहर्षणम् ।
दिशो वा विदिशो वाऽपि न च व्यक्तं चकाशिरे ॥ ८ ॥

क्षतजार्द्रसवर्णाभा सन्ध्या कालं विना बभौ ।
खरस्याभिमुखा नेदुस्तदा घोरमृगाः खगाः ॥ ९ ॥

कङ्कगोमायुगृध्राश्च चुक्रुशुर्भयशंसिनः ॥ १० ॥

नित्याशुभकरा युद्धे शिवा घोरनिदर्शनाः ।
नेदुर्बलस्याभिमुखं ज्वालोद्गारिभिराननैः ॥ ११ ॥

कबन्धः परिघाभासो दृश्यते भास्करान्तिके ।
जग्राह सूर्यं स्वर्भानुरपर्वणि महाग्रहः ॥ १२ ॥

प्रवाति मारुतः शीघ्रं निष्प्रभोऽभूद्दिवाकरः ।
उत्पेतुश्च विना रात्रिं तारा: खद्योतसप्रभाः ॥ १३ ॥

संलीनमीनविहगा नलिन्यः शुष्कपङ्कजाः ।
तस्मिन् क्षणे बभूवुश्च विना पुष्पफलैर्द्रुमाः ॥ १४ ॥

उद्धूतश्च विना वातं रेणुर्जलधरारुणः ।
वीची कूचीति वाश्यन्त्यो बभूवुस्तत्र शारिकाः ॥ १५ ॥

उल्काश्चापि सनिर्घाता निपेतुर्घोरदर्शनाः ।
प्रचचाल मही सर्वा सशैलवनकानना ॥ १६ ॥

खरस्य च रथस्थस्य नर्दमानस्य धीमतः ।
प्राकम्पत भुजः सव्यः स्वरश्चास्यावसज्जत ॥ १७ ॥

सास्रा सम्पद्यते दृष्टिः पश्यमानस्य सर्वतः ।
ललाटे च रुजा जाता न च मोहान्न्यवर्तत ॥ १८ ॥

तान् समीक्ष्य महोत्पातानुत्थितान् रोमहर्षणान् ।
अब्रवीद्राक्षसान् सर्वान् प्रहसन् वाहिनीपतिः ॥ १९ ॥

महोत्पातानिमान् सर्वानुत्थितान् घोरदर्शनान् ।
न चिन्तयाम्यहं वीर्याद्बलवान् दुर्बलानिव ॥ २० ॥

तारा अपि शरैस्तीक्ष्णैः पातयामि नभःस्थलात् ।
मृत्युं मरणधर्मेण सङ्क्रुद्धो योजयाम्यहम् ॥ २१ ॥

राघवं तं बलोत्सिक्तं भ्रातरं चास्य लक्ष्मणम् ।
अहत्वा सायकैस्तीक्ष्णैर्नोपावर्तितुमुत्सहे ॥ २२ ॥

सकामा भगिनी मेऽस्तु पीत्वा तु रुधिरं तयोः ।
यन्निमित्तस्तु रामस्य लक्ष्मणस्य विपर्ययः ॥ २३ ॥

न क्वचित् प्राप्तपूर्वो मे संयुगेषु पराजयः ।
युष्माकमेतत्प्रत्यक्षं नानृतं कथयाम्यहम् ॥ २४ ॥

देवराजमपि क्रुद्धो मत्तैरावतयायिनम् ।
वज्रहस्तं रणे हन्यां किं पुनस्तौ कुमानुषौ ॥ २५ ॥

सा तस्य गर्जितं श्रुत्वा राक्षसस्य महाचमूः ।
प्रहर्षमतुलं लेभे मृत्युपाशावपाशिता ॥ २६ ॥

समीयुश्च महात्मानो युद्धदर्शनकाङ्क्षिणः ।
ऋषयो देवगन्धर्वाः सिद्धाश्च सह चारणैः ॥ २७ ॥

समेत्य चोचुः सहितास्तेऽन्योन्यं पुण्यकर्मणः ॥ २८ ॥

स्वस्ति गोब्राह्मणेभ्योऽस्तु लोकानां येऽभिसङ्गताः ।
जयतां राघवः सङ्ख्ये पौलस्त्यान् रजनीचरान् ।
चक्रहस्तो यथा युद्धे सर्वानसुरसत्तमान् ॥ २९ ॥

एतच्चान्यच्च बहुशो ब्रुवाणाः परमर्षयः ।
जातकौतूहलास्तत्र विमानस्थाश्च देवताः ॥
ददृशुर्वाहिनीं तेषां राक्षसानां गतायुषाम् ॥ ३० ॥

रथेन तु खरो वेगादुग्रसैन्यो विनिःसृतः ।
तं दृष्ट्वा राक्षसं भूयो राक्षसाश्च विनिःसृताः ॥ ३१ ॥

श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहङ्गमः ।
दुर्जयः करवीराक्षः परुषः कालकार्मुकः ॥ ३२ ॥

मेघमाली महामाली सर्पास्यो रुधिराशनः ।
द्वादशैते महावीर्याः प्रतस्थुरभितः खरम् ॥ ३३ ॥

महाकपालः स्थूलाक्षः प्रमाथी त्रिशिरास्तथा ।
चत्वार एते सेनाग्रे दूषणं पृष्ठतोऽन्वयुः ॥ ३४ ॥

सा भीमवेगा समराभिकामा
सुदारुणा राक्षसवीरसेना ।
तौ राजपुत्रौ सहसाऽभ्युपेता
माला ग्रहाणामिव चन्द्रसूर्यौ ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे त्रयोविंशः सर्गः ॥

चतुर्विंशः सर्गः

रामस्य युद्धोद्योगः ॥

आश्रमं प्रतियाते तु खरे खरपराक्रमे ।
तानेवोत्पातिकान् रामः सह भ्रात्रा ददर्श ह ॥ १ ॥

तानुत्पातान् महाघोरानुत्थितान् रोमहर्षणान् ।
प्रजानामहितान् दृष्ट्वा लक्ष्मणं वाक्यमब्रवीत् ॥ २ ॥

इमान् पश्य महाबाहो सर्वभूतापहारिणः ।
समुत्थितान् महोत्पातान् संहर्तुं सर्वराक्षसान् ॥ ३ ॥

अमी रुधिरधारास्तु विसृजन्तः खरस्वनान् ।
व्योम्नि मेघा विवर्तन्ते परुषा गर्दभारुणाः ॥ ४ ॥

सधूमाश्च शरास्सर्वे मम युद्धाभिनन्दिनः ।
रुक्मपृष्ठानि चापानि विवेष्टन्ते च लक्ष्मण ॥ ५ ॥

यादृशा इह कूजन्ति पक्षिणो वनचारिणः ।
अग्रतो नो भयं प्राप्तं संशयो जीवितस्य च ॥ ६ ॥

सम्प्रहारस्तु सुमहान् भविष्यति न संशयः ॥ ७ ॥

अयमाख्याति मे बाहुः स्फुरमाणो मुहुर्मुहुः ।
सन्निकर्षे तु नः शूर जयं शत्रोः पराजयम् ॥ ८ ॥

सुप्रभं च प्रसन्नं च तव वक्त्रं हि लक्ष्यते ।
उद्यतानां हि युद्धार्थं येषां भवति लक्ष्मण ।
निष्प्रभं वदनं तेषां भवत्यायुः परिक्षयः ॥ ९ ॥

रक्षसां नर्दतां घोरः श्रूयते हि महाध्वनिः ।
आहतानां च भेरीणां राक्षसैः क्रूरकर्मभिः ॥ १० ॥

अनागतविधानन्तु कर्तव्यं जयमिच्छता ।
आपदं शङ्कमानेन पुरुषेण विपश्चिता ॥ ११ ॥

तस्माद्गृहीत्वा वैदेहीं शरपाणिर्धनुर्धरः ।
गुहामाश्रय शैलस्य दुर्गां पादपसङ्कुलाम् ॥ १२ ॥

प्रतिकूलितुमिच्छामि न हि वाक्यमिदं त्वया ।
शापितो मम पादाभ्यां गम्यतां वत्स मा चिरम् ॥ १३ ॥

त्वं हि शूरश्च बलवान् हन्या ह्येतान्न संशयः ।
स्वयं तु हन्तुमिच्छामि सर्वानेव निशाचरान् ॥ १४ ॥

एवमुक्तस्तु रामेण लक्ष्मणः सह सीतया ।
शरानादाय चापं च गुहां दुर्गां समाश्रयत् ॥ १५ ॥

तस्मिन् प्रविष्टे तु गुहां लक्ष्मणे सह सीतया ।
हन्त निर्युक्तमित्युक्त्वा रामः कवचमाविशत् ॥ १६ ॥

स तेनाग्निनिकाशेन कवचेन विभूषितः ।
बभूव रामस्तिमिरे विधूमोऽग्निरिवोत्थितः ॥ १७ ॥

स चापमुद्यम्य महच्छरानादाय वीर्यवान् ।
बभूवावस्थितस्तत्र ज्यास्वनैः पूरयन्दिशः ॥ १८ ॥

ततो देवाः सगन्धर्वाः सिद्धाश्च सह चारणैः।
समेयुश्च महात्मानो युद्धदर्शनकाङ्क्षया ॥ १९ ॥

ऋषयश्च महात्मानो लोके ब्रह्मर्षिसत्तमाः।
समेत्य चोचुः सहितास्तेऽन्योन्यं पुण्यकर्मणः ॥ २० ॥

स्वस्ति गोब्राह्मणेभ्योऽस्तु लोकानां येऽभिसङ्गताः।
जयतां राघवो युद्धे पौलस्त्यान्रजनीचरान् ॥ २१ ॥

चक्रहस्तो यथा युद्धे सर्वासुरनिबर्हणः।
एवमुक्त्वा पुनः प्रोचुरालोक्य च परस्परम् ॥ २२ ॥

चतुर्दश सहस्राणि रक्षसां भीमकर्मणां।
एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति ॥ २३ ॥

इति राजर्षयः सिद्धाः सगणाश्च द्विजर्षभाः।
जातकौतूहलास्तस्थुर्विमानस्थाश्च देवताः ॥ २४ ॥

आविष्टं तेजसा रामं संग्रामशिरसि स्थितम्।
दृष्ट्वा सर्वाणि भूतानि भयाद्विव्यथिरे तदा ॥ २५ ॥

रूपमप्रतिमं तस्य रामस्याक्लिष्टकर्मणः।
बभूव रूपं क्रुद्धस्य रुद्रस्येव पिनाकिनः ॥ २६ ॥

ततो गंभीरनिर्ह्रादं घोरवर्मायुधध्वजम्।
अनीकं यातुधानानां समन्तात् प्रत्यदृश्यत ॥ २७ ॥

सिंहनादं विसृजतामन्योन्यमभिगर्जताम् ।
चापानि विस्फारयतां जृंभतां चाप्यभीक्ष्णशः ॥ २८ ॥
विप्रघुष्टस्वनानां च दुन्दुभीश्चापि निघ्नताम् ।
तेषां सुतुमुलः शब्दः पूरयामास तद्वनम् ॥ २९ ॥
तेन शब्देन वित्रस्ताः श्वापदा वनचारिणः ।
दुद्रुवुर्यत्र निश्शब्दं पृष्ठतो न व्यलोकयन् ॥ ३० ॥
तत्त्वनीकं महावेगं रामं समुपसर्पत ।
धृतनानाप्रहरणं गंभीरं सागरोपमम् ॥ ३१ ॥
रामोऽपि चारयंश्चक्षुः सर्वतो रणपण्डितः ।
ददर्श खरसैन्यं तद्युद्धाभिमुखमुद्यतम् ॥ ३२ ॥
विनम्य च धनुर्भीमं तूण्योश्चोद्धृत्य सायकान् ।
क्रोधमाहारयत्तीव्रं वधार्थं सर्वरक्षसाम् ॥ ३३ ॥
दुष्प्रेक्षः सोऽभवत् क्रुद्धो युगान्ताग्निरिव ज्वलन् ।
तं दृष्ट्वा तेजसाऽऽविष्टं प्राद्रवन् वनदेवताः ॥ ३४ ॥
तस्य क्रुद्धस्य रूपं तु रामस्य ददृशे तदा ।
दक्षस्येव क्रतुं हन्तुमुद्यतस्य पिनाकिनः ॥ ३५ ॥
तत्कार्मुकैराभरणैर्ध्वजैश्च तैर्वर्मभिश्चाग्निसमानवर्णैः ।
बभूव सैन्यं पिशिताशनानां सूर्योदये नीलमिवाभ्रजालम् ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे चतुर्विंशः सर्गः ॥

आदितः श्लोकाः 7530 आरण्यकाण्डे आदितः श्लोकाः 818

पञ्चविंशः सर्गः

खरसैन्यवधः ॥

अवष्टब्धधनुं रामं क्रुद्धं च रिपुघातिनम् ।
ददर्शाश्रममागम्य खरः सहपुरःसरः ॥ १ ॥

तं दृष्ट्वा सशरं चापमुद्यम्य खरनिःस्वनम् ।
रामस्याभिमुखं सूतं चोदयामास चोदयत् ॥ २ ॥

स खरस्याज्ञया सूतस्तुरगान् समचोदयत् ।
यत्र रामो महाबाहुरेको धुन्वन्धनुः स्थितः ॥ ३ ॥

तं तु निष्पतितं दृष्ट्वा सर्वे ते रजनीचराः ।
नर्दमाना महानादं सचिवाः पर्यवारयन् ॥ ४ ॥

स तेषां यातुधानानां मध्ये रथगतः खरः ।
बभूव मध्ये ताराणां लोहिताङ्ग इवोदितः ॥ ५ ॥

ततः शरसहस्रेण राममप्रतिमौजसम् ।
अर्दयित्वा महानादं ननाद समरे खरः ॥ ६ ॥

ततस्तं भीमधन्वानं क्रुद्धाः सर्वे निशाचराः ।
रामं नानाविधैः शस्त्रैरभ्यवर्षन्त दुर्जयम् ॥ ७ ॥

मुद्गरैः पट्टिशैः शूलैः प्रासैः खड्गैः परश्वधैः ।
राक्षसाः समरे रामं निजघ्नू रोषतत्पराः ॥ ८ ॥

ते बलाहकसङ्काशा महानादा महौजसः ।
अभ्यधावन्त काकुत्स्थं रथैर्वाजिभिरेव च
गजैः पर्वतकूटाभै रामं युद्धे जिघांसवः ॥ ९ ॥

ते रामे शरवर्षाणि व्यसृजन् रक्षसां गणाः ।
शैलेन्द्रमिव धाराभिर्वर्षमाणा महाघनाः ॥ १० ॥

स तैः परिवृतो घोरै राघवो रक्षसां गणैः ।
तिथिष्विव महादेवो वृतः परिषदां गणैः ॥ ११ ॥

तानि मुक्तानि शस्त्राणि यातुधानैः स राघवः ।
प्रतिजग्राह विशिखैर्नद्योघानिव सागरः ॥ १२ ॥

स तैः प्रहरणैर्घोरैर्भिन्नगात्रो न विव्यथे ।
रामः प्रदीप्तैर्बहुभिर्वज्रैरिव महाचलः ॥ १३ ॥

स विद्धः क्षतजादिग्धः सर्वगात्रेषु राघवः ।
बभूव रामः सन्ध्याभ्रैर्दिवाकर इवावृतः ॥ १४ ॥

विषेदुर्देवगन्धर्वाः सिद्धाश्च परमर्षयः ।
एकं सहस्रैर्बहुभिस्तदा दृष्ट्वा समावृतम् ॥ १५ ॥

ततो रामः सुसङ्क्रुद्धो मण्डलीकृतकार्मुकः ।
ससर्ज विशिखान् बाणाञ्च्छतशोऽथ सहस्रशः ॥ १६ ॥

दुरावारान्दुर्विषहान् कालदण्डोपमान् रणे ।
मुमोच लीलया रामः कङ्कपत्रानजिह्मगान् ॥ १७ ॥

ते शराः शत्रुसैन्येषु मुक्ता रामेण लीलया ।
आददू रक्षसां प्राणान् पाशाः कालकृता इव ॥ १८ ॥

भित्त्वा राक्षसदेहांस्तांस्ते शरा रुधिराप्लुताः ।
अन्तरिक्षगता रेजुर्दीप्ताग्निसमतेजसः ॥ १९ ॥

असङ्ख्येयास्तु रामस्य सायकाश्चापमण्डलात् ।
विनिष्पेतुरतीवोग्रा रक्षःप्राणापहारिणः ॥ २० ॥

धनूंषि च ध्वजाग्राणि वर्माणि च शिरांसि च ।
चिच्छिदुर्बिभिदुश्चैव रामबाणा गुणच्युताः ॥ २१ ॥

बाहून् सहस्ताभरणानूरून् करिकरोपमान् ।
चिच्छेद रामः समरे शतशोऽथ सहस्रशः ॥ २२ ॥

हयान् काञ्चनसन्नाहान्रथयुक्तान् ससारथीन् ।
गजांश्च सगजारोहान् सहयान् सादिनस्तथा ॥ २३ ॥

पदातीन् समरे हत्वा ह्यनयद्यमसादनम् ॥ २४ ॥

ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ।
भीममार्तस्वरं चक्रुर्भिद्यमाना निशाचराः ॥ २५ ॥

तत्सैन्यं निशितैर्बाणैरर्दितं मर्मभेदिभिः ।
रामेण न सुखं लेभे शुष्कं वनमिवाग्निना ॥ २६ ॥

केचिद्भीमबलाः शूराः शूलान् खड्गान् परश्वधान् ।
रामस्याभिमुखं गत्वा चिक्षिपुः परमायुधान् ॥ २७ ॥

तानि बाणैर्महाबाहुः शस्त्राण्यावार्य राघवः ।
जहार समरे प्राणांश्चिच्छेद च शिरोधरान् ॥ २८ ॥

ते छिन्नशिरसः पेतुश्छिन्नवर्मशरासनाः ।
सुपर्णवातविक्षिप्ता जगत्यां पादपा यथा ॥ २९ ॥

अवशिष्टाश्च ये तत्र विषण्णाश्च निशाचराः ।
खरमेवाभ्यधावन्त शरणार्थं शरार्दिताः ॥ ३० ॥

तान् सर्वान् पुनरादाय समाश्वास्य च दूषणः ।
अभ्यधावत काकुत्स्थं क्रुद्धो रुद्रमिवान्तकः ॥ ३१ ॥

निवृत्तास्तु पुनः सर्वे दूषणाश्रयनिर्भयाः ।
राममेवाभ्यधावन्त सालतालशिलायुधाः ॥ ३२ ॥

शूलमुद्गरहस्ताश्च चापहस्ता महाबलाः ।
सृजन्तः शरवर्षाणि शस्त्रवर्षाणि संयुगे ।
द्रुमवर्षाणि मुञ्चन्तः शिलावर्षाणि राक्षसाः ॥ ३३ ॥

तद्बभूवाद्भुतं युद्धं तुमुलं रोमहर्षणम् ।
रामस्य च महाघोरं पुनस्तेषां च रक्षसाम् ॥ ३४ ॥

ते समन्तादभिक्रुद्धा राघवं पुनरभ्ययुः ॥ ३५ ॥

तैश्च सर्वा दिशो दृष्ट्वा विदिशश्च समावृताः ।
राक्षसैरुद्यतप्रासैः शरवर्षाभिवर्षिभिः ॥ ३६ ॥

स कृत्वा भैरवं नादमस्त्रं परमभास्वरम् ।
संयोजयत गान्धर्वं राक्षसेषु महाबलः ॥ ३७ ॥

ततः शरसहस्राणि निर्ययुश्चापमण्डलात् ।
सर्वा दश दिशो बाणैरावार्यन्त समागतैः ॥ ३८ ॥

नाददानं शरान् घोरान्न मुञ्चन्तं शिलीमुखान् ।
विकर्षमाणं पश्यन्ति राक्षसास्ते शरार्दिताः ॥ ३९ ॥

शरा रामेण तूत्सृष्टा रुक्मपुङ्खाः पतत्रिणः ।
सर्पाः पञ्चानना भूत्वा भक्षयन्तिस्म राक्षसान् ॥ ४० ॥

शरान्धकारमाकाशमावृणोत्सदिवाकरम् ।
बभूवावस्थितो रामः प्रवमन्निव ताञ्च्छरान् ॥ ४१ ॥

युगपत् पतमानैश्च युगपच्च हतैर्भृशम् ।
युगपत् पतितैश्चैव विकीर्णा वसुधाऽभवत् ॥ ४२ ॥

निहताः पतिताः क्षीणाश्च्छिन्ना भिन्ना विदारिताः ।
तत्र तत्र स्म दृश्यन्ते राक्षसास्ते सहस्रशः ॥ ४३ ॥

सोष्णीषैरुत्तमाङ्गैश्च साङ्गदैर्बाहुभिस्तथा ।
ऊरुभिर्जानुभिश्च्छिन्नैर्नानारूपविभूषणैः ॥ ४४ ॥

हयैश्च द्विपमुख्यैश्च रथैर्भिन्नैरनेकशः ।
चामरैर्व्यजनैश्छत्रैर्ध्वजैर्नानाविधैरपि ॥ ४५ ॥

रामस्य बाणाभिहतैर्विचित्रैः शूलपट्टिशैः ।
खड्गैः खण्डीकृतैः प्रासैर्विकीर्णैश्च परश्वधैः ॥ ४६ ॥

चूर्णिताभिः शिलाभिश्च शरैश्चित्रैरनेकशः ।
विच्छिन्नैः समरे भूमिर्विकीर्णाऽभूद्भयङ्करा ॥ ४७ ॥

तान् दृष्ट्वा निहतान् सर्वे राक्षसाः परमातुराः ।
न तत्र चलितुं शक्ता रामं परपुरञ्जयम् ॥ ४८ ॥

बलावशेषन्तु निरस्तसाहवे
खराधिकं राक्षसदुर्बलं बलम् ।
जघान रामः स्थिरधर्मपौरुषो
धनुर्बलैरप्रतिवारणैः शरैः ॥ ४९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे पञ्चविंशः सर्गः ॥
आदितः श्लोकाः 7579 आरण्यकाण्डे आदितः श्लोकाः 867

षड्विंशः सर्गः

दूषणवधः ॥

दूषणस्तु स्वकं सैन्यं हन्यमानं निरीक्ष्य सः ।
सन्दिदेश महाबाहुर्भीमवेगान्दुरासदान् ॥
राक्षसान् पञ्च साहस्रान् समरेष्वनिवर्तिनः ॥ १ ॥

ते शूलैः पट्टिशैः खड्गैः शिलावर्षैर्द्रुमैरपि ।
शरवर्षैरविच्छिन्नं वव्रुषुस्तं समन्ततः ॥ २ ॥

तद्रुमाणां शिलानां च वर्षं प्राणहरं महत् ।
प्रतिजग्राह धर्मात्मा राघवस्तीक्ष्णसायकैः ॥ ३ ॥

प्रतिगृह्य च तद्वर्षं निमीलित इवर्षभः ।
रामः क्रोधं परं भेजे वधार्थं सर्वरक्षसाम् ॥ ४ ॥

ततः क्रोधसमाविष्टः प्रदीप्त इव तेजसा ।
शरैरवाकिरत् सैन्यं सर्वतः सहदूषणम् ॥ ५ ॥

ततः सेनापतिः क्रुद्धो दूषणः शत्रुदूषणः ।
शरैरशनिकल्पैस्तं राघवं समवाकिरत् ॥ ६ ॥

ततो रामः सुसङ्क्रुद्धः क्षुरेणास्य महद्धनुः ।
चिच्छेद समरे वीरश्चतुर्भिश्चतुरो हयान् ॥ ७ ॥

हत्वा चाश्वाञ्च्छरैस्तीक्ष्णैरर्धचन्द्रेण सारथेः ।
शिरो जहार तद्रक्षस्त्रिभिर्विव्याध वक्षसि ॥ ८ ॥

स छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
जग्राह गिरिशृङ्गाभं परिघं रोमहर्षणम् ॥ ९ ॥

वेष्टितं काञ्चनैः पट्टैर्वसैन्याभिमर्दनम् ।
आयसैः शङ्कुभिस्तीक्ष्णैः कीर्णं परवसोक्षितम् ॥ १० ॥

वज्राशनिसमस्पर्शं पुरगोपुरदारणम् ।
त्रासनं सर्वभूतानां काञ्चनाङ्गदभूषितम् ॥ ११ ॥

तं महोरगसङ्काशं प्रगृह्य परिघं रणे ।
दूषणोऽभ्यद्रवद्रामं क्रूरकर्मा निशाचरः ॥ १२ ॥

तस्याभिपतमानस्य दूषणस्य स राघवः ।
द्वाभ्यां शराभ्यां चिच्छेद सहस्ताभरणौ भुजौ ॥ १३ ॥

भ्रष्टस्तस्य महाकायः पपात रणमूर्धनि ।
परिघच्छिन्नहस्तस्य शक्रध्वज इवाग्रतः ॥ १४ ॥

स कराभ्यां विकीर्णाभ्यां पपात भुवि दूषणः ।
विषाणाभ्यां विशीर्णाभ्यां मनस्वीव महागजः ॥ १५ ॥

तं दृष्ट्वा पतितं भूमौ दूषणं निहतं रणे ।
साधु साध्विति काकुत्स्थं सर्वभूतान्यपूजयन् ॥ १६ ॥

एतस्मिन्नन्तरे क्रुद्धास्त्रयः सेनाग्रयायिनः ।
संहत्याभ्यद्रवन्रामं मृत्युपाशावपाशिताः ॥ १७ ॥

महाकपालः स्थूलाक्षः प्रमाथी च महाबलः ।
महाकपालो विपुलं शूलमुद्यम्य राक्षसः ॥ १८ ॥

स्थूलाक्षः पट्टिशं गृह्य प्रमाथी च परश्वधम् ॥ १९ ॥

दृष्ट्वैवापततस्तांस्तु राघवः सायकैः शितैः ।
तीक्ष्णाग्रैः प्रतिजग्राह संप्राप्तानतिथीनिव ॥ २० ॥

महाकपालस्य शिरश्चिच्छेद रघुनन्दनः ।
असङ्ख्येयैस्तु बाणौघैः प्रममाथ प्रमाथिनम् ॥ २१ ॥

स्थूलाक्षस्याक्षिणी तीक्ष्णैः पूरयामास सायकैः ।
स पपात हतो भूमौ विटपीव महाद्रुमः ॥ २२ ॥

दूषणस्यानुगान् पञ्च साहस्रान् कुपितः क्षणात् ।
बाणौघैः पञ्चसाहस्रैरनयद्यमसादनम् ॥ २३ ॥

दूषणं निहतं दृष्ट्वा तस्य चैव पदानुगान् ।
व्यादिदेश खरः क्रुद्धः सेनाध्यक्षान् महाबलान् ॥

अयं विनिहतः सङ्ख्ये दूषणः सपदानुगः ।
महत्या सेनया सार्धं युद्ध्वा रामं कुमानुषम् ॥ २५ ॥

शस्त्रैर्नानाविधाकारैर्हनध्वं सर्वराक्षसाः ।
एवमुक्त्वा खरः क्रुद्धो राममेवाभिदुद्रुवे ॥ २६ ॥

श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहङ्गमः ।
दुर्जयः करवीराक्षः परुषः कालकार्मुकः ॥ २७ ॥

मेघमाली महामाली सर्पास्यो रुधिराशनः ।
द्वादशैते महावीर्या बलाध्यक्षाः ससैनिकाः ॥ २८ ॥

राममेवाभ्यवर्तन्त विसृजन्तः शरोत्तमान् ॥ २९ ॥

ततः पावकसङ्काशैर्हेमवज्रविभूषितैः ।
जघान शेषं तेजस्वी तस्य सैन्यस्य सायकैः ॥ ३० ॥

ते रुक्मपुङ्खा विशिखाः सधूमा इव पावकाः ।
निजघ्नुस्तानि रक्षांसि वज्राणीव महाचलान् ॥ ३१ ॥

रक्षसां तु शतं रामः शतेनैकेन कर्णिना ।
सहस्रं तु सहस्रेण जघान रणमूर्धनि ॥ ३२ ॥
तैर्भिन्नवर्माभरणाश्छिन्नभिन्नशरासनाः ।
निपेतुः शोणितादिग्धा धरण्यां रजनीचराः ॥ ३३ ॥
तैर्मुक्तकेशैः समरे पतितैः शोणितोक्षितैः ।
आस्तीर्णा वसुधा कृत्स्ना महावेदिः कुशैरिव ॥ ३४ ॥
क्षणेन तु महाघोरं वनं निहतराक्षसम् ।
बभूव निरयप्रख्यं मांसशोणितकर्दमम् ॥ ३५ ॥
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ।
हतान्येकेन रामेण मानुषेण पदातिना ॥ ३६ ॥
तस्य सैन्यस्य सर्वस्य खरः शेषो महारथः ।
राक्षसस्त्रिशिराश्चैव रामश्च रिपुसूदनः ॥ ३७ ॥
शेषा हता महावीर्या राक्षसा रणमूर्धनि ।
घोरा दुर्विषहाः सर्वे लक्ष्मणस्याग्रजेन ते ॥ ३८ ॥

ततस्तु तद्भीमबलं महाहवे
समीक्ष्य रामेण हतं बलीयसा ।
रथेन रामं महता खरस्ततः
समाससादेन्द्र इवोद्यताशनिः ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे षड्विंशः सर्गः ॥

सप्तविंशः सर्गः

त्रिशिरोवधः ॥

खरं तु रामाभिमुखं प्रयान्तं वाहिनीपतिम् ।
राक्षसस्त्रिशिरा नाम संनिपत्येदमब्रवीत् ॥ १ ॥

मां नियोजय विक्रान्त त्वं निवर्तस्व साहसात् ।
पश्य रामं महाबाहुं संयुगे विनिपातितम् ॥ २ ॥

प्रतिजानामि ते सत्यमायुधं चाहमालभे ।
यथा रामं वधिष्यामि वधार्हं सर्वरक्षसाम् ॥ ३ ॥

अहं वाऽस्य रणे मृत्युरेष वा समरे मम ।
विनिवृत्य रणोत्साहान्मुहूर्तं प्राश्निको भव ॥ ४ ॥

प्रहृष्टो वा हते रामे जनस्थानं प्रयास्यसि ।
मयि वा निहते रामं संयुगायोपयास्यसि ॥ ५ ॥

खरस्त्रिशिरसा तेन मृत्युलोभात् प्रसादितः ।
गच्छ युध्येत्यनुज्ञातो राघवाभिमुखो ययौ ॥ ६ ॥

त्रिशिरास्तु रथेनैव वाजियुक्तेन भास्वता ।
अभ्यद्रवद्रणे रामं त्रिशृङ्ग इव पर्वतः ॥ ७ ॥

शरधारासमूहान् स महामेघ इवोत्सृजन् ।
व्यसृजत्सदृशं नादं जलार्द्रस्येव दुन्दुभेः ॥ ८ ॥

आगच्छन्तं त्रिशिरसं राक्षसं प्रेक्ष्य राघवः ।
धनुषा प्रतिजग्राह विधून्वन् सायकाञ्च्छितान् ॥ ९ ॥

स संप्रहारस्तुमुलो रामत्रिशिरसोर्महान् ।
बभूवातीव बलिनोः सिंहकुञ्जरयोरिव ॥ १० ॥

ततस्त्रिशिरसा बाणैर्ललाटे ताडितस्त्रिभिः ।
अमर्षी कुपितो र मः संरब्धमिदमब्रवीत् ॥ ११ ॥

अहो विक्रमशूरस्य राक्षसस्येदृशं बलम् ।
पुष्पैरिव शरैर्यस्य ललाटेऽस्मि परिक्षितः ॥ १२ ॥

ममापि प्रतिगृह्णीष्व शरांश्चापगुणच्युतान् ।
एवमुक्त्वा तु संरब्धः शरानाशीविषोपमान् ॥ १३ ॥

त्रिशिरोवक्षसि क्रुद्धो निजघान चतुर्दश ॥ १४ ॥

चतुर्भिस्तुरगानस्य शरैः सन्नतपर्वभिः ।
न्यपातयत तेजस्वी चतुरस्तस्य वाजिनः ॥ १५ ॥

अष्टभिः सायकैः सूतं रथोपस्थान्न्यपातयत् ।
रामश्चिच्छेद बाणेन ध्वजं चास्य समुच्छ्रितम् ॥ १६ ॥

ततो हतरथात्तस्मादुत्पतन्तं निशाचरम् ।
बिभेद रामस्तं बाणैर्हृदये सोऽभवज्जडः ॥ १७ ॥

सायकैश्चाप्रमेयात्मा सामर्षस्तस्य रक्षसः ।
शिरांस्यपातयद्रामो वेगवद्भिस्त्रिभिः शरैः ॥ १८ ॥

स भूमौ शोणितोद्गारी रामबाणाभिपीडितः ।
न्यपतत् पतितैः पूर्वं स्वशिरोभिर्निशाचरः ॥ १९ ॥

हतशेषास्ततो भग्ना राक्षसाः खरसंश्रयाः ।
द्रवन्ति स्म न तिष्ठन्ति व्याघ्रत्रस्ता मृगा इव ॥ २० ॥

तान् खरो द्रवतो दृष्ट्वा निवर्त्य रुषितः स्वयम् ।
राममेवाभिदुद्राव राहुश्चन्द्रमसं यथा ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे सप्तविंशः सर्गः ॥

आदितः श्लोकाः 7639 आरण्यकाण्डे आदितः श्लोकाः 927



अष्टविंशः सर्गः

खरयुद्धम् ॥

निहतं दूषणं दृष्ट्वा रणे त्रिशिरसा सह ।
खरस्याप्यभवन्मोहो दृष्ट्वा रामस्य विक्रमम् ॥ १ ॥

स दृष्ट्वा राक्षसं सैन्यमविषह्यं महाबलः ।
हतमेकेन रामेण त्रिशिरोदूषणावपि ॥ २ ॥

तद्बलं हतभूयिष्ठं विमनाः प्रेक्ष्य राक्षसः ।
आससाद खरो रामं नमुचिर्वासवं यथा ॥ ३ ॥

विकृष्य बलवच्चापं नाराचान्रक्तभोजनान् ।
खरश्चिक्षेप रामाय क्रुद्धानाशीविषानिव ॥ ४ ॥

ज्यां विधून्वन् सुबहुशः शिक्षयाऽस्त्राणि दर्शयन् ।
चचार समरे मार्गान् शरै रथगतः खरः ॥ ५ ॥

स सर्वाश्च दिशो बाणैः प्रदिशश्च महारथः ।
पूरयामास तं दृष्ट्वा रामोऽपि सुमहद्धनुः ॥ ६ ॥

स सायकैर्दुर्विषहैः सस्फुलिङ्गैरिवाग्निभिः ।
नभश्चकारविवरं पर्जन्य इव वृष्टिभिः ॥ ७ ॥

तद्बभूव शितैर्बाणैः खररामविसर्जितैः ।
पर्याकाशमनाकाशं सर्वतः शरसङ्कुलम् ॥ ८ ॥

शरजालावृतः सूर्यो न तदा स्म प्रकाशते ।
अन्योऽन्यवधसंरंभादुभयोः संप्रयुध्यतोः ॥ ९ ॥

ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ।
आजघान खरो रामं तोत्रैरिव महाद्विपम् ॥ १० ॥

तं रथस्थं धनुष्पाणीं राक्षसं पर्यवास्थितम् ।
ददृशुः सर्वभूतानि पाशहस्तमिवान्तकम् ॥ ११ ॥

हन्तारं सर्वसैन्यस्य पौरुषे पर्यवस्थितम् ।
परिश्रान्तं महासत्त्वम् मेने रामं खरस्तदा ॥ १२ ॥

तं सिंहमिव विक्रान्तं सिंहविक्रान्तगामिनम् ।
दृष्ट्वा नोद्विजते रामः सिंहः क्षुद्रमृगं यथा ॥ १३ ॥

ततः सूर्यनिकाशेन रथेन महता खरः ।
आससाद रणे रामं पतङ्ग इव पावकम् ॥ १४ ॥

ततोऽस्य सशरं चापं मुष्टिदेशे महात्मनः।
खरश्चिच्छेद रामस्य दर्शयन् पाणिलाघवम् ॥ १५ ॥

स पुनस्त्वपरान् सप्तशरानादाय वर्मणि।
निजघान खरः क्रुद्धो शक्राशनिसमप्रभान् ॥ १६ ॥

ततस्तत्प्रहतं बाणैः खरमुक्तैः सुपर्वभिः।
पपात कवचं भूमौ रामस्यादित्यवर्चसः ॥ १७ ॥

ततः शरसहस्रेण राममप्रतिमौजसम्।
अर्पयित्वा महानादं ननाद समरे खरः ॥ १८ ॥

स शरैरर्पितः क्रुद्धः सर्वगात्रेषु राघवः।
रराज समरे रामो विधूमोऽग्निरिव ज्वलन् ॥ १९ ॥

ततो गम्भीरनिर्ह्रादं रामः शत्रुनिबर्हणः।
चकारान्ताय स रिपोः सज्यमन्यन्महद्धनुः ॥ २० ॥

सुमहद्वैष्णवं यत्तदतिसृष्टं महर्षिणा।
वरं तद्धनुरादाय खरं समभिधावत ॥ २१ ॥

ततः कनकपुङ्खैस्तु शरैः सन्नतपर्वभिः।
बिभेद रामः सङ्क्रुद्धः खरस्य समरे ध्वजम् ॥ २२ ॥

स दर्शनीयो बहुधा विकीर्णः काञ्चनध्वजः।
जगाम धरणीं सूर्यो देवतानामिवाज्ञया ॥ २३ ॥

तं चतुर्भिः खरः क्रुद्धो रामं गात्रेषु मार्गणैः ।
विव्याध युधि मर्मज्ञो मातङ्गमिव तोमरैः ॥ २४ ॥

स रामो बहुभिर्बाणैः खरकार्मुकनिःसृतैः ।
विद्धो रुधिरसिक्ताङ्गो बभूव रुषितो भृशम् ॥ २५ ॥

स धनुर्धन्विनां श्रेष्ठः प्रगृह्य परमाहवे ।
मुमोच परमेष्वासः षट्छरानभिलक्षितान् ॥ २६ ॥

शिरस्येकेन बाणेन द्वाभ्यां बाह्वोरथार्पयत् ।
त्रिभिश्चन्द्रार्धवक्त्रैस्तं वक्षस्यभिजघान ह ॥ २७ ॥

ततः पश्चान्महातेजा नाराचान् भास्करोपमान् ।
जिघांसू राक्षसं क्रुद्धस्त्रयोदश समाददे ॥ २८ ॥

ततोऽस्य युगमेकेन चतुर्भिश्चतुरो हयान् ।
षष्ठेन तु शिरः सङ्ख्ये खरस्य रथसारथेः ॥ २९ ॥

त्रिभिस्त्रिवेणुं बलवान्द्वाभ्यामक्षं महाबलः ।
द्वादशेन तु बाणेन खरस्य सशरं धनुः ॥ ३० ॥

छित्त्वा वज्रनिकाशेन राघवः प्रहसन्निव ।
त्रयोदशेनेन्द्रसमो बिभेद समरे खरम् ॥ ३१ ॥

प्रभग्नधन्वा विरथो हताश्वो हतसारथिः ।
गदापाणिरवप्लुत्य तस्थौ भूमौ खरस्तदा ॥ ३२ ॥

तत्कर्म रामस्य महारथस्य
समेत्य देवाश्च महर्षयश्च ।
अपूजयन् प्राञ्जलयः प्रहृष्टाः
तदा विमानाग्रगताः समेताः ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डेऽष्टाविंशः सर्गः ॥

आदितः श्लोकाः 7672 आरण्यकाण्डे आदितः श्लोकाः 960

एकोनत्रिंशः सर्गः

खरभर्त्सनम् ॥

खरं तु विरथं रामो गदापाणिमवस्थितम् ।
मृदुपूर्वं महातेजाः परुषं वाक्यमब्रवीत् ॥ १ ॥

गजाश्वरथसंबाधे बले महति तिष्ठता ।
कृतं सुदारुणं कर्म सर्वलोकजुगुप्सितम् ॥ २ ॥

उद्वेजनीयो भूतानां नृशंसः पापकर्मकृत् ।
त्रयाणामपि लोकानामीश्वरोऽपि न तिष्ठति ॥ ३ ॥

कर्म लोकविरुद्धं तु कुर्वाणं क्षणदाचर ।
तीक्ष्णं सर्वजनो हन्ति सर्पं दुष्टमिवागतम् ॥ ४ ॥

लोभात्पापानि कुर्वाणः कामाद्वा यो न बुध्यते ।
भ्रष्टः पश्यति तस्यान्तं ब्राह्मणी करकादिव ॥ ५ ॥

वसतो दण्डकारण्ये तापसान्धर्मचारिणः ।
किं नु हत्वा महाभागान् फलं प्राप्स्यसि राक्षस ॥ ६ ॥

न चिरं पापकर्माणः क्रूरा लोकजुगुप्सिताः ।
ऐश्वर्यं प्राप्य तिष्ठन्ति शीर्णमूला इव द्रुमाः ॥ ७ ॥

अवश्यं लभते कर्ता फलं पापस्य कर्मणः ।
घोरं पर्यागते काले द्रुमाः पुष्पमिवार्तवम् ॥ ८ ॥

नचिरात् प्राप्यते लोके पापानां कर्मणां फलम् ।
सविषाणामिवान्नानां भुक्तानां क्षणदाचर ॥ ९ ॥

पापमाचरतां घोरं लोकस्याप्रियमिच्छताम् ।
अहमासादितो राजा प्राणान् हन्तुं निशाचर ॥ १० ॥

अद्य त्वां हि मया मुक्ताः शराः काञ्चनभूषणाः ।
विदार्य निपतिष्यन्ति वल्मीकमिव पन्नगाः ॥ ११ ॥

ये त्वया दण्डकारण्ये भक्षिता धर्मचारिणः ।
तानद्य निहतः सङ्ख्ये ससैन्योऽनुगमिष्यसि ॥ १२ ॥

अद्य त्वां निहतं बाणैः पश्यन्तु परमर्षयः ।
निरयस्थं विमानस्था ये त्वया हिंसिताः पुरा ॥ १३ ॥

प्रहर त्वं यथाकामं कुरु यत्नं कुलाधम ॥ १४ ॥

अद्य ते पातयिष्यामि शिरस्तालफलं यथा ॥ १५ ॥

एवमुक्तस्तु रामेण क्रुद्धः संरक्तलोचनः ।
प्रत्युवाच खरो रामं प्रहसन् क्रोधमूर्च्छितः ॥ १६ ॥

प्राकृतान् राक्षसान् हत्वा युद्धे दशरथात्मज ।
आत्मना कथमात्मानमप्रशस्यं प्रशंससि ॥ १७ ॥

विक्रान्ता बलवन्तो वा ये भवन्ति नरर्षभाः ।
कथयन्ति न ते किञ्चित्तेजसा स्वेन गर्विताः ॥ १८ ॥

प्राकृतास्त्वकृतात्मानो लोके क्षत्रियपांसनाः ।
निरर्थकं विकत्थन्ते यथा राम विकत्थसे ॥ १९ ॥

कुलं व्यपदिशन् वीरः समरे कोऽभिधास्यति ।
मृत्युकाले तु संप्राप्ते स्वयमप्रस्तवे स्तवम् ॥ २० ॥

सर्वथा तु लघुत्वं ते कत्थनेन विदर्शितम् ।
सुवर्णप्रतिरूपेण तप्तेनेव कुशाग्निना ॥ २१ ॥

न तु मामिह तिष्ठन्तं पश्यसि त्वं गदाधरम् ।
धराधरमिवाकम्प्यं पर्वतं धातुभिश्चितम् ॥ २२ ॥

पर्याप्तोऽहं गदापाणिर्हन्तुं प्राणान् रणे तव ।
त्रयाणामपि लोकानां पाशहस्त इवान्तकः ॥ २३ ॥

कामं बह्वपि वक्तव्यं त्वयि वक्ष्यामि न त्वहम्।
अस्तं गच्छेद्धि सविता युद्धविघ्नस्ततो भवेत् ॥ २४ ॥

चतुर्दश सहस्राणि राक्षसानां हतानि वै।
त्वद्विनाशात्करिष्यामि तेषामास्रप्रमार्जनम् ॥ २५ ॥

ततो रुधिरधाराभिस्त्वच्छरीरविमर्दनात्।
करिष्यामि बलिं भूमौ त्वां हत्वा सर्वरक्षसाम् ॥ २६ ॥

इत्युक्त्वा परमक्रुद्धस्तां गदां परमाङ्गदः।
खरश्चिक्षेप रामाय प्रदीप्तामशनीमिव ॥ २७ ॥

खरबाहुप्रमुक्ता सा प्रदीप्ता महती गदा।
भस्म वृक्षांश्च गुल्मांश्च कृत्वाऽगात्तत्समीपतः ॥ २८ ॥

तामापतन्तीं ज्वलितां मृत्युपाशोपमां गदाम्।
अन्तरिक्षगतां रामश्चिच्छेद बहुधा शरैः ॥ २९ ॥

सा विशीर्णा शरैर्दग्धा पपात धरणीतले।
गदा मन्त्रौषधबलैर्व्यालीव विनिपातिता ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकोनत्रिंशः सर्गः ॥



त्रिंशः सर्गः

खरवधः ॥

भित्त्वा तु तां गदां बाणै राघवो धर्मवत्सलः ।
स्मयमानः खरं वाक्यं संरब्धमिदमब्रवीत् ॥ १ ॥

एतत्ते बलसर्वस्वं दर्शितं राक्षसाधम ।
शक्तिहीनतरो मत्तो वृथा त्वमवगर्जसि ॥ २ ॥

एषा बाणविनिर्भिन्ना गदा भूमितलं गता ।
अभिधानप्रगल्भस्य तव प्रत्ययघातिनी ॥ ३ ॥

यच्चयोक्तं विनष्टानामिदमास्रप्रमार्जनम् ।
राक्षसानां करोमीति मिथ्या तदपि ते वचः ॥ ४ ॥

नीचस्य क्षुद्रशीलस्य मिथ्यावृत्तस्य रक्षसः ।
प्राणानपहरिष्यामि गरुत्मानमृतं यथा ॥ ५ ॥

अद्य ते भिन्नकण्ठस्य फेनबुद्बुदभूषितम् ।
विदारितस्य मद्बाणैर्महीं पास्यति शोणितम् ॥ ६ ॥

पांसुरूषितसर्वाङ्गः स्रस्तन्यस्तभुजद्वयः ।
स्वप्स्यसे गां समालिङ्ग्य दुर्लभां प्रमदामिव ॥ ७ ॥

प्रबुद्धनिद्रे शयिते त्वयि राक्षसपांसने ।
भविष्यन्त्यशरण्यानां शरण्या दण्डका इमे ॥ ८ ॥

जनस्थाने हतस्थाने तव राक्षस मच्छरैः ।
निर्भया विचरिष्यन्ति सर्वतो मुनयो वने ॥ ९ ॥

अद्य विप्रसरिष्यन्ति राक्षस्यो हतबान्धवाः ।
बाष्पार्द्रवदना दीना भयादन्यभयावहाः ॥ १० ॥

अद्य शोकरसज्ञास्ता भविष्यन्ति निशाचर ।
अनुरूपकुलाः पत्न्यो यासां त्वं पतिरीदृशः ॥ ११ ॥

नृशंस नीच क्षुद्रात्मन्नित्यं ब्राह्मणकण्टक ।
यत्कृते शङ्कितैरग्नौ मुनिभिः पात्यते हविः ॥ १२ ॥

तमेवमभिसंरब्धं ब्रुवाणं राघवं रणे ।
खरो निर्भत्सयामास रोषात् खरतरस्वरः ॥ १३ ॥

दृढं खल्ववलिप्तोऽसि भयेष्वपि च निर्भयः ।
वाच्यावाच्यं ततो हि त्वं मृत्युवश्यो न बुध्यसे ॥ १४ ॥

कालपाशपरिक्षिप्ता भवन्ति पुरुषा हि ये ।
कार्याकार्यं न जानन्ति ते निरस्तषडिन्द्रियाः ॥ १५ ॥

एवमुक्त्वा ततो रामं संरुध्य भ्रुकुटीं ततः ।
स ददर्श महासालमविदूरे निशाचरः ॥
रणे प्रहरणस्यार्थे सर्वतो ह्यवलोकयन् ॥ १६ ॥

स तमुत्पाटयामास सन्दश्य दशनच्छदम् ॥ १७ ॥

तं समुत्क्षिप्य बाहुभ्यां विनर्दित्वा महाबलः ।
राममुद्दिश्य चिक्षेप हतस्त्वमिति चाब्रवीत् ॥ १८ ॥

तमापतन्तं बाणौघैश्छित्त्वा रामः प्रतापवान् ।
रोषमाहारयत्तीव्रं निहन्तुं समरे खरम् ॥ १९ ॥

जातस्वेदस्ततो रामो रोषाद्रक्तान्तलोचनः ।
तं बिभेद सहस्रेण बाणानां समरे खरम् ॥ २० ॥

तस्य बाणान्तराद्रक्तं बहु सुस्राव फेनिलम् ।
गिरेः प्रस्रवणस्येव तोयधारापरिस्रवः ॥ २१ ॥

विह्वलः स कृतो बाणैः खरो रामेण संयुगे ।
मत्तो रुधिरगन्धेन तमेवाभ्यद्रवद्रुतम् ॥ २२ ॥

तमापतन्तं संरब्धं कृतास्त्रो रुधिरप्लुतम् ।
अपासर्पत् प्रतिपदं किञ्चित्त्वरितविक्रमः ॥ २३ ॥

ततः पावकसङ्काशं वधाय समरे शरम् ।
खरस्य रामो जग्राह ब्रह्मदण्डमिवापरम् ॥ २४ ॥

स तं दत्तं मघवता सुरराजेन धीमता ।
सन्दधे चापि धर्मात्मा मुमोच च खरं प्रति ॥ २५ ॥

स विमुक्तो महाबाणो निर्घातसमनिस्वनः ।
रामेण धनुरायम्य खरस्योरसि चापतत् ॥ २६ ॥

स पपात खरो भूमौ दह्यमानः शराग्निना ।
रुद्रेणेव विनिर्दग्धः श्वेतारण्ये यथाऽन्तकः ॥ २७ ॥

स वृत्र इव वज्रेण फेनेन नमुचिर्यथा ।
बलो वेन्द्राशनिहतो निपपात हतः खरः ॥ २८ ॥

ततो राजर्षयः सर्वे सङ्गताः परमर्षयः ।
सभाज्य मुदिता राममिदं वचनमब्रुवन् ॥ २९ ॥

एतदर्थं महातेजा महेन्द्रः पाकशासनः ।
शरभङ्गाश्रमं पुण्यमाजगाम पुरन्दरः ॥ ३० ॥

आनीतस्त्वमिमं देशमुपायेन महर्षिभिः ।
एषां वधार्थं क्रूराणां रक्षसां पापकर्मणाम् ॥ ३१ ॥

तदिदं नः कृतं कार्यं त्वया दशरथात्मज ।
सुखं धर्मं चरिष्यन्ति दण्डकेषु महर्षयः ॥ ३२ ॥

एतस्मिन्नन्तरे देवाश्चारणैः सह सङ्गताः ।
दुन्दुभींश्चाभिनिघ्नन्तः पुष्पवर्षं समन्ततः ॥
रामस्योपरि संहृष्टा ववृषुर्विस्मितास्तदा ॥ ३३ ॥

अर्धाधिकमुहूर्तेन रामेण निशितैः शरैः ।
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ॥ ३४ ॥

खरदूषणमुख्यानां निहतानि महामृधे ।
अहो बत महत्कर्म रामस्य विदितात्मनः ॥ ३५ ॥

अहो वीर्यमहो दाक्ष्यं विष्णोरिव हि दृश्यते ॥ ३६ ॥

इत्येवमुक्त्वा ते सर्वे ययुर्देवा यथागतम् ॥ ३७ ॥

एतस्मिन्नन्तरे वीरो लक्ष्मणः सह सीतया ।
गिरिदुर्गाद्विनिष्क्रम्य संविवेशाश्रमं सुखी ॥ ३८ ॥

ततो रामस्तु विजयी पूज्यमानो महर्षिभिः ।
प्रविवेशाश्रमं वीरो लक्ष्मणेनाभिवादितः ॥ ३९ ॥

तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् ।
बभूव हृष्टा वैदेही भर्तारं परिषस्वजे ॥ ४० ॥

मुदा परमया युक्ता दृष्ट्वा रक्षोगणान् हतान् ।
रामं चैवाव्ययं दृष्ट्वा तुतोष जनकात्मजा ॥ ४१ ॥

ततस्तु तं राक्षससङ्घमर्दनं
सभाज्यमानं मुदितैर्महर्षिभिः ।
पुनः परिष्वज्य शशिप्रभानना
बभूव हृष्टा जनकात्मजा तदा ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे त्रिंशः सर्गः ॥

आदितः श्लोकाः 7744 आरण्यकाण्डे आदितः श्लोकाः 1032



एकत्रिंशः सर्गः

रावणं प्रति खरवधनिवेदनम् ॥

त्वरमाणस्ततो गत्वा जनस्थानादकम्पनः ।
प्रविश्य लङ्कां वेगेन रावणं वाक्यमब्रवीत् ॥ १ ॥

जनस्थानस्थिता राजन् राक्षसा बहवो हताः ।
खरश्च निहतः सङ्ख्ये कथञ्चिदहमागतः ॥ २ ॥

एवमुक्तो दशग्रीवः क्रुद्धः संरक्तलोचनः ।
अकम्पनमुवाचेदं निर्दहन्निव चक्षुषा ॥ ३ ॥

केन रम्यं जनस्थानं हतं मम परासुना ।
कोऽद्य सर्वेषु लोकेषु गतिं नाधिगमिष्यति ॥ ४ ॥

न हि मे विप्रियं कृत्वा शक्यं मघवता सुखम् ।
प्राप्तुं वैश्रवणेनापि न यमेन न विष्णुना ॥ ५ ॥

कालस्य चाप्यहं कालो दहेयमपि पावकम् ।
मृत्युं मरणधर्मेण संयोजयितुमुत्सहे ॥ ६ ॥

वातस्य तरसा वेगं निहन्तुमहमुत्सहे ।
दहेयमपि सङ्क्रुद्धस्तेजसाऽऽदित्यपावकौ ॥ ७ ॥

तथा क्रुद्धं दशग्रीवं कृताञ्जलिरकम्पनः ।
भयात्सन्दिग्धया वाचा रावणं याचतेऽभयम् ॥ ८ ॥

दशग्रीवोऽभयं तस्मै प्रददौ रक्षसां वरः ।
स विसृब्धोऽब्रवीद्वाक्यमसन्दिग्धमकम्पनः ॥ ९ ॥

पुत्रो दशरथस्यास्ति सिंहसंहननो युवा ।
रामो नाम वृषस्कन्धो वृत्तायतमहाभुजः ॥ १० ॥

श्यामः पृथुयशाः श्रीमानतुल्यबलविक्रमः ।
हतं तेन जनस्थानं खरश्च सहदूषणः ॥ ११ ॥

अकम्पनवचः श्रुत्वा रावणो राक्षसाधिपः ।
नागेन्द्र इव निःश्वस्य इदं वचनमब्रवीत् ॥ १२ ॥

ससुरेन्द्रेण संयुक्तो रामः सर्वामरैः सह ।
उपयातो जनस्थानं ब्रूहि कच्चिदकम्पन ॥ १३ ॥

रावणस्य पुनर्वाक्यं निशम्य तदकम्पनः ।
आचचक्षे बलं तस्य विक्रमं च महात्मनः ॥ १४ ॥

रामो नाममहातेजाः श्रेष्ठः सर्वधनुष्मताम् ।
दिव्यास्त्रगुणसम्पन्नः पुरन्दरसमो युधि ॥ १५ ॥

तस्यानुरूपो बलवान्रक्ताक्षो दुन्दुभिस्वनः ।
कनीयान् लक्ष्मणो नाम भ्राता शशिनिभाननः ॥१६॥

स तेन सह संयुक्तः पावकेनानिलो यथा ।
श्रीमान्राजवरस्तेन जनस्थानं निपातितम् ॥ १७ ॥

नैव देवा महात्मानो नात्र कार्या विचारणा ॥ १८ ॥

शरा रामेण तूत्सृष्टा रुक्मपुङ्खाः पतत्रिणः ।
सर्पाः पञ्चानना भूत्वा भक्षयन्ति स्म राक्षसान् ॥ १९ ॥

येन येन च गच्छन्ति राक्षसा भयकर्शिताः ।
तेन तेन स्म पश्यन्ति राममेवाग्रतः स्थितम् ॥
इत्थं विनाशितं तेन जनस्थानं तवानघ ॥ २० ॥

अकम्पनवचः श्रुत्वा रावणो वाक्यमब्रवीत् ।
गमिष्यामि जनस्थानं रामं हन्तुं सलक्ष्मणम् ॥ २१ ॥

अथैवमुक्ते वचने प्रोवाचेदमकम्पनः ।
शृणु राजन् यथावृत्तं रामस्य बलपौरुषम् ॥ २२ ॥

असाध्यः कुपितो रामो विक्रमेण महायशाः ।
आपगायाः सुपूर्णाया वेगं परिहरेच्छरैः ॥ २३ ॥

सताराग्रहनक्षत्रं नभश्चाप्यवसादयेत् ।
असौ रामस्तु मज्जन्तीं श्रीमानभ्युद्धरेन्महीम् ॥ २४ ॥

भित्त्वा वेलां समुद्रस्य लोकानाप्लावयेद्विभुः ।
वेगं वापि समुद्रस्य वायुं वा विधमेच्छरैः ॥ २५ ॥

संहृत्य वा पुनर्लोकान् विक्रमेण महायशाः ।
शक्तः स पुरुषव्याघ्रः स्रष्टुं पुनरपि प्रजाः ॥ २६ ॥

न हि रामो दशग्रीव शक्यो जेतुं त्वया युधि।
रक्षसां वाऽपि लोकेन स्वर्गः पापजनैरिव ॥ २७ ॥

न तं वध्यमहं मन्ये सर्वैर्देवासुरैरपि ।
अयं तस्य वधोपायस्तं ममैकमनाः शृणु ॥ २८ ॥

भार्या तस्योत्तमा लोके सीता नाम सुमध्यमा।
श्यामा समविभक्ताङ्गी स्त्रीरत्नं रत्नभूषिता ॥ २९ ॥

नैव देवी न गन्धर्वी नाप्सरा नापि दानवी।
तुल्या सीमन्तिनी तस्या मानुषीषु कुतो भवेत् ॥ ३० ॥

तस्यापहर भार्यां त्वं प्रमथ्य तु महावने।
सीतया रहितः कामी रामो हास्यति जीवितम् ॥ ३१ ॥

अरोचयत तद्वाक्यं रावणो राक्षसाधिपः।
चिन्तयित्वा महाबाहुरकम्पनमुवाच ह ॥ ३२ ॥

बाढं काल्यं गमिष्यामि ह्येकः सारथिना सह।
आनयिष्यामि वैदेहीमिमां हृष्टो महापुरीम् ॥ ३३ ॥

अथैवमुक्त्वा प्रययौ खरयुक्तेन रावणः।
रथेनादित्यवर्णेन दिशः सर्वाः प्रकाशयन् ॥ ३४ ॥

स रथो राक्षसेन्द्रस्य नक्षत्रपथगो महान्।
सञ्चार्यमाणः शुशुभे जलदे चन्द्रमा इव ॥ ३५ ॥

स मारीचाश्रमं प्राप्य ताटकेयमुपागमत्।
मारीचेनार्चितो राजा भक्ष्यभोज्यैरमानुषैः ॥ ३६ ॥

तं स्वयं पूजयित्वा तु आसनेनोदकेन च।
अर्थोपहितया वाचा मारीचो वाक्यमब्रवीत् ॥ ३७ ॥

कच्चित् सुकुशलं राजन् लोकानां राक्षसेश्वर।
आशङ्के नाथ जाने त्वं यतस्त्वूर्णमिहागतः ॥ ३८ ॥

एवमुक्तो महातेजा मारीचेन स रावणः।
ततः पश्चादिदं वाक्यमब्रवीद्वाक्यकोविदः ॥ ३९ ॥

आरक्षो मे हतस्तात रामेणाक्लिष्टकर्मणा।
जनस्थानमवध्यं तत्सर्वं युधि निपातितम् ॥
तस्य मे कुरु साचिव्यं तस्य भार्यापहारणे ॥ ४० ॥

राक्षसेन्द्रवचः श्रुत्वा मारीचो वाक्यमब्रवीत् ॥ ४१ ॥

आख्याता केन सा सीता मित्ररूपेण शत्रुणा।
त्वया राक्षसशार्दूल को न नन्दति निन्दितः ॥
सीतामिहानयस्वेति को ब्रवीति ब्रवीहि मे ॥ ४२ ॥

रक्षोलोकस्य सर्वस्य कः शृङ्गं छेत्तुमिच्छति।
प्रोत्साहयति कश्चित्त्वां स हि शत्रुरसंशयः ॥ ४३ ॥

आशीविषमुखादंष्ट्रामुद्धर्तुं चेच्छति त्वया।
कर्मणाऽनेन केनासि कापथं प्रतिपादितः ॥ ४४ ॥

सुखसुप्तस्य ते राजन् प्रहृतं केन मूर्धनि ॥ ४५ ॥

विशुद्धवंशाभिजनाग्रहस्तः
तेजोमदः संस्थितदोर्विषाणः।
उदीक्षितुं रावण नेह युक्तः
स संयुगे राघवगन्धहस्ती ॥ ४६ ॥

असौ रणाग्रस्थितिसन्धिवालो
विदग्धरक्षोमृगहा नृसिंहः ।
सुप्तस्त्वया बोधयितुं न युक्तः
शराङ्कपूर्णो निशितासिदंष्ट्रः ॥ ४७ ॥

चापावहारे भुजवेगपङ्के
शरोर्मिमाले सुमहाहवौघे ।
न रामपातालमुखेऽतिघोरे
प्रस्कन्दितुं राक्षसराज युक्तम् ॥ ४८ ॥

प्रसीद लङ्केश्वर राक्षसेन्द्र लङ्कां
प्रसन्नो भव साधु गच्छ ।
त्वं स्वेषु दारेषु रमस्व नित्यं
रामः सभार्यो रमतां वनेषु ॥ ४९ ॥

एवमुक्तो दशग्रीवो मारीचेन स रावणः ।
न्यवर्तत पुरीं लङ्कां विवेश च गृहोत्तमम् ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकत्रिंशः सर्गः ॥

आदितः श्लोकाः 7794 आरण्यकाण्डे आदितः श्लोकाः 1082



द्वात्रिंशः सर्गः

रावणसमीपे शूर्पणखागमनम् ॥

ततश्शूर्पणखा दृष्ट्वा सहस्राणि चतुर्दश ।
हतान्येकेन रामेण रक्षसां भीमकर्मणाम् ॥ १ ॥

दूषणञ्च खरञ्चैव हतं त्रिशिरसं तथा ।
दृष्ट्वा पुनर्महानादं ननाद जलदो यथा ॥ २ ॥

सा दृष्ट्वा कर्म रामस्य कृतमन्यैस्सुदुष्करं ।
जगाम परमोद्विग्ना लङ्कां रावणपालिताम् ॥ ३ ॥

सा ददर्श विमानाग्रे रावणं दीप्ततेजसम् ।
उपोपविष्टं सचिवैर्मरुद्भिरिव वासवम् ॥ ४ ॥

आसीनं सूर्यसङ्काशे काञ्चने परमासने ।
रुक्मवेदिगतं प्राज्यं ज्वलन्तमिव पावकम् ॥ ५ ॥

देवगन्धर्वभूतानामृषीणाञ्च महात्मनाम् ।
अजेयं समरे शूरं व्यात्ताननमिवान्तकम् ॥ ६ ॥

देवासुरविमर्देषु वज्राशनिकृतव्रणम् ।
ऐरावतविषाणाग्रैरुत्कृत्तकिणवक्षसम् ॥ ७ ॥

विंशद्भुजं दशग्रीवं दर्शनीयपरिच्छदम् ।
विशालवक्षसं वीरं राजलक्षणशोभितम् ॥ ८ ॥

स्निग्धवैडूर्यसङ्काशं तप्तकाञ्चनभूषणम् ।
सुभुजं शुक्लदशनं महास्यं पर्वतोपमम् ॥ ९ ॥

विष्णुचक्रनिपातैश्च शतशो देवसंयुगे ।
अन्यैः शस्त्रैः प्रहारैश्च महायुद्धेषु ताडितम् ॥ १० ॥

आहताङ्गं समस्तैश्च देवप्रहरणैस्तथा ।
अक्षोभ्याणां समुद्राणां क्षोभकं क्षिप्रकारिणम् ॥ ११ ॥

क्षेप्तारं पर्वतेन्द्राणां सुराणाञ्च प्रमर्दनम् ।
उच्छेत्तारञ्च धर्माणां परदाराभिमर्शनम् ॥ १२ ॥

सर्वदिव्यास्त्रयोक्तारं यज्ञविघ्नकरं सदा ॥ १३ ॥

पुरीं भोगवतीं गत्वा पराजित्य च वासुकिम् ।
तक्षकस्य प्रियां भार्यां पराजित्य जहार यः ॥ १४ ॥

कैलासपर्वतं गत्वा विजित्य नरवाहनम् ।
विमानं पुष्पकं तस्य कामगं वै जहार यः ॥ १५ ॥

वनं चैत्ररथं दिव्यं नलिनीं नन्दनं वनम् ।
विनाशयति यः क्रोधादेवोद्यानानि वीर्यवान् ॥ १६ ॥

चन्द्रसूर्यौ महाभागावुत्तिष्ठन्तौ परन्तपौ ।
निवारयति बाहुभ्यां यः शैलशिखरोपमः ॥ १७ ॥

दशवर्षसहस्राणि तपस्तप्त्वा महावने ।
पुरा स्वयम्भुवे धीरः शिरांस्युपजहार यः ॥ १८ ॥

देवदानवगन्धर्वमानवोरगैः ।
अभयं यस्य संग्रामे मृत्युतो मानुषादृते ॥ १९ ॥

मन्त्रैरभिष्टुतं पुण्यमध्वरेषु द्विजातिभिः ।
हविर्धानेषु यः सोममुपहन्ति महाबलः ॥ २० ॥

आप्तयज्ञहरं क्रूरं ब्रह्मघ्नं दुष्टचारिणम् ।
कर्कशं निरनुक्रोशं प्रजानामहिते रतम् ॥ २१ ॥

रावणं सर्वलोकानां सर्वभूतभयावहम् ।
राक्षसी भ्रातरं क्रूरं सा ददर्श महाबलम् ॥ २२ ॥

तं दिव्यवस्त्राभरणं दिव्यमाल्योपशोभितम् ।
आसने सूपविष्टं तं कालकालमिवोद्यतम् ॥ २३ ॥

राक्षसेन्द्रं महाभागं पौलस्त्यकुलनन्दनम् ।
रावणं शत्रुहन्तारं मन्त्रिभिः परिवारितम् ।
अभिगम्याब्रवीद्वाक्यं राक्षसी भयविह्वला ॥ २४ ॥

तमब्रवीद्दीप्तविशाललोचनं
प्रदर्शयित्वा भयमोहमूर्च्छिता ।
सुदारुणं वाक्यमभीतचारिणी
महात्मना शूर्पणखा विरूपिता ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे द्वात्रिंशः सर्गः ॥

त्रयस्त्रिंशः सर्गः

रावणनिन्दा ॥

ततश्शूर्पणखा दीना रावणं लोकरावणम् ।
अमात्यमध्ये सङ्क्रुद्धा परुषं वाक्यमब्रवीत् ॥ १ ॥

प्रमत्तः कामभोगेषु स्वैरवृत्तो निरङ्कुशः ।
समुत्पन्नं भयं घोरं बोद्धव्यं नावबुध्यसे ॥ २ ॥

सक्तं ग्राम्येषु भोगेषु कामवृत्तं महीपतिं ।
लुब्धं न बहुमन्यन्ते श्मशानाग्निमिव प्रजाः ॥ ३ ॥

स्वयं कार्याणि यः काले नानुतिष्ठति पार्थिवः ।
स तु वै सह राज्येन तैश्च कार्यैर्विनश्यति ॥ ४ ॥

अयुक्तचारं दुर्दर्शमस्वाधीनं नराधिपम् ।
वर्जयन्ति नरा दूरान्नदीपङ्कमिव द्विपाः ॥ ५ ॥

ये न रक्षन्ति विषयमस्वाधीना नराधिपाः ।
ते न वृद्धया प्रकाशन्ते गिरयः सागरे यथा ॥ ६ ॥

आत्मवद्भिर्विगृह्य त्वं देवगन्धर्वदानवैः ।
अयुक्तचारश्चपलः कथं राजा भविष्यसि ॥ ७ ॥

त्वं तु बालस्वभावश्च बुद्धिहीनश्च राक्षस ।
ज्ञातव्यन्तु न जानीषे कथं राजा भविष्यसि ॥ ८ ॥

येषां चारश्च कोशश्च नयश्च जयतां वर ।
अस्वाधीना नरेन्द्राणां प्राकृतैस्ते जनैः समाः ॥ ९ ॥

यस्मात्पश्यन्ति दूरस्थान् सर्वानर्थान्नराधिपाः ।
चारेण तस्मादुच्यन्ते राजानो दीर्घचक्षुषः ॥ १० ॥

अयुक्तचारं मन्ये त्वां प्राकृतैः सचिवैर्वृतम् ।
स्वजनं तु जनस्थानं हतं यो नावबुध्यसे ॥ ११ ॥

चतुर्दश सहस्राणि रक्षसां क्रूरकर्मणाम् ।
हतान्येकेन रामेण खरश्च सहदूषणः ॥ १२ ॥

ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः ।
धर्षितश्च जनस्थानं रामेणाक्लिष्टकर्मणा ॥ १३ ॥

त्वं तु लुब्धः प्रमत्तश्च पराधीनश्च रावण ।
विषये स्वे समुत्पन्नं भयं यो नावबुध्यसे ॥ १४ ॥

तीक्ष्णमल्पप्रदातारं प्रमत्तं गर्वितं शठम् ।
व्यसने सर्वभूतानि नाभिधावन्ति पार्थिवम् ॥ १५ ॥

अतिमानिनमग्राह्यमात्मसंभावितं नरम् ।
क्रोधिनं व्यसने हन्ति स्वजनोऽपि महीपतिम् ॥ १६ ॥

नानुतिष्ठति कार्याणि भयेषु न बिभेति च ।
क्षिप्रं राज्याच्च्युतो दीनस्तृणैस्तुल्यो भविष्यति ॥

शुष्ककाष्ठैर्भवेत्कार्यं लोष्टैरपि च पांसुभिः ।
न तु स्थानात्परिभ्रष्टैः कार्यं स्याद्बहुसाधिपैः ॥ १८ ॥

उपभुक्तं यथा वासः स्रजो वा मृदिता यथा ।
एवं राज्यात्परिभ्रष्टः समर्थोऽपि निरर्थकः ॥ १९ ॥

अप्रमत्तश्च यो राजा सर्वज्ञो विजितेन्द्रियः ।
कृतज्ञो धर्मशीलश्च स राजा तिष्ठते चिरम् ॥ २० ॥

नयनाभ्यां प्रसुप्तोऽपि जागर्ति नयचक्षुषा ।
व्यक्तक्रोधप्रसादश्च स राजा पूज्यते जनैः ॥ २१ ॥

त्वं तु रावण दुर्बुद्धिर्गुणैरेतैर्विवर्जितः ।
यस्य तेऽविदितश्चारै रक्षसां सुमहान् वधः ॥ २२ ॥

परावमन्ता विषयेषु सङ्गवान्
न देशकालप्रविभागतत्त्ववित् ।
अयुक्तबुद्धिर्गुणदोषनिश्चये
विपन्नराज्यो न चिराद्विपत्स्यसे ॥ २३ ॥

इति स्वदोषान् परिकीर्तितांस्तया
समीक्ष्य बुध्या क्षणदाचरेश्वरः ।
धनेन दर्पेण बलेन चान्वितो
विचिन्तयामास चिरं स रावणः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे त्रयस्त्रिंशः सर्गः ॥

आदितः श्लोकाः 7843 आरण्यकाण्डे आदितः श्लोकाः 1131



चतुस्त्रिंशः सर्गः

सीताहरणे रावणप्रोत्साहनम् ॥

ततः शूर्पणखां क्रुद्धां ब्रुवन्तीं परुषं वचः ।
अमात्यमध्ये सङ्क्रुद्धः परिपप्रच्छ रावणः ॥ १ ॥

कश्च रामः कथंवीर्यः किंरूपः किंपराक्रमः ।
किमर्थं दण्डकारण्यं प्रविष्टः स दुरासदम् ॥ २ ॥

आयुधं किञ्च रामस्य निहता येन राक्षसाः ।
खरश्च निहतः सङ्ख्ये दूषणस्त्रिशिरास्तथा ॥ ३ ॥

इत्युक्ता राक्षसेन्द्रेण राक्षसी क्रोधमूर्च्छिता ।
ततो रामं यथातत्त्वमाख्यातुमुपचक्रमे ॥ ४ ॥

दीर्घबाहुर्विशालाक्षश्चीरकृष्णाजिनांबरः ।
कन्दर्पसमरूपश्च रामो दशरथात्मजः ॥ ५ ॥

शक्रचापनिभं चापं विकृष्य कनकाङ्गदम् ।
दीप्तान् क्षिपति नाराचान् सर्पानिव महाविषान् ॥ ६ ॥

नाददानं शरान् घोरान्न मुञ्चन्तं शिलीमुखान् ।
न कार्मुकं विकर्षन्तं रामं पश्यामि संयुगे ॥ ७ ॥

हन्यमानन्तु तत्सैन्यं पश्यामि शरवृष्टिभिः ।
इन्द्रेणेवोत्तमं सस्यमाहतं त्वश्मवृष्टिभिः ॥ ८ ॥

रक्षसां भीमरूपाणां सहस्राणि चतुर्दश ।
निहतानि शरैस्तीक्ष्णैस्तेनैकेन पदातिना ॥ ९ ॥

अर्धाधिकमुहूर्तेन खरश्च सहदूषणः ।
ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः ॥ १० ॥

एका कथञ्चिन्मुक्ताऽहं परिभूय महात्मना ।
स्त्रीवधं शङ्कमानेन रामेण विदितात्मना ॥ ११ ॥

भ्राता चास्य महातेजा गुणतस्तुल्यविक्रमः ।
अनुरक्तश्च भक्तश्च लक्ष्मणो नाम वीर्यवान् ॥ १२ ॥

अमर्षी दुर्जयो जेता विक्रान्तो बुद्धिमान् बली ।
रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः ॥ १३ ॥

रामस्य तु विशालाक्षी पूर्णेन्दुसदृशानना ।
धर्मपत्नी प्रिया भर्तुर्नित्यं प्रियहिते रता ॥ १४ ॥

सा सुकेशी सुनासोरुः सुरूपा च यशस्विनी ।
देवतेव वनस्थास्य राजते श्रीरिवापरा ॥ १५ ॥

तप्तकाञ्चनवर्णाभा रक्ततुङ्गनखी शुभा ।
सीता नाम वरारोहा वैदेही तनुमध्यमा ॥ १६ ॥

नैव देवी न गन्धर्वी न यक्षी न च किन्नरी ।
नैवंरूपा मया नारी दृष्टपूर्वा महीतले ॥ १७ ॥

यस्य सीता भवेद्भार्या यं च हृष्टा परिष्वजेत् ।
अतिजीवेत्स सर्वेषु लोकेष्विव पुरन्दरः ॥ १८ ॥

सा सुशीला वपुश्श्लाघ्या रूपेणाप्रतिमा भुवि ।
तवानुरूपा भार्या स्याच्चं च तस्यास्तथा पतिः ॥ १९ ॥

तां तु विस्तीर्णजघनां पीनश्रोणिपयोधरां ।
भार्यार्थे च तवानेतुमुद्यताऽहं वराननाम् ॥ २० ॥

विरूपिताऽस्मि क्रूरेण लक्ष्मणेन महाभुज ॥ २१ ॥

तां तु दृष्ट्वाद्य वैदेहीं पूर्णचन्द्रनिभाननाम् ।
मन्मथस्य शराणां वै त्वं विधेयो भविष्यसि ॥ २२ ॥

यदि तस्यामभिप्रायो भार्यार्थे तव जायते ।
शीघ्रमुद्क्रियतां पादो जयार्थमिह दक्षिणः ॥ २३ ॥

कुरु प्रियं तथा तेषां रक्षसां राक्षसेश्वर ।
वधात्तस्य नृशंसस्य रामस्याश्रमवासिनः ॥ २४ ॥

तं शरैर्निशितैर्हत्वा लक्ष्मणं च महारथम् ।
हतनाथां सुखं सीतां यथावदुपभोक्ष्यसे ॥ २५ ॥

रोचते यदि ते वाक्यं ममैतद्राक्षसेश्वर ।
क्रियतां निर्विशङ्केन वचनं मम रावण ॥ २६ ॥

विज्ञायेहात्मशक्तिं च ह्रियतामबला बलात् ।
सीता तवानवद्याङ्गी भार्यार्थे राक्षसेश्वर ॥ २७ ॥

दिव्याभरणमाल्याभिर्दिव्यरूपाभिरावृतम् ।
क्रीडारतिविधिज्ञाभिरप्सरोभिस्सहस्रशः ॥ १६ ॥

सेवितं देवपत्नीभिः श्रीमतीभिः श्रिया वृतम् ।
देवदानवसङ्घैश्च चरितं त्वमृताशिभिः ॥ १७ ॥

हंसक्रौञ्चप्लवाकीर्णं सारसैः संप्रणादितम् ।
वैडूर्यप्रस्तरं रम्यं स्निग्धं सागरतेजसा ॥ १८ ॥

पाण्डराणि विशालानि दिव्यमाल्ययुतानि च ।
तूर्यगीताभिजुष्टानि विमानानि समन्ततः ॥ १९ ॥

तपसा जितलोकानां कामगान्यभिसंपतन् ।
गन्धर्वाप्सरसश्चैव ददर्श धनदानुजः ॥ २० ॥

निर्यासरसमूलानां चन्दनानां सहस्रशः ।
वनानि पश्यन् सौम्यानि घ्राणतृप्तिकराणि च ॥ २१ ॥

अगरूणां च मुख्यानां वनान्युपवनानि च ।
तक्कोलानां च जात्यानां फलानां च सुगन्धिनाम् ॥ २२ ॥

पुष्पाणि च तमालस्य गुल्मानि मरिचस्य च ।
मुक्तानां च समूहानि शुष्यमाणानि तीरतः ॥ २३ ॥

शङ्खानां प्रस्तरं चैव प्रवाळनिचयं तथा ।
काञ्चनानि च शैलानि राजतानि च सर्वशः ॥ २४ ॥

प्रस्रवाणि मनोज्ञानि प्रसन्नानि ह्रदानि च ।
धनधान्योपपन्नानि स्त्रीरत्नैरावृतानि च ॥ २५ ॥

हस्त्यश्वरथगाढानि नगराण्यवलोकयन् ।
तं समं सर्वतः स्निग्धं मृदुसंस्पर्शमारुतम् ॥ २६ ॥

अनूपं सिन्धुराजस्य ददर्श त्रिदिवोपमम् ॥ २७ ॥

तत्रापश्यत् स मेघाभं न्यग्रोधमृषिभिर्वृतम् ।
समन्ताद्यस्य ताः शाखाः शतयोजनमायताः ॥ २८ ॥

यस्य हस्तिनमादाय महाकायं च कच्छपम् ।
भक्षार्थं गरुडः शाखामाजगाम महाबलः ॥ २९ ॥

तस्य तां सहसा शाखां भारेण पतगोत्तमः ।
सुपर्णः पर्णबहुलां बभञ्ज च महाबलः ॥ ३० ॥

तत्र वैखानसा माषाः वालखिल्या मरीचिपाः ।
अजा बभूवुर्धूम्राश्च सङ्गताः परमर्षयः ॥ ३१ ॥

तेषां दयार्थं गरुडस्तां शाखां शतयोजनाम् ।
जगामादाय वेगेन तौ चोभौ गजकच्छपौ ॥
[illegible]देन धर्मात्मा भक्षयित्वा तदामिषम् ॥ ३२ ॥

निषादविषयं हत्वा शाखया पतगोत्तमः ।
प्रहर्षमतुलं लेभे मोक्षयित्वा महामुनीन् ॥ ३३ ॥

स तेनैव प्रहर्षेण द्विगुणीकृतविक्रमः ।
अमृतानयनार्थं वै चकार मतिमान् मतिम् ॥ ३४ ॥

अयोजालानि निर्मथ्य भित्त्वा रत्नमयं गृहम् ।
महेन्द्रभवनाद्वृक्षमाजहारामृतं ततः ॥ ३५ ॥

तं महर्षिगणैर्जुष्टं सुपर्णकृतलक्षणम् ।
नाम्ना सुभद्रं न्यग्रोधं ददर्श धनदानुजः ॥ ३६ ॥

तं तु गत्वा परं पारं समुद्रस्य नदीपतेः ।
ददर्शाश्रममेकान्ते रम्ये पुण्ये वनान्तरे ॥ ३७ ॥

तत्र कृष्णाजिनधरं जटावल्कलधारिणम् ।
ददर्श नियताहारं मारीचं नाम राक्षसम् ॥ ३८ ॥

स रावणः समागम्य विधिवत्तेन रक्षसा ।
मारीचेनार्चितो राजा सर्वकामैरमानुषैः ॥ ३९ ॥

तं स्वयं पूजयित्वा तु भोजनेनोदकेन च ।
अर्थोपहितया वाचा मारीचो वाक्यमब्रवीत् ॥ ४० ॥

कच्चित् सुकुशलं राजन् लङ्कायां राक्षसेश्वर ।
केनार्थेन पुनस्त्वं वै तूर्णमेवमिहागतः ॥ ४१ ॥

एवमुक्तो महातेजा मारीचेन स रावणः ।
ततः पश्चादिदं वाक्यमब्रवीद्वाक्यकोविदः ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे पञ्चत्रिंशः सर्गः ॥

आदितः श्लोकाः 7914 आरण्यकाण्डे आदितः श्लोकाः 1202

षट्त्रिंशः सर्गः

साहाय्यकरणप्रार्थनम् ॥

मारीच श्रूयतां तात वचनं मम भाषतः ।
आर्तोऽस्मि मम चार्तस्य भवान् हि परमा गतिः ॥ १ ॥

जानीषे त्वं जनस्थानं भ्राता यत्र खरो मम ।
दूषणश्च महाबाहुः स्वसा शूर्पणखा च मे ॥ २ ॥

त्रिशिराश्च महातेजा राक्षसः पिशिताशनः ।
अन्ये च बहवः शूरा लब्धलक्षा निशाचराः ॥ ३ ॥

वसन्ति मन्नियोगेन अधिवासं च राक्षसाः ।
बाधमाना महारण्ये मुनीन् वै धर्मचारिणः ॥ ४ ॥

चतुर्दश सहस्राणि रक्षसां भीमकर्मणां ।
शूराणां लब्धलक्षाणां खरचित्तानुवर्तिनाम् ॥ ५ ॥

ते त्विदानीं जनस्थाने वर्तमाना महाबलाः ।
सङ्गताः परमायत्ता रामेण सह संयुगे ।
नानाप्रहरणोपेताः खरप्रमुखराक्षसाः ॥ ६ ॥

तेन सञ्जातरोषेण रामेण रणमूर्धनि ।
अनुक्त्वा परुषं किञ्चित् शरैर्व्यापारितं धनुः ॥ ७ ॥

चतुर्दश सहस्राणि रक्षसामुग्रतेजसाम् ।
निहतानि शरैस्तीक्ष्णैर्मानुषेण पदातिना ॥ ८ ॥

खरश्च निहतः सङ्ख्ये दूषणश्च निपातितः ।
हतश्च त्रिशिराश्चापि निर्भया दण्डकाः कृताः ॥ ९ ॥

पित्रा निरस्तः क्रुद्धेन सभार्यः क्षीणजीवितः ।
स हन्ता तस्य सैन्यस्य रामः क्षत्रियपांसनः ॥ १० ॥

दुःशीलः कर्कशस्तीक्ष्णो मूर्खो लुब्धोऽजितेन्द्रियः ।
त्यक्तधर्मो ह्यधर्मात्मा भूतानामहिते रतः ॥ ११ ॥

येन वैरं विनाऽरण्ये सत्त्वमाश्रित्य केवलम् ।
कर्णनासापहारिणी मे विरूपिता ॥ १२ ॥

तस्य भार्यां जनस्थानात् सीतां सुरसुतोपमाम् ।
आनयिष्यामि विक्रम्य सहायस्तत्र मे भव ॥ १३ ॥

त्वया ह्यहं सहायेन पार्श्वस्थेन महाबल ।
भ्रातृभिश्च सुरान् युद्धे समग्रान्नाभिचिन्तये ॥ १४ ॥

तत्सहायो भव त्वं मे समर्थो ह्यसि राक्षस ।
वीर्ये युद्धे च दर्पे च नह्यस्ति सदृशस्तव ॥ १५ ॥

उपायज्ञो महान् शूरः सर्वमायाविशारदः ।
एतदर्थमहं प्राप्तस्त्वत्समीपं निशाचर ॥ १६ ॥

शृणु तत्कर्म साहाय्ये यत्कार्यं वचनान्मम ॥ १७ ॥

सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः ।
आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर ॥ १८ ॥

त्वां हि निःसंशयं सीता दृष्ट्वा तु मृगरूपिणम् ।
गृह्यतामिति भर्तारं लक्ष्मणं चाभिधास्यति ॥ १९ ॥

ततस्तयोरपाये तु शून्ये सीतां यथासुखम् ।
निराबाधो हरिष्यामि राहुश्चन्द्रप्रभामिव ॥ २० ॥

ततः पश्चात्सुखं रामे भार्याहरणकर्शिते ।
विस्रब्धः प्रहरिष्यामि कृतार्थेनान्तरात्मना ॥ २१ ॥

तस्य रामकथां श्रुत्वा मारीचस्य महात्मनः ।
शुष्कं समभवद्वक्त्रं परित्रस्तो बभूव सः ॥ २२ ॥

ओष्ठौ परिलिहन् शुष्कौ नेत्रैरनिमिषैरिव ।
मृतभूत इवार्तस्तु रावणं समुदैक्षत ॥ २३ ॥

स रावणं त्रस्तविषण्णचेताः
महावने रामपराक्रमज्ञः ।
कृताञ्जलिस्तत्त्वमुवाच वाक्यं
हितं च तस्मै हितमात्मनश्च ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे षट्त्रिंशः सर्गः

आदितः श्लोकाः 7937 आरण्यकाण्डे आदितः श्लोकाः 1225

सप्तत्रिंशः सर्गः

मारीचकृतोपदेशः ॥

तच्छ्रुत्वा राक्षसेन्द्रस्य वाक्यं वाक्यविशारदः ।
प्रत्युवाच महाप्राज्ञो मारीचो राक्षसेश्वरम् ॥ १ ॥

सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ २ ॥

न नूनं बुध्यसे रामं महावीर्यं गुणोन्नतम् ।
अयुक्तचारश्चपलो महेन्द्रवरुणोपमम् ॥ ३ ॥

अपि स्वस्ति भवेत्तात सर्वेषां भुवि रक्षसाम् ।
अपि रामो न संक्रुद्धः कुर्याल्लोकमराक्षसम् ॥ ४ ॥

अपि ते जीवितान्ताय नोत्पन्ना जनकात्मजा ।
अपि सीतानिमित्तं ते न भवेद्व्यसनं महत् ॥ ५ ॥

अपि त्वामीश्वरं प्राप्य कामवृत्तं निरङ्कुशम् ।
न विनश्येत्पुरी लङ्का त्वया सह सराक्षसा ॥ ६ ॥

त्वद्विधः कामवृत्तो हि दुश्शीलः पापमन्त्रितः ।
आत्मानं स्वजनं राष्ट्रं स राजा हन्ति दुर्मतिः ॥ ७ ॥

न स पित्रा परित्यक्तो नामर्यादः कथंचन ।
न लुब्धो न च दुःशीलो न च क्षत्रियपांसनः ॥ ८ ॥

न च धर्मगुणैर्हीनः कौसल्यानन्दवर्धनः ।
न तीक्ष्णो न च भूतानां सर्वेषामहिते रतः ॥ ९ ॥

वञ्चितं पितरं दृष्ट्वा कैकेय्या सत्यवादिनम् ।
करिष्यामीति धर्मात्मा ततः प्रव्राजितो वनम् ॥ १० ॥

कैकेय्याः प्रियकामार्थं पितुर्दशरथस्य च ।
हित्वा राज्यं च भोगं च प्रविष्टो दण्डकावनम् ॥ ११ ॥

न रामः कर्कशस्तात नाविद्वान्नाजितेन्द्रियः ।
अनृतं दुःश्रुतं चैव नैव त्वं वक्तुमर्हसि ॥ १२ ॥

धर्मो विग्रहवान् रामस्साधुस्सत्यपराक्रमः ।
राजा सर्वस्य लोकस्य देवानां मघवानिव ॥ १३ ॥

कथं त्वं तस्य वैदेह्या रक्षितां स्वेन तेजसा ।
इच्छसि प्रसभं हर्तुं प्रभामिव विवस्वतः ॥ १४ ॥

शरार्चिषमनाधृष्यं चापखड्गेन्धनं रणे ।
रामाग्निं सहसा दीप्तं न प्रवेष्टुं त्वमर्हसि ॥ १५ ॥

धनुर्व्यादितदीप्तास्यं शरजिह्ममहर्षणम् ।
खड्गपाशधरं वीरं शत्रुसैन्यप्रहारिणम् ॥ १६ ॥

राज्यं सुखं च सन्त्यज्य जीवितं चेष्टमात्मनः ।
नात्यासादयितुं तात रामान्तकमिहार्हसि ॥ १७ ॥

अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा ।
न त्वं समर्थस्तां हर्तुं रामपादाश्रयां वने ॥ १८ ॥

तस्य सा नरसिंहस्य सिंहोरस्कस्य भामिनी ।
प्राणेभ्योऽपि प्रियतरा भार्या नित्यमनुव्रता ॥ १९ ॥

न सा धर्षयितुं शक्या मैथिल्योजस्विनः प्रिया।
दीप्तस्येव हुताशस्य शिखा सीता सुमध्यमा ॥ २० ॥

किमुद्यममिमं व्यर्थं कृत्वा ते राक्षसाधिप ।
दृष्ट्वैत्वं रणे तेन तदन्तं तव जीवितम् ॥ २१ ॥

जीवितं च सुखं चैव राज्यं चैव सुदुर्लभम् ।
यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियम् ॥ २२ ॥

स सर्वैस्सचिवैस्सार्धं विभीषणपुरोगमैः ।
मन्त्रयित्वा तु धर्मिष्ठं कृत्वा निश्चयमात्मनः ॥ २३ ॥

दोषाणां च गुणानां च संप्रधार्य बलाबलम् ।
आत्मनश्च बलं ज्ञात्वा राघवस्य च तत्त्वतः ॥ २४ ॥

हिताहितं विनिश्चित्य क्षमं त्वं कर्तुमर्हसि ॥ २५ ॥

अहं तु मन्ये तव न क्षमं रणे
समागमं कोसलराघवेण ।
इदं हि भूयः शृणु वाक्यमुत्तमं
क्षमं च युक्तं च निशाचराधिप ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे सप्तत्रिंशः सर्गः ॥

अष्टत्रिंशः सर्गः

श्रीराममहिमानुवर्णनम् ॥

कदाचिदप्यहं वीर्यात् पर्यटन् पृथिवीमिमाम् ।
बलं नागसहस्रस्य धारयन् पर्वतोपमः ॥ १ ॥

नीलजीमूतसङ्काशस्तप्तकाञ्चनकुण्डलः ।
भयं लोकस्य जनयन् किरीटी परिघायुधः ॥
व्यचरं दण्डकारण्य ऋषिमांसानि भक्षयन् ॥ २ ॥

विश्वामित्रोऽथ धर्मात्मा मद्वित्रस्तो महामुनिः ।
स्वयं गत्वा दशरथं नरेन्द्रमिदमब्रवीत् ॥ ३ ॥

अद्य रक्षतु मां रामः पर्वकाले समाहितः ।
मारीचान्मे भयं घोरं समुत्पन्नं नरेश्वर ॥ ४ ॥

इत्येवमुक्तो धर्मात्मा राजा दशरथस्तदा ।
प्रत्युवाच महाभागं विश्वामित्रं महामुनिम् ॥ ५ ॥

बालो द्वादशवर्षोऽयमकृतास्त्रश्च राघवः ।
कामं तु मम यत्सैन्यं मया सह गमिष्यति ॥ ६ ॥

बलेन चतुरङ्गेण स्वयमेत्य निशाचरान् ।
वधिष्यामि मुनिश्रेष्ठ शत्रूंस्ते मनसेप्सितान् ॥ ७ ॥

इत्येवमुक्तः स मुनी राजानमिदमब्रवीत् ।
रामान्नान्यद्बलं लोके पर्याप्तं तस्य रक्षसः ॥ ८ ॥

देवतानामपि भवान् समरेष्वभिपालकः ।
आसीत्त्वं कृतं कर्म त्रिलोकविदितं नृप ॥ ९ ॥

काममस्तु महत्सैन्यं तिष्ठत्विह परन्तप ॥ १० ॥

बालोऽप्येष महातेजाः समर्थस्तस्य निग्रहे ।
गमिष्ये राममादाय स्वस्ति तेऽस्तु परन्तप ॥ ११ ॥

एवमुक्त्वा तु स मुनिस्तमादाय नृपात्मजम् ।
जगाम परमप्रीतो विश्वामित्रः स्वमाश्रमम् ॥ १२ ॥

तं तदा दण्डकारण्ये यज्ञमुद्दिश्य दीक्षितम् ।
बभूवोपस्थितो रामश्चित्रं विस्फारयन् धनुः ॥ १३ ॥

अजातव्यञ्जनः श्रीमान् पद्मपत्रनिभेक्षणः ।
एकवस्त्रधरो धन्वी शिखी [illegible] ॥ १४ ॥

शोभयन् दण्डकारण्यं दीप्तेन स्वेन तेजसा ।
अदृश्यत तदा रामो बालचन्द्र इवोदितः ॥ १५ ॥

ततोऽहं मेघसङ्काशस्तप्तकाञ्चनकुण्डलः ।
बली दत्तवरो दर्पादाजगाम तदाश्रमम् ॥ १६ ॥

तेन दृष्टः प्रविष्टोऽहं सहसैवोद्यतायुधः ।
मां तु दृष्ट्वा धनुः सज्यमसम्भ्रान्तश्चकार सः ॥ १७ ॥

अवजानन्नहं मोहाद्बालोऽयमिति राघवम् ।
विश्वामित्रस्य तां वेदिमभ्यधावं कृतत्वरः ॥ १८ ॥

तेन मुक्तस्ततो बाणः शितः शत्रुनिबर्हणः ।
तेनाहं ताडितः क्षिप्तः समुद्रे शतयोजने ॥ १९ ॥

नेच्छता तात मां हन्तुं तदा वीरेण रक्षितः ।
रामस्य शरवेगेन निरस्तोऽहमचेतनः ॥ २० ॥

पातितोऽहं तदा तेन गम्भीरे सागराम्भसि ।
प्राप्य संज्ञां चिरात्तात लङ्कां प्रति गतः पुरीम् ॥ २१ ॥

एवमस्मि तदा मुक्तः सहायास्तु निपातिताः ।
अकृतास्त्रेण रामेण बालेनाक्लिष्टकर्मणा ॥ २२ ॥

तन्मया वार्यमाणस्त्वं यदि रामेण विग्रहम् ।
करिष्यस्यापदं घोरां क्षिप्रं प्राप्य नशिष्यसि ॥ २३ ॥

क्रीडारतिविधिज्ञानां समाजोत्सवशालिनाम् ।
रक्षसां चैव सन्तापमनर्थं चाहरिष्यसि ॥ २४ ॥

हर्म्यप्रासादसंबाधां नानारत्नविभूषिताम् ।
द्रक्ष्यसि त्वं पुरीं लङ्कां विनष्टां मैथिलीकृते ॥ २५ ॥

अकुर्वन्तोऽपि पापानि शुचयः पापसंश्रयात् ।
परपापैर्विनश्यन्ति मत्स्या नागह्रदे यथा ॥ २६ ॥

दिव्यचन्दनदिग्धाङ्गान् दिव्याभरणभूषितान् ।
द्रक्ष्यस्यभिहतान् भूमौ तव दोषात्तु राक्षसान् ॥ २७ ॥

हृतदारान् सदारांश्च दश विद्रवतो दिशः ।
हतशेषानशरणान् द्रक्ष्यसि त्वं निशाचरान् ॥ २८ ॥

शरजालपरिक्षिप्तामग्निज्वालासमावृताम् ।
प्रदग्धभवनां लङ्कां द्रक्ष्यसि त्वं न संशयः ॥ २९ ॥

परदाराभिमर्शात्तु नान्यत्पापतरं महत् ।
प्रमदानां सहस्राणि तव राजन् परिग्रहः ॥ ३० ॥

भव स्वदारनिरतः स्वकुलं रक्ष राक्षस ।
मानमृद्धिं च राज्यं च जीवितं चेष्टमात्मनः ॥ ३१ ॥

कलत्राणि च सौम्यानि मित्रवर्गं तथैव च ।
यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियम् ॥ ३२ ॥

निवार्यमाणः सुहृदा मया भृशं
प्रसह्य सीतां यदि धर्षयिष्यसि ।
गमिष्यसि क्षीणबलः सबान्धवो
यमक्षयं रामशरार्चितजीवितः ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे अष्टत्रिंशः सर्गः ॥

आदितः श्लोकाः 7996 आरण्यकाण्डे आदितः श्लोकाः 1284



एकोनचत्वारिंशः सर्गः

साहाय्यकरणनिषेधः ॥

एवमस्मि तदा मुक्तः कथञ्चित्तेन संयुगे ।
इदानीमपि यद्वृत्तं तच्छृणुष्व निरुत्तरम् ॥ १ ॥

राक्षसाभ्यामहं द्वाभ्यामनिर्विण्णस्तथा कृतः ।
सहितो मृगरूपाभ्यां प्रविष्टो दण्डकावनम् ॥ २ ॥

दीप्तजिह्वो महाकायस्तीक्ष्णशृङ्गो महाबलः ।
व्यचरं दण्डकारण्यं मांसभक्षो महामृगः ॥ ३ ॥

अग्निहोत्रेषु तीर्थेषु चैत्यवृक्षेषु रावण ।
अत्यन्तघोरो व्यचरं तापसान् संप्रधर्षयन् ॥ ४ ॥

निहत्य दण्डकारण्ये तापसान् धर्मचारिणः ।
रुधिराणि पिबंस्तेषां तथा मांसानि भक्षयन् ॥ ५ ॥

ऋषिमांसाशनः क्रूरस्त्रासयन् वनगोचरान् ।
तथा रुधिरमत्तोऽहं विचरन् धर्मदूषकः ॥ ६ ॥

आसादयं तदा रामं तापसं धर्मचारिणम् ।
वैदेहीं च महाभागां लक्ष्मणं च महारथम् ॥ ७ ॥

तापसं नियताहारं सर्वभूतहिते रतम् ।
सोऽहं वनगतं रामं परिभूय महाबलम् ॥ ८ ॥

तापसोऽयमिति ज्ञात्वा पूर्ववैरमनुस्मरन् ।
अभ्यधावं हि संक्रुद्धस्तीक्ष्णशृङ्गो मृगाकृतिः ॥ ९ ॥

जिघांसुरकृतप्रज्ञस्तं प्रहारमनुस्मरन् ।
तेन मुक्तास्त्रयो बाणाः शिताः शत्रुनिबर्हणाः ॥
विकृष्य बलवच्चापं सुपर्णानिलतुल्यगाः ॥ १० ॥

ते बाणा वज्रसङ्काशाः सुमुक्ता रक्तभोजनाः ।
आजग्मुः सहिताः सर्वे त्रयः सन्नतपर्वणः ॥ ११ ॥

पराक्रमज्ञो रामस्य शठो दृष्टभयः पुरा ।
समुद्भ्रान्तस्ततो मुक्तस्तावुभौ राक्षसौ हतौ ॥ १२ ॥

शरेण मुक्तो रामस्य कथञ्चित् प्राप्य जीवितम् ।
इह प्रव्राजितो युक्तस्तापसोऽहं समाहितः ॥ १३ ॥

वृक्षेवृक्षे च पश्यामि चीरकृष्णाजिनाम्बरम् ।
गृहीतधनुषं रामं पाशहस्तमिवान्तकम् ॥ १४ ॥

अपि रामसहस्राणि भीतः पश्यामि रावण ।
रामभूतमिदं सर्वमरण्यं प्रतिभाति मे ॥ १५ ॥

राममेव हि पश्यामि रहिते राक्षसेश्वर ।
दृष्ट्वा स्वप्नगतं राममुद्भ्रमामि विचेतनः ॥ १६ ॥

रकारादीनि नामानि रामत्रस्तस्य रावण ।
रत्नानि च रथाश्चैव त्रासं सञ्जनयन्ति मे ॥ १७ ॥

अहं तस्य प्रभावज्ञो न युद्धं तेन ते क्षमम् ।
बलिं वा नमुचिं वाऽपि हन्याद्धि रघुनन्दनः ॥ १८ ॥

रणे रामेण संयोद्धुं न क्षमं तव रावण ।
न ते रामकथा कार्या न चैनं द्रष्टुमर्हसि ॥ १९ ॥

बहवः साधवो लोके युक्ता धर्ममनुष्ठिताः ।
परेषामपराधेन विनष्टाः सपरिच्छदाः ॥ २० ॥

सोऽहं तवापराधेन विनश्येयं निशाचर ।
कुरु यत्ते क्षमं तत्वमहं त्वा नानुयामि ह ॥ २१ ॥

रामश्च हि महातेजा महासत्त्वो महाबलः ।
अपि राक्षसलोकस्य भवेदन्तकरो हि सः ॥ २२ ॥

यदि शूर्पणखाहेतोर्जनस्थानगतः खरः ।
अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा ॥ २३ ॥

अत्र ब्रूहि यथा तत्त्वं को रामस्य व्यतिक्रमः ॥ २४ ॥

इदं वचो बन्धुहितार्थिना मया
यथोच्यमानं यदि नाभिपत्स्यसे ।
सबान्धवस्त्यक्ष्यसि जीवितं रणे
हतोऽद्य रामेण शरैरजिह्मगैः ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकोनचत्वारिंशः सर्गः ॥



चत्वारिंशः सर्गः

मायामृगरूपग्रहणचोदना ॥

मारीचेन तु तद्वाक्यं क्षेमयुक्तं निशाचरः ।
उक्तो न प्रतिजग्राह मर्तुकाम इवौषधम् ॥ १ ॥

तं पथ्यहितवक्तारं मारीचं राक्षसाधिपः ।
अब्रवीत् परुषं वाक्यमयुक्तं कालचोदितः ॥ २ ॥

यत्किलैतदयुक्तार्थं मारीच मयि कथ्यते ।
वाक्यं निष्फलमत्यर्थमुप्तं बीजमिवोषरे ॥ ३ ॥

त्वद्वाक्यैर्न तु मां शक्यं भेत्तुं रामस्य संयुगे ।
पापशीलस्य मूर्खस्य मानुषस्य विशेषतः ॥ ४ ॥

यस्त्यक्त्वा सुहृदो राज्यं मातरं पितरं तथा ।
स्त्रीवाक्यं प्राकृतं श्रुत्वा वनमेकपदे गतः ॥ ५ ॥

अवश्यं तु मया तस्य संयुगे खरघातिनः ।
प्राणैः प्रियतरा सीता हर्तव्या तव सन्निधौ ॥ ६ ॥

एवं मे निश्चिता बुद्धिर्हृदि मारीच वर्तते ।
न व्यावर्तयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ ७ ॥

दोषं गुणं वा संपृष्टस्त्वमेवं वक्तुमर्हसि ।
अपायं वाप्युपायं वा कार्यस्यास्य विनिश्चये ॥ ८ ॥

संपृष्टेन तु वक्तव्यं सचिवेन विपश्चिता ।
उद्यताञ्जलिना राज्ञे य इच्छेद्भूतिमात्मनः ॥ ९ ॥

वाक्यमप्रतिकूलं तु मृदुपूर्वं हितं शुभम् ।
उपचारेण युक्तं च वक्तव्यो वसुधाधिपः ॥ १० ॥

सावमानं तु यद्वाक्यं मारीच हितमुच्यते ।
नाभिनन्दति तद्राजा मानार्हो मानवर्जितः ॥ ११ ॥

पञ्च रूपाणि राजानो धारयन्त्यमितौजसः ।
अग्नेरिन्द्रस्य सोमस्य वरुणस्य यमस्य च ॥ १२ ॥

औष्ण्यं तथा विक्रमं च सौम्यं दण्डं प्रसन्नताम् ।
धारयन्ति [illegible] राजानः क्षणदाचर ॥
तस्मात्सर्वास्ववस्थासु मान्याः पूज्याश्च पार्थिवाः ॥ १३ ॥

त्वं तु धर्ममविज्ञाय केवलं मोहमास्थितः ।
अभ्यागतं मां दौरात्म्यात् परुषं वक्तुमिच्छसि ॥ १४ ॥

गुणदोषौ न पृच्छामि क्षेमं चात्मनि राक्षस ।
मयोक्तं तव चैतावत् सम्प्रत्यमितविक्रम ॥ १५ ॥

अस्मिंस्तु त्वं महाकृत्ये साहाय्यं कर्तुमर्हसि ।
शृणु तत्कर्म साहाय्ये यत्कार्यं वचनान्मम ॥ १६ ॥

सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः ।
आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर ॥ १७ ॥

प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि ॥ १८ ॥

त्वां तु मायामृगं दृष्ट्वा काञ्चनं जातविस्मया ।
आनयैनमिति क्षिप्रं रामं वक्ष्यति मैथिली ॥ १९ ॥

अपक्रान्ते तु काकुत्स्थे दूरं यात्वा व्युदाहर ।
हा सीते लक्ष्मणेत्येवं रामवाक्यानुरूपकम् ॥ २० ॥

तच्छ्रुत्वा रामपदवीं सीतया च प्रचोदितः ।
अनुगच्छति संभ्रान्तः सौमित्रिरपि सौहृदात् ॥ २१ ॥

अपक्रान्ते च काकुत्स्थे लक्ष्मणे च यथासुखम् ।
आनयिष्यामि वैदेहीं सहस्राक्षः शचीमिव ॥ २२ ॥

एवं कृत्वा त्विदं कार्यं यथेष्टं गच्छ राक्षस ।
राज्यस्यार्धं प्रदास्यामि मारीच तव सुव्रत ॥ २३ ॥

गच्छ सौम्य शिवं मार्गं कार्यस्यास्य विवृद्धये ।
अहं त्वानुगमिष्यामि सरथो दण्डकावनम् ॥ २४ ॥

प्राप्य सीतामयुद्धेन वञ्चयित्वा तु राघवौ ।
लङ्कां प्रति गमिष्यामि कृतकार्यः सह त्वया ॥ २५ ॥

न चेत् करोषि मारीच हन्मि त्वामहमद्य वै ।
एतत्कार्यमवश्यं मे बलादपि करिष्यसि ॥ २६ ॥

राज्ञो हि प्रतिकूलस्थो न जातु सुखमेधते ॥ २७ ॥

आसाद्य तं जीवितसंशयस्ते
मृत्युर्ध्रुवो ह्यद्य मया विरुध्य ।
एतद्यथावत्परिगृह्य बुध्या
यदत्र पथ्यं कुरु तत्तथा त्वम् ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे चत्वारिंशः सर्गः ॥

आदितः श्लोकाः 8049 आरण्यकाण्डे आदितः श्लोकाः 1337

एकचत्वारिंशः सर्गः

पुनर्मारीचोपदेशः ॥

आज्ञप्तोऽराजवद्वाक्यं प्रतिकूलं निशाचरः ।
अब्रवीत् परुषं वाक्यं मारीचो राक्षसाधिपम् ॥ १ ॥

केनायमुपदिष्टस्ते विनाशः पापकर्मणा ।
सपुत्रस्य सराष्ट्रस्य सामात्यस्य निशाचर ॥ २ ॥

कस्त्वया सुखिना राजन्नाभिनन्दति पापकृत् ।
केनेदमुपदिष्टं ते मृत्युद्वारमपावृतम् ॥ ३ ॥

शत्रवस्तव सुव्यक्तं हीनवीर्या निशाचराः ।
इच्छन्ति त्वां विनश्यन्तमुपरुद्धं बलीयसा ॥ ४ ॥

केनेदमुपदिष्टं ते क्षुद्रेणाहितवादिना ।
यस्त्वामिच्छति नश्यन्तं स्वकृतेन निशाचर ॥ ५ ॥

वध्या खलु न हन्यन्ते सचिवास्तव रावण ।
ये त्वामुत्पथमारूढं न निगृह्णन्ति सर्वशः ॥ ६ ॥

अमात्यैः कामवृत्तो हि राजा कापथमाश्रितः ।
निग्राह्यः सर्वथा सद्भिर्न निग्राह्यो निगृह्यसे ॥ ७ ॥

धर्ममर्थं च कामं च यशश्च जयतां वर ।
स्वामिप्रसादात् सचिवाः प्राप्नुवन्ति निशाचर ॥ ८ ॥

विपर्यये तु तत्सर्वं व्यर्थं भवति रावण ।
व्यसनं स्वामिवैगुण्यात् प्राप्नुवन्तीतरे जनाः ॥ ९ ॥

राजमूलो हि धर्मश्च यशश्च जयतां वर ।
तस्मात् सर्वास्ववस्थासु रक्षितव्या नराधिपाः ॥ १० ॥

राज्यं पालयितुं शक्यं न तीक्ष्णेन निशाचर ।
न चापि प्रतिकूलेन नाविनीतेन राक्षस ॥ ११ ॥

ये तीक्ष्णमन्त्राः सचिवा भज्यन्ते सह तेन वै ।
विषमे तुरगाः शीघ्रा मन्दसारथयो यथा ॥ १२ ॥

बहवः साधवो लोके युक्ता धर्ममनुष्ठिताः ।
परेषामपराधेन विनष्टाः सपरिच्छदाः ॥ १३ ॥

स्वामिना प्रतिकूलेन प्रजास्तीक्ष्णेन रावण ।
रक्ष्यमाणा न वर्धन्ते मेषा गोमायुना यथा ॥ १४ ॥

अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः।
येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ॥ १५ ॥

तदिदं काकतालीयं घोरमासादितं मया।
अत्रैव शोचनीयस्त्वं ससैन्यो विनशिष्यसि ॥ १६ ॥

मां निहत्य तु रामश्च न चिरात्त्वां वधिष्यति।
अनेन कृतकृत्योऽस्मि म्रिये यदरिणा हतः ॥ १७ ॥

दर्शनादेव रामस्य हतं मामुपधारय।
आत्मानं च हतं विद्धि हत्वा सीतां सबान्धवम् ॥ १८ ॥

आनयिष्यसि चेत् सीतामाश्रमात् सहितो मया।
नैव त्वमसि नाहं च नैव लङ्का न राक्षसाः ॥ १९ ॥

निवार्यमाणस्तु मया हितैषिणा
न मृष्यसे वाक्यमिदं निशाचर।
परेतकल्पा हि गतायुषो नरा
हितं न गृह्णन्ति सुहृद्धिरीरितम् ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकचत्वारिंशः सर्गः ॥

आदितः श्लोकाः 8069 आरण्यकाण्डे आदितः श्लोकाः 1357



द्विचत्वारिंशः सर्गः

मायामृगरूपग्रहणम् ॥

एवमुक्त्वा तु परुषं मारीचो रावणं ततः ।
गच्छावेत्यब्रवीद्दीनो भयाद्रात्रिञ्चरप्रभोः ॥ १ ॥

दृष्ट्वाहं पुनस्तेन शरचापासिधारिणा ।
मद्वधोद्यतशस्त्रेण विनष्टं जीवितं च मे ॥ २ ॥

न हि रामं पराक्रम्य जीवन् प्रतिनिवर्तते ।
वर्तते प्रतिरूपोऽसौ यमदण्डहतस्य ते ॥ ३ ॥

किं नु शक्यं मया कर्तुमेवं त्वयि दुरात्मनि ।
एष गच्छाम्यहं तात स्वस्ति तेऽस्तु निशाचर ॥ ४ ॥

प्रहृष्टस्त्वभवत्तेन वचनेन स रावणः ।
परिष्वज्य सुसंश्लिष्टमिदं वचनमब्रवीत् ॥ ५ ॥

एतच्छौण्डीर्ययुक्तं ते मच्छन्दादिव भाषितम् ।
इदानीमसि मारीचः पूर्वमन्यो निशाचरः ॥ ६ ॥

आरुह्यतामयं शीघ्रं रथो रत्नविभूषितः ।
मया सह तथा युक्तः पिशाचवदनैः खरैः ॥ ७ ॥

प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि ।
तां शून्ये प्रसभं सीतामानयिष्यामि मैथिलीम् ॥ ८ ॥

ततो रावणमारीचौ विमानमिव तं रथम् ।
आरुह्य ययतुः शीघ्रं तस्मादाश्रममण्डलात् ॥ ९ ॥

तथैव तत्र पश्यन्तौ पत्तनानि वनानि च ।
गिरींश्च सरितः सर्वा राष्ट्राणि नगराणि च ॥ १० ॥

समेत्य दण्डकारण्यं राघवस्याश्रमं ततः ।
ददर्श सहमारीचो रावणो राक्षसाधिपः ॥ ११ ॥

अवतीर्य रथात्तस्मात्ततः काञ्चनभूषणात् ।
हस्ते गृहीत्वा मारीचं रावणो वाक्यमब्रवीत् ॥ १२ ॥

एतद्रामाश्रमपदं दृश्यते कदलीवृतम् ।
क्रियतां तत् सखे शीघ्रं यदर्थं वयमागताः ॥ १३ ॥

स रावणवचः श्रुत्वा मारीचो राक्षसस्तदा ।
मृगो भूत्वाऽऽश्रमद्वारि रामस्य विचचार ह ॥ १४ ॥

स तु रूपं समास्थाय महदद्भुतदर्शनम् ।
मणिप्रवरशृङ्गाग्रः सितासितमुखाकृतिः ॥ १५ ॥

रक्तपद्मोत्पलमुख इन्द्रनीलोत्पलश्रवाः ।
किञ्चिदभ्युन्नतग्रीव इन्द्रनीलदलाधरः ॥ १६ ॥

कुन्देन्दुवज्रसङ्काशमुदरं चास्य भास्वरम् ।
मधूकनिभपार्श्वश्च पद्मकिञ्जल्कसन्निभः ॥ १७ ॥

वैडूर्यसङ्काशखुरस्तनुजङ्घः सुसंहतः ।
इन्द्रायुधसवर्णेन पुच्छेनोर्ध्वं विराजता ॥ १८ ॥

मनोहरः स्निग्धवर्णो रत्नैर्नानाविधैर्वृतः ।
क्षणेन राक्षसो जातो मृगः परमशोभनः ॥
वनं प्रज्वलयन् रम्यं रामाश्रमपदं च तत् ॥ १९ ॥

मनोहरं दर्शनीयं रूपं कृत्वा स राक्षसः ।
प्रलोभनार्थं वैदेह्या नानाधातुविचित्रितम् ॥
विचरंश्च वनं सर्वं शाद्वलानि समन्ततः ॥ २० ॥

रूप्यैर्बिन्दुशतैश्चित्रो भूत्वा स प्रियदर्शनः ।
विटपीनां किसलयान् भङ्क्त्वाऽदन् विचचार ह ॥ २१ ॥

कदलीगृहकं गत्वा कर्णिकारानितस्ततः ।
समाश्रयन् मन्दगतिः सीतासन्दर्शनं तथा ॥ २२ ॥

राजीवचित्रपृष्ठः स विरराज महामृगः ।
रामाश्रमपदाभ्याशे विचचार यथासुखम् ॥ २३ ॥

पुनर्गत्वा निवृत्तश्च विचचार मृगोत्तमः ।
गत्वा मुहूर्तं त्वरया पुनः प्रतिनिवर्तते ॥ २४ ॥

विक्रीडंश्च क्वचिद्भूमौ पुनरेव निषीदति ।
आश्रमद्वारमागम्य मृगयूथानि गच्छति ॥ २५ ॥

मृगयूथैरनुगतः पुनरेव निवर्तते ॥ २६ ॥

सीतादर्शनमाकाङ्क्षन् राक्षसो मृगतां गतः ।
परिभ्रमति चित्राणि मण्डलानि विनिष्पतन् ॥ २७ ॥

समुद्वीक्ष्य च तं सर्वे मृगा ह्यन्ये वनेचराः ।
उपागम्य समाघ्राय विद्रवन्ति दिशो दश ॥ २८ ॥

राक्षसः सोऽपि तान् वन्यान्मृगान्मृगवधे रतः ।
प्रच्छादनार्थं भावस्य न भक्षयति संस्पृशन् ॥ २९ ॥

तस्मिन्नेव ततः काले वैदेही शुभलोचना ।
कुसुमापचयव्यग्रा पादपानभ्यवर्तत ॥ ३० ॥

कर्णिकारानशोकांश्च चूतांश्च मदिरेक्षणा ।
कुसुमान्यपचिन्वन्ती चचार रुचिरानना ॥ ३१ ॥

अनर्हाऽरण्यवासस्य सा तं रत्नमयं मृगम् ।
मुक्तामणिविचित्राङ्गं ददर्श परमाङ्गना ॥ ३२ ॥

तं सा रुचिरदन्तोष्ठी रूप्यधातुतनूरुहम् ।
विस्मयोत्फुल्लनयना सस्नेहं समुदैक्षत ॥ ३३ ॥

स च तां रामदयितां पश्यन् मायामयो मृगः ।
विचचार ततस्तत्र दीपयन्निव तद्वनम् ॥ ३४ ॥

अदृष्टपूर्वं तं दृष्ट्वा नानारत्नमयं मृगम् ।
विस्मयं परमं सीता जगाम जनकात्मजा ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे द्विचत्वारिंशः सर्गः ॥

आदितः श्लोकाः 8104 आरण्यकाण्डे आदितः श्लोकाः 1392

इत्यार्षे श्रीमद्रामायणे एकादशोऽद्य वर्तमानकथाप्रसङ्गः

त्रिचत्वारिंशः सर्गः

सीताप्रलोभनम् ॥

सा तं संप्रेक्ष्य सुश्रोणी कुसुमान्यपचिन्वती ।
हैमराजतवर्णाभ्यां पार्श्वाभ्यामुपशोभितम् ॥ १ ॥

प्रहृष्टा चानवद्याङ्गी मृष्टहाटकवर्णिनी ।
भर्तारमभिचक्रन्द लक्ष्मणं चापि सायुधम् ॥ २ ॥

तयाऽऽहूतौ नरव्याघ्रौ वैदेह्या रामलक्ष्मणौ ।
वीक्षमाणौ तु तं देशं तदा ददृशतुर्मृगम् ॥ ३ ॥

शङ्कमानस्तु तं दृष्ट्वा लक्ष्मणो राममब्रवीत् ।
तमेवैनमहं मन्ये मारीचं राक्षसं मृगम् ॥ ४ ॥

चरन्तो मृगयां हृष्टाः पापेनोपाधिना वने ।
अनेन निहता राजन् राजानः कामरूपिणा ॥ ५ ॥

अस्य मायाविनो माया मृगरूपमिदं कृतम् ।
भानुमत्पुरुषव्याघ्र गन्धर्वपुरसन्निभम् ॥ ६ ॥

मृगो ह्येवंविधो रत्नविचित्रो नास्ति राघव ।
जगत्यां जगतीनाथ मायैषा हि न संशयः ॥ ७ ॥

एवं ब्रुवाणं काकुत्स्थं प्रतिवार्य शुचिस्मिता ।
उवाच सीता संहृष्टा चर्मणा हृतचेतना ॥ ८ ॥

आर्यपुत्राभिरामोऽसौ मृगो हरति मे मनः ।
आनयैनं महाबाहो क्रीडार्थं नो भविष्यति ॥ ९ ॥

इहाश्रमपदेऽस्माकं बहवः पुण्यदर्शनाः ।
मृगाश्चरन्ति सहिताश्चमराः सृमरास्तथा ॥ १० ॥

ऋक्षाः पृषतसङ्घाश्च वानराः किंनरास्तथा ।
विचरन्ति महाबाहो रूपश्रेष्ठा मनोहराः ॥ ११ ॥

न चास्य सदृशो राजन् दृष्टपूर्वो मृगः पुरा ।
तेजसा क्षमया दीप्त्या यथाऽयं मृगसत्तमः ॥ १२ ॥

नानावर्णविचित्राङ्गो रत्नबिन्दुसमाचितः ।
द्योतयन् वनमव्यग्रं शोभते शशिसन्निभः ॥ १३ ॥

अहो रूपमहो लक्ष्मीः स्वरसम्पच्च शोभना ।
मृगोऽद्भुतो विचित्रोऽसौ हृदयं हरतीव मे ॥ १४ ॥

यदि ग्रहणमभ्येति जीवन्नेव मृगस्तव ।
आश्चर्यभूतं भवति विस्मयं जनयिष्यति ॥ १५ ॥

समाप्तवनवासानां राज्यस्थानां च नः पुनः ।
अन्तःपुरविभूषार्थो मृग एष भविष्यति ॥ १६ ॥

भरतस्यार्यपुत्रस्य श्वश्रूणां मम च प्रभो ।
मृगरूपमिदं व्यक्तं विस्मयं जनयिष्यति ॥ १७ ॥

जीवन्न यदि तेऽभ्येति ग्रहणं मृगसत्तमः ।
अजिनं नरशार्दूल रुचिरं मे भविष्यति ॥ १८ ॥

निहतस्यास्य सत्त्वस्य जांबूनदमयत्वचि ।
शष्पबृस्यां विनीतायामिच्छाम्यहमुपासितुम् ॥ १९ ॥

कामवृत्तमिदं रौद्रं स्त्रीणामसदृशं मतम् ।
वपुषा त्वस्य सत्त्वस्य विस्मयो जनितो मम ॥ २० ॥

तेन काञ्चनरोप्या तु मणिप्रवरशृङ्गिणा ।
तरुणादित्यवर्णेन नक्षत्रपथवर्चसा ॥
बभूव राघवस्यापि मनो विस्मयमागतम् ॥ २१ ॥

एवं सीतावचः श्रुत्वा तं दृष्ट्वा मृगमद्भुतम् ।
लोभितस्तेन रूपेण सीतया च प्रचोदितः ॥
उवाच राघवो हृष्टो भ्रातरं लक्ष्मणं वचः ॥ २२ ॥

पश्य लक्ष्मण वैदेह्याः स्पृहां मृगगतामिमाम् ।
रूपश्रेष्ठतया ह्येष मृगोऽद्य न भविष्यति ॥ २३ ॥

न वने नन्दनोद्देशे न चैत्ररथसंश्रये ।
कुतः पृथिव्यां सौमित्रे योऽस्य कश्चित्समो मृगः ॥ २४ ॥

प्रतिलोमानुलोमाश्च रुचिरा रोमराजयः ।
शोभन्ते मृगमाश्रित्य चित्राः कनकबिन्दुभिः ॥ २५ ॥

पश्यास्य जृंभमाणस्य दीप्तामग्निशिखोपमाम् ।
जिह्वां मुखान्निःसरन्तीं मेघादिव शतह्रदाम् ॥ २६ ॥

मसारगल्वर्कमुखः शङ्खमुक्तानिभोदरः ।
कस्य नाभिरूपोऽसौ न मनो लोभयेन्मृगः ॥ २७ ॥

कस्य रूपमिदं दृष्ट्वा जांबूनदसमप्रभम् ।
नानारत्नमयं दिव्यं न मनो विस्मयं व्रजेत् ॥ २८ ॥

किं पुनर्मैथिली सीता बाला नारी न विस्मयेत् ॥ २९ ॥

मांसहेतोरपि मृगान् विहारार्थं च धन्विनः ।
घ्नन्ति लक्ष्मण राजानो मृगयायां महावने ॥ ३० ॥

धनानि व्यवसायेन विचीयन्ते महावने ।
धातवो विविधाश्चापि मणिरत्नसुवर्णिनः ॥ ३१ ॥

तत्सारमखिलं नृणां धनं निचयवर्धनम् ।
मनसा चिन्तितं सर्वं यथा शुक्रमतं तथा ॥ ३२ ॥

अर्थी येनार्थकृत्येन संव्रजत्यविचारयन् ।
तमर्थमर्थशास्त्रज्ञाः प्राहुरर्थ्याश्च लक्ष्मण ॥ ३३ ॥

एतस्य मृगरत्नस्य पार्श्वे काञ्चनत्वचि ।
उपवेक्ष्यति वैदेही मया सह सुमध्यमा ॥ ३४ ॥

न कादली न प्रियकी न प्रवेणी न चाविकी ।
भवेदेतस्य सदृशी स्पर्शनेनेति मे मतिः ॥ ३५ ॥

एष चैव मृगः श्रीमान् यश्च दिव्यो नभश्चरः ।
उभावेतौ मृगौ दिव्यौ तारामृगमहीमृगौ ॥ ३६ ॥

यदि वाऽयं तथा यन्मां भवेद्वदसि लक्ष्मण ।
मायैषा राक्षसस्येति कर्तव्योऽस्य वधो मया ॥ ३७ ॥

एतेन हि नृशंसेन मारीचेन दुरात्मना ।
वने विचरता पूर्वं हिंसिता मुनिपुङ्गवाः ॥ ३८ ॥

उत्थाय बहवोऽनेन मृगयायां जनाधिपाः ।
निहताः परमेष्वासास्तस्माद्ध्यस्त्वयं मृगः ॥ ३९ ॥

पुरस्तादिह वातापिः परिभूय तपस्विनः ।
उदरस्थो द्विजान् हन्ति स्वगर्भोऽश्वतरीमिव ॥ ४० ॥

स कदाचिच्चिराल्लोभादाससाद महामुनिम् ।
अगस्त्यं तेजसा युक्तं भक्षस्तस्य बभूव ह ॥ ४१ ॥

समुत्थाने च तद्रूपं कर्तुकामं समीक्ष्य तं ।
उत्स्मयित्वा तु भगवान् वातापिमिदमब्रवीत् ॥ ४२ ॥

त्वयाऽविगण्य वातापे परिभूताः स्वतेजसा ।
जीवलोके द्विजश्रेष्ठास्तस्मादसि जरां गतः ॥ ४३ ॥

एवं तन्न भवेद्रक्षो वातापिरिव लक्ष्मण ।
मद्विधं योऽतिमन्येत धर्मनित्यं जितेन्द्रियम् ॥
भवेद्धतोऽयं वातापिरगस्त्येनेव मां गतः ॥ ४४ ॥

इह त्वं भव सन्नद्धो यन्त्रितो रक्ष मैथिलीम् ।
अस्यामायत्तमस्माकं यत्कृत्यं रघुनन्दन ॥ ४५ ॥

अहमेनं हनिष्यामि ग्रहीष्याम्यपि वा मृगम् ।
यावद्गच्छामि सौमित्रे मृगमानयितुं द्रुतम् ॥ ४६ ॥

पश्य लक्ष्मण वैदेहीं मृगत्वचि गतस्पृहाम् ।
त्वचा प्रधानया ह्येष मृगोऽद्य न भविष्यति ॥ ४७ ॥

अप्रमत्तेन ते भाव्यमाश्रमस्थेन सीतया ॥ ४८ ॥

यावत्पृषतमेकेन सायकेन निहन्म्यहम् ।
हत्वैतच्चर्म चादाय शीघ्रमेष्यामि लक्ष्मण ॥ ४९ ॥

प्रदक्षिणेनातिबलेन पक्षिणा
जटायुषा बुद्धिमता च लक्ष्मण ।
भवाप्रमत्तः प्रतिगृह्य मैथिलीं
प्रतिक्षणं सर्वत एव शङ्कितः ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे त्रिचत्वारिंशः सर्गः ॥
आदितः श्लोकाः 8154 आरण्यकाण्डे आदितः श्लोकाः 1442

चतुश्चत्वारिंशः सर्गः

मारीचवधः ॥

तथा तु तं समादिश्य भ्रातरं रघुनन्दनः ।
बबन्धासिं महातेजा जाम्बूनदमयत्सरुम् ॥ १ ॥

[illegible]नतं चापमादायात्मविभूषणम् ।
आबध्य च कलापौ द्वौ जगामोदग्रविक्रमः ॥ २ ॥

तं वञ्चयानो राजेन्द्रमाव्रजन्तं निरीक्ष्य वै ।
बभूवान्तर्हितस्त्रासात्पुनस्सन्दर्शनेऽभवत् ॥ ३ ।

बद्धासिर्धनुरादाय प्रदुद्राव यतो मृगः ॥ ४ ।

तं पश्यति स्म रूपेण द्योतमानमिवाग्रतः ।
अवेक्ष्यावेक्ष्य धावन्तं धनुष्पाणिं महावने ॥ ५ ॥

अतिवृत्तमिषोः पाताल्लोभयानं कदाचन ।
शङ्कितं तु समुद्भ्रान्तमुत्पतन्तमिवाम्बरे ॥ ६ ॥

दृश्यमानमदृश्यं च वनोद्देशेषु केषुचित् ।
छिन्नाभ्रैरिव संवीतं शारदं चन्द्रमण्डलम् ॥ ७ ॥

मुहूर्तादेव ददृशे मुहुर्दूरात्प्रकाशते ॥ ८ ॥

दर्शनादर्शनादेवं सोपाकर्षत राघवम् ।
सुदूरमाश्रमस्यास्य मारीचो मृगतां गतः ॥ ९ ॥

आसीत्क्रुद्धस्तु काकुत्स्थो विवशस्तेन मोहितः ।
अथावतस्थे सुश्रान्तश्छायामाश्रित्य शाद्वले ॥ १० ॥

स तमुन्मादयामास मृगरूपो निशाचरः ।
मृगैः परिवृतो वन्यैरदूरात्प्रत्यदृश्यत ॥ ११ ॥

ग्रहीतुकामं दृष्ट्वैव पुनरेवाभ्यधावत ।
तत्क्षणादेव संत्रासात्पुनरन्तर्हितोऽभवत् ॥ १२ ॥

पुनरेव ततो दूराद्ददृक्षषण्डाद्विनिःसृतम् ।
दृष्ट्वा रामो महातेजास्तं हन्तुं कृतनिश्चयः ॥ १३ ॥

भूयस्तु शरमुद्धृत्य कुपितस्तत्र राघवः ॥ १४ ॥

सूर्यरश्मिप्रतीकाशं ज्वलन्तमरिमर्दनम् ।
सन्धाय सुदृढे चापे विकृष्य बलवद्बली ॥ १५ ॥

तमेव मृगमुद्दिश्य ज्वलन्तमिव पन्नगम् ।
मुमोच ज्वलितं दीप्तमस्त्रं ब्रह्मविनिर्मितम् ॥ १६ ॥

शरीरं मृगरूपस्य विनिर्भिद्य शरोत्तमः ।
मारीचस्यैव हृदयं बिभेदाशनिसन्निभः ॥ १७ ॥

तालमात्रमथोत्प्लुत्य न्यपतत्स शरातुरः ।
विनदन् भैरवं नादं धरण्यामल्पजीवितः ॥ १८ ॥

म्रियमाणस्तु मारीचो जहौ तां कृत्रिमां तनुम् ।
स्मृत्वा तद्वचनं रक्षो दध्यौ केन तु लक्ष्मणम् ॥
इह प्रस्थापयेत्सीता तां शून्ये रावणो हरेत् ॥ १९ ॥

स प्राप्तकालमाज्ञाय चकार च ततः स्वरम् ।
सदृशं राघवस्यैव हा सीते लक्ष्मणेति च ॥ २० ॥

तेन मर्मणि निर्विद्धः शरेणानुपमेन च ।
मृगरूपं तु तत्त्यक्त्वा राक्षसं रूपमात्मनः ॥
चक्रे स सुमहाकायो मारीचो जीवितं त्यजन् ॥ २१ ॥

ततो विचित्रकेयूरः सर्वाभरणभूषितः ।
हेममाली महादंष्ट्रो राक्षसोऽभूच्छराहतः ॥ २२ ॥

तं दृष्ट्वा पतितं भूमौ राक्षसं घोरदर्शनं ।
रामो रुधिरसिक्ताङ्गं वेष्टमानं महीतले ॥
जगाम मनसा सीतां लक्ष्मणस्य वचः स्मरन् ॥ २३ ॥

मारीचस्यैव मायैषा पूर्वोक्ता लक्ष्मणेन तु ।
तत्तथा ह्यभवच्चाद्य मारीचोऽयं मया हतः ॥ २४ ॥

हा सीते लक्ष्मणेत्येवमाक्रुश्य च महास्वनम् ।
ममार राक्षसः सोऽयं श्रुत्वा सीता कथं भवेत् ॥ २५ ॥

लक्ष्मणश्च महाबाहुः कामवस्थां गमिष्यति ।
इति संचिन्त्य धर्मात्मा रामो हृष्टतनूरुहः ॥ २६ ॥

तत्र रामं भयं तीव्रमाविवेश विषादजम् ।
राक्षसं मृगरूपं तं हत्वा श्रुत्वा च तत्स्वरम् ॥ २७ ॥

निहत्य पृषतं चान्यं मांसमादाय राघवः ।
त्वरमाणो जनस्थानं ससाराभिमुखस्तदा ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे चतुश्चत्वारिंशः सर्गः

आदितः श्लोकाः 8182 आरण्यकाण्डे आदितः श्लोकाः 1470



पञ्चचत्वारिंशः सर्गः

आश्रमाल्लक्ष्मणनिर्गमनम् ॥

आर्तस्वरं तु तं भर्तुर्विज्ञाय सदृशं वने ।
उवाच लक्ष्मणं सीता गच्छ जानीहि राघवं ॥ १ ॥

न हि मे हृदयं स्थाने जीवितं वाऽवतिष्ठति ।
क्रोशतः परमार्तस्य श्रुतः शब्दो मया भृशम् ॥ २ ॥

आक्रन्दमानं तु वने भ्रातरं त्रातुमर्हसि ।
तं क्षिप्रमभिधाव त्वं भ्रातरं शरणैषिणम्
रक्षसां वशमापन्नं सिंहानामिव गोवृषम् ॥ ३ ॥

न जगाम तथोक्तस्तु भ्रातुराज्ञाय शासनम् ।
तमुवाच ततस्तत्र कुपिता जनकात्मजा ॥ ४ ॥

सौमित्रे मित्ररूपेण भ्रातुस्त्वमसि शत्रुवत् ।
यस्त्वमस्यामवस्थायां भ्रातरं नाभिपत्स्यसे ॥ ५ ॥

इच्छसि त्वं विनश्यन्तं रामं लक्ष्मण मत्कृते ।
लोभान्मम कृते नूनं नानुगच्छसि राघवम् ॥ ६ ॥

व्यसनं ते प्रियं मन्ये स्नेहो भ्रातरि नास्ति ते ।
तेन तिष्ठसि विस्रब्धस्तमपश्यन् महाद्युतिम् ॥ ७ ॥

किं हि संशयमापन्ने तस्मिन्निह मया भवेत् ।
कर्तव्यमिह तिष्ठन्त्या यत्प्रधानस्त्वमागतः ॥ ८ ॥

इति ब्रुवाणां वैदेहीं बाष्पशोकपरिप्लुताम्।
अब्रवील्लक्ष्मणस्त्रस्तां सीतां मृगवधूमिव ॥ ९ ॥

पन्नगासुरगन्धर्वदेवमानुषराक्षसैः।
अशक्यस्तव वैदेहि भर्ता जेतुं न संशयः ॥ १० ॥

देवि देवमनुष्येषु गन्धर्वेषु पतत्रिषु।
राक्षसेषु पिशाचेषु किन्नरेषु मृगेषु च ॥ ११ ॥

दानवेषु च घोरेषु न स विद्येत शोभने।
यो रामं प्रतियुध्येत समरे वासवोपमम् ॥ १२ ॥

अवध्यः समरे रामो नैवं त्वं वक्तुमर्हसि।
न त्वामस्मिन् वने हातुमुत्सहे राघवं विना ॥ १३ ॥

अनिवार्यं बलं तस्य बलैर्बलवतामपि।
त्रिभिर्लोकैः समुद्युक्तैः सेश्वरैरपि सामरैः ॥ १४ ॥

हृदयं निर्दहंतं तेऽस्तु सन्तापस्त्यज्यतामयम्।
आगमिष्यति ते भर्ता शीघ्रं हत्वा मृगोत्तमम् ॥ १५ ॥

न स तस्य स्वरो व्यक्तं मायया केनचित् कृतः।
गन्धर्वनगरप्रख्या माया सा तस्य रक्षसः ॥ १६ ॥

न्यासभूताऽसि वैदेहि न्यस्ता मयि महात्मना।
रामेण त्वं वरारोहे न त्वां त्यक्तुमिहोत्सहे ॥ १७ ॥

कृतवैराश्च कल्याणि वयमेतैर्निशाचरैः।
खरस्य निधनादेव जनस्थानवधं प्रति ॥ १८ ॥

राक्षसा विविधा वाचो विसृजन्ति महावने।
हिंसाविहारा वैदेहि न चिन्तयितुमर्हसि ॥ १९ ॥

लक्ष्मणेनैवमुक्ता सा क्रुद्धा संरक्तलोचना।
अब्रवीत्परुषं वाक्यं लक्ष्मणं सत्यवादिनम् ॥ २० ॥

अनार्य कृपणारम्भ नृशंस कुलपांसन।
अहं तव प्रियं मन्ये रामस्य व्यसनं महत् ॥ २१ ॥

रामस्य व्यसनं दृष्ट्वा तेनैतानि प्रभाषसे ॥ २२ ॥

नैतच्चित्रं सपत्नेषु पापं लक्ष्मण यद्भवेत्।
त्वद्विधेषु नृशंसेषु नित्यं प्रच्छन्नचारिषु ॥ २३ ॥

सुदुष्टस्त्वं वने राममेकमेकोऽनुगच्छसि।
मम हेतोः प्रतिच्छन्नः प्रयुक्तो भरतेन वा ॥ २४ ॥

तन्न सिध्यति सौमित्रे तवापि भरतस्य च।
कथमिन्दीवरश्यामं रामं पद्मनिभेक्षणम् ॥ २५ ॥

उपसंश्रित्य भर्तारं कामये प्राकृतं जनम् ॥ २६ ॥

समक्षं तव सौमित्रे प्राणांस्त्यक्ष्ये न संशयः।
रामं विना क्षणमपि न हि जीवामि भूतले ॥ २७ ॥

इत्युक्तः परुषं वाक्यं सीतया रोमहर्षणम्।
अब्रवील्लक्ष्मणस्सीतां प्राञ्जलिर्विजितेन्द्रियः॥ ॥ २८ ॥

उत्तरं नोत्सहे वक्तुं दैवतं भवती मम।
वाक्यमप्रतिरूपं तु न चित्रं स्त्रीषु मैथिलि ॥ २९ ॥

स्वभावस्त्वेष नारीणामेवं लोकेषु दृश्यते।
विमुक्तधर्माश्चपलास्तीक्ष्णा भेदकराः स्त्रियः ॥ ३० ॥

न सहे हीदृशं वाक्यं वैदेहि जनकात्मजे।
श्रोत्रयोरुभयोर्मेऽद्य तप्तनाराचसन्निभम् ॥ ३१ ॥

उपश्रृण्वन्तु मे सर्वे साक्षिभूता वनेचराः।
न्यायवादी यथाऽन्यायमुक्तोऽहं परुषं त्वया ॥ ३२ ॥

धिक् त्वामद्य प्रणश्य त्वं यन्मामेवं विशङ्कसे।
स्त्रीत्वादुष्टस्वभावेन गुरुवाक्ये व्यवस्थितम् ॥ ३३ ॥

गमिष्ये यत्र काकुत्स्थः स्वस्ति तेऽस्तु वरानने।
रक्षन्तु त्वां विशालाक्षि समग्रा वनदेवताः ॥ ३४ ॥

निमित्तानि हि घोराणि यानि प्रादुर्भवन्ति मे।
अपि त्वां सह रामेण पश्येयं पुनरागतः ॥ ३५ ॥

लक्ष्मणेनैवमुक्ता सा रुदन्ती जनकात्मजा।
प्रत्युवाच ततो वाक्यं तीव्रं बाष्पपरिप्लुता ॥ ३६ ॥

गोदावरीं प्रवेक्ष्यामि विना रामेण लक्ष्मण।
आबन्धिष्येऽथवा त्यक्ष्ये विषमे देहमात्मनः ॥ ३७ ॥

पिबामि वा विषं तीक्ष्णं प्रवेक्ष्यामि हुताशनम्।
न त्वहं राघवादन्यं पदापि पुरुषं स्पृशे ॥ ३८ ॥

इति लक्ष्मणमाक्रुश्य सीता दुःखसमन्विता।
पाणिभ्यां रुदती दुःखादुदरं प्रजघान ह ॥ ३९ ॥

तामार्तरूपां विमना रुदन्तीं
सौमित्रिरालक्ष्य विशालनेत्राम्।
आश्वासयामास न चैव भर्तु-
स्तं भ्रातरं किञ्चिदुवाच सीता ॥ ४० ॥

ततस्तु सीतामभिवाद्य लक्ष्मणः
कृताञ्जलिः किञ्चिदभिप्रणम्य च।
अन्वीक्षमाणो बहुशश्च मैथिलीं
जगाम रामस्य समीपमात्मवान् ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे पञ्चचत्वारिंशः सर्गः ॥

षट्चत्वारिंशः सर्गः

आश्रमे रावणागमनम् ॥

तया परुषमुक्तस्तु कुपितो राघवानुजः ।
स विकाङ्क्षन् भृशं रामं प्रतस्थे न चिरादिव ॥ १ ॥

तदासाद्य दशग्रीवः क्षिप्रमन्तरमास्थितः ।
अभिचक्राम वैदेहीं परिव्राजक रूपधृत् ॥ २ ॥

श्लक्ष्णकाषायसंवीतः शिखी छत्री उपानही ।
वामे चांसेऽवसज्याथ शुभे यष्टिकमण्डलू ।
परिव्राजकरूपेण वैदेहीं समुपागमत् ॥ ३ ॥

तामाससादातिबलो भ्रातृभ्यां रहितां वने ।
रहितां चन्द्रसूर्याभ्यां सन्ध्यामिव महत्तमः ॥ ४ ॥

तामपश्यत्ततो बालां रामपत्नीं यशस्विनीम् ।
रोहिणीं शशिना हीनां ग्रहवद्भृशदारुणः ॥ ५ ॥

तमुग्रं पापकर्माणं जनस्थानरुहा द्रुमाः ।
समीक्ष्य न प्रकम्पन्ते न प्रवाति च मारुतः ॥ ६ ॥

शीघ्रस्रोताश्च तं दृष्ट्वा वीक्षन्तं रक्तलोचनम् ।
स्तिमितं गन्तुमारेभे भयाद्गोदावरी नदी ॥ ७ ॥

रामस्य त्वन्तरेप्सुर्दशग्रीवस्तदन्तरे ।
उपतस्थे च वैदेहीं भिक्षुरूपेण रावणः ॥ ८ ॥

अभव्यो भव्यरूपेण भर्तारमनुशोचतीम् ।
अभ्यवर्तत वैदेहीं चित्रामिव शनैश्चरः ॥ ९ ॥

स पापो भव्यरूपेण तृणैः कूप इवावृतः ।
अतिष्ठत्प्रेक्ष्य वैदेहीं रामपत्नीं यशस्विनीम् ॥ १० ॥

शुभां रुचिरदन्तोष्ठीं पूर्णचन्द्रनिभाननाम् ।
आसीनां पर्णशालायां बाष्पशोकाभिपीडिताम् ॥ ११ ॥

स तां पद्मपलाशाक्षीं पीतकौशेयवासिनीम् ।
अभ्यगच्छत वैदेहीं दुष्टचेता निशाचरः ॥ १२ ॥

स मन्मथशराविष्टो ब्रह्मघोषमुदीरयन् ।
अब्रवीत्प्रश्रितं वाक्यं रहिते राक्षसाधिपः ॥ १३ ॥

तामुत्तमां स्त्रियं लोके पद्महीनामिव श्रियम् ।
विभ्राजमानां वपुषा रावणः प्रशशंस ह ॥ १४ ॥

का त्वं काञ्चनवर्णाभे पीतकौशेयवासिनि ।
कमलानां शुभां मालां पद्मिनीव हि बिभ्रती ॥ १५ ॥

ह्रीः श्रीः कीर्तिः शुभा लक्ष्मीरप्सरा वा शुभानने ।
भूमिर्वा त्वं वरारोहे रतिर्वा स्वैरचारिणी ॥ १६ ॥

समाः शिखरिणः स्निग्धाः पाण्डुरा दशनास्तव ।
विशाले विमले नेत्रे रक्तान्ते कृष्णतारके ॥ १७ ॥

विशालं जघनं पीनमूरू करिकरोपमौ ॥ १८ ॥

एतावुपचितौ वृत्तौ संहितौ सम्प्रवल्गितौ ।
पीनोन्नतमुखौ कान्तौ स्निग्धौ तालफलोपमौ ॥ १९ ॥

मणिप्रवेकाभरणौ रुचिरौ ते पयोधरौ ॥ २० ॥

चारुस्मिते चारुदति चारुनेत्रे विलासिनि ।
मनो हरसि मे रामे नदी कूलमिवाम्भसा ॥ २१ ॥

करान्तमितमध्याऽसि सुकेशी संहतस्तनी ॥ २२ ॥

नैव देवी न गन्धर्वी न यक्षी न च किन्नरी ।
नैवंरूपा मया नारी दृष्टपूर्वा महीतले ॥ २३ ॥

रूपमग्र्यं च लोकेषु सौकुमार्यं वयश्च ते ।
इह वासश्च कान्तारे चित्तमाकुलयन्ति मे ॥ २४ ॥

सा प्रतिक्राम भद्रं ते न त्वं वस्तुमिहार्हसि ।
राक्षसानामयं वासो घोराणां कामरूपिणाम् ॥ २५ ॥

प्रासादाग्राणि रम्याणि नगरोपवनानि च ।
सम्पन्नानि सुगन्धीनि युक्तान्याचरितुं त्वया ॥ २६ ॥

वरं माल्यं वरं भोज्यं वरं वस्त्रं च शोभने ।
भर्तारं च वरं मन्ये त्वद्युक्तमसितेक्षणे ॥ २७ ॥

का त्वं भवसि रुद्राणां मरुतां वा शुचिस्मिते ।
वसूनां वा वरारोहे देवता प्रतिभासि मे ॥ २८ ॥

नेह गच्छन्ति गन्धर्वा न देवा न च किन्नराः ।
राक्षसानामयं वासः कथं नु त्वमिहागता ॥ २९ ॥

इह शार्दूलमृगाः सिंहा द्वीपिव्याघ्रमृगास्तथा ।
ऋक्षास्तरक्षवः कङ्काः कथं तेभ्यो न बिभ्यसि ॥ ३० ॥

मदान्वितानां घोराणां कुञ्जराणां तरस्विनाम् ।
कथमेका महारण्ये न बिभेषि वरानने ॥ ३१ ॥

कासि कस्य कुतश्चित्वं किंनिमित्तं च दण्डकान् ।
एका चरसि कल्याणि घोरान् राक्षससेवितान् ॥ ३२ ॥

इति प्रशस्ता वैदेही रावणेन दुरात्मना ।
द्विजातिवेषेण हितं दृष्ट्वा रावणमागतम् ।
सर्वैरतिथिसत्कारैः पूजयामास मैथिली ॥ ३३ ॥

उपनीयासनं पूर्वं पाद्येनाभिनिमन्त्र्य च ।
अब्रवीत्सिद्धमित्येव तदा तं सौम्यदर्शना ॥ ३४ ॥

द्विजातिवेषेण समीक्ष्य मैथिली
समागतं पात्रकुसुम्भधारिणम् ।
अशक्यमुद्वेष्टुमपायदर्शनं
न्यमन्त्रयद्ब्राह्मणवत्तदाऽङ्गना ॥ ३५ ॥

इयं बृसी ब्राह्मण काममास्यता-
मिदं च पाद्यं प्रतिगृह्यतामिति ।
इदं च सिद्धं वनजातमुत्तमं
त्वदर्थमव्यग्रमिहोपभुज्यताम् ॥ ३६ ॥

निमन्त्र्यमाणः प्रतिपूर्णभाषिणीं
नरेन्द्रपत्नीं प्रसमीक्ष्य मैथिलीम् ।
प्रसह्य तस्या हरणे धृतं मनः
समार्पयत्स्वात्मवधाय रावणः ॥ ३७ ॥

ततः सुवेषं मृगयागतं पतिं
प्रतीक्षमाणा सहलक्ष्मणं तदा ।
विवीक्षमाणा हरितं ददर्शत-
न्महद्वनं नैव तु रामलक्ष्मणौ ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे षट्चत्वारिंशः सर्गः ॥

आदितः श्लोकाः 8261 आरण्यकाण्डे आदितः श्लोकाः 1549



सप्तचत्वारिंशः सर्गः

रावणधिक्कारः ॥

रावणेन तु वैदेही तथा पृष्टा जिहीर्षता ।
परिव्राजकलिङ्गेन शशंसात्मानमङ्गना ॥ १ ॥

ब्राह्मणश्चातिथिश्चायमनुक्तो हि शपेत माम् ।
इति ध्यात्वा मुहूर्तं तु सीता वचनमब्रवीत् ॥ २ ॥

दुहिता जनकस्याहं मैथिलस्य महात्मनः ।
सीता नाम्नाऽस्मि भद्रं ते रामभार्या द्विजोत्तम ॥ ३ ॥

उषित्वा द्वादशसमा इक्ष्वाकूणां निवेशने ।
भुञ्जाना मानुषान् भोगान् सर्वकामसमृद्धिनी ॥ ४ ॥

ततस्त्रयोदशे वर्षे राजाऽमन्त्रयत प्रभुः ।
अभिषेचयितुं रामं समेतो राजमन्त्रिभिः ॥ ५ ॥

तस्मिन् संभ्रियमाणे तु राघवस्याभिषेचने ।
कैकेयी नाम भर्तारं ममार्या याचते वरम् ॥ ६ ॥

प्रतिगृह्य तु कैकेयी श्वशुरं सुकृतेन मे ।
मम प्रव्राजनं भर्तुर्भरतस्याभिषेचनम् ॥ ७ ॥

द्वावयाचत भर्तारं सत्यसन्धं नृपोत्तमम् ॥ ८ ॥

नाद्य भोक्ष्ये न च स्वप्स्ये न पास्ये च कथञ्चन ।
एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥ ९ ॥

इति ब्रुवाणां कैकेयीं श्वशुरो मे स मानदः ।
अयाचतार्थैरन्वर्थैर्न च याच्ञां चकार सा ॥ १० ॥

मम भर्ता महातेजा वयसा पञ्चविंशकः ।
अष्टादश हि वर्षाणि मम जन्मनि गण्यते ॥ ११ ॥

रामेति प्रथितो लोके गुणवान् सत्यवाञ्छुचिः ।
विशालाक्षो महाबाहुस्सर्वभूतहिते रतः ॥ १२ ॥

कामार्तश्च महाबाहुः पिता दशरथः स्वयम् ।
कैकेय्याः प्रियकामार्थं तं रामं नाभ्यषेचयत् ॥ १३ ॥

अभिषेकाय तु पितुस्समीपं राममागतम् ।
कैकेयी मम भर्तारमित्युवाच दृढं वचः ॥ १४ ॥

तव पित्रा समाज्ञप्तं ममेदं शृणु राघव ।
भरताय प्रदातव्यमिदं राज्यमकण्टकम् ॥ १५ ॥

त्वया तु खलु वस्तव्यं नव वर्षाणि पञ्च च ।
वने प्रव्रज काकुत्स्थ पितरं मोचयानृतात् ॥ १६ ॥

तथेत्युक्त्वा च तां रामः कैकेयीमकुतोभयः ।
चकार तद्वचस्तस्या मम भर्ता दृढव्रतः ॥ १७ ॥

दद्यान्न प्रतिगृह्णीयात्सत्यं ब्रूयान्न चानृतम् ।
एतद्ब्राह्मण रामस्य व्रतं ध्रुवमनुत्तमम् ॥ १८ ॥

तस्य भ्राता तु द्वैमात्रो लक्ष्मणो नाम वीर्यवान् ।
रामस्य पुरुषव्याघ्रः सहायः समरेऽरिहा ॥ १९ ॥

स भ्राता लक्ष्मणो नाम धर्मचारी दृढव्रतः ।
अन्वगच्छद्धनुष्पाणिः प्रव्रजन्तं मया सह ॥ २० ॥

जटी तापसरूपेण मया सह सहानुजः ।
प्रविष्टो दण्डकारण्यं धर्मनित्यो दृढव्रतः ॥ २१ ॥

ते वयं प्रच्युता राज्यात्कैकेय्यास्तु कृते त्रयः ।
विचराम द्विजश्रेष्ठ वनं गम्भीरमोजसा ॥ २२ ॥

समाश्वस मुहूर्तन्तु शक्यं वस्तुमिह त्वया ।
आगमिष्यति मे भर्ता वन्यमादाय पुष्कलम् ॥ २३ ॥

स त्वं नाम च गोत्रं च कुलं चाचक्ष्व तत्त्वतः ॥ २४ ॥

एकश्च दण्डकारण्ये किमर्थं चरसि द्विज ॥ २५ ॥

एवं ब्रुवन्त्यां सीतायां रामपत्न्यां महाबलः ।
प्रत्युवाचोत्तरं तीव्रं रावणो राक्षसाधिपः ॥ २६ ॥

येन वित्रासिता लोकास्सदेवासुरपन्नगाः ।
अहं स रावणो नाम सीते रक्षोगणेश्वरः ॥ २७ ॥

त्वां तु काञ्चनवर्णाभां दृष्ट्वा कौशेयवासिनीम् ।
रतिं स्वकेषु दारेषु नाधिगच्छाम्यनिन्दिते ॥ २८ ॥

बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः ।
सर्वासामेव भद्रं ते ममाग्रमहिषी भव ॥ २९ ॥

लङ्का नाम समुद्रस्य मध्ये मम महापुरी ।
सागरेण परिक्षिप्ता निविष्टा गिरिमूर्धनि ॥ ३० ॥

तत्र सीते मया सार्धं वनेषु विहरिष्यसि ।
न चास्यारण्यवासस्य स्पृहयिष्यसि भामिनि ॥ ३१ ॥

पञ्च दासीसहस्राणि सर्वाभरणभूषिताः ।
सीते परिचरिष्यन्ति भार्या भवसि मे यदि ॥ ३२ ॥

रावणेनैवमुक्ता तु कुपिता जनकात्मजा ।
प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम् ॥ ३३ ॥

महागिरिमिवाकम्प्यं महेन्द्रसदृशं पतिम् ।
महोदधिमिवाक्षोभ्यमहं राममनुव्रता ॥ ३४ ॥

सर्वलक्षणसम्पन्नं न्यग्रोधपरिमण्डलम् ।
सत्यसन्धं महाभागमहं राममनुव्रता ॥ ३५ ॥

महाबाहुं महोरस्कं सिंहविक्रान्तगामिनम् ।
नृसिंहं सिंहसङ्काशमहं राममनुव्रता ॥ ३६ ॥

पूर्णचन्द्राननं रामं राजवत्सं जितेन्द्रियम् ।
पृथुकीर्तिं महात्मानमहं राममनुव्रता ॥ ३७ ॥

त्वं पुनर्जम्बुकस्सिंहीं मामिहेच्छसिदुर्लभाम् ।
नाहं शक्या त्वया स्पष्टुमादित्यस्य प्रभा यथा ॥ ३८ ॥

पादपान् काञ्चनान् नूनं बहून् पश्यसि मन्दभाक् ।
राघवस्य प्रियां भार्यां यस्त्वमिच्छसि रावण ॥ ३९ ॥

क्षुधितस्येव सिंहस्य मृगशत्रोस्तरस्विनः ।
आशीविषस्य वदनादंष्ट्रामादातुमिच्छसि ॥ ४० ॥

मन्दरं पर्वतश्रेष्ठं पाणिभ्यां हर्तुमिच्छसि ।
कालकूटविषं पीत्वा स्वस्तिमान् गन्तुमिच्छसि ॥ ४१ ॥

अक्षि सूच्या प्रमृजसि जिह्वया लेढि च क्षुरम् ।
राघवस्य प्रियां भार्यामधिगन्तुं त्वमिच्छसि ॥ ४२ ॥

अवसज्य शिलां कण्ठे समुद्रं तर्तुमिच्छसि ।
सूर्याचन्द्रमसौ चोभौ पाणिभ्यां हर्तुमिच्छसि ॥ ४३ ॥

यो रामस्य प्रियां भार्यां प्रधर्षयितुमिच्छसि ॥ ४४ ॥
अग्निं प्रज्वलितं दृष्ट्वा वस्त्रेणाहर्तुमिच्छसि ।

कल्याणवृत्तां रामस्य यो भार्यां हर्तुमिर्च्छसि ॥ ४५ ॥
अयोमुखानां शूलानामग्रे चरितुमिच्छसि ।

रामस्य सदृशीं भार्यां योऽधिगन्तुं त्वमिच्छसि ।
दंष्ट्रीविषं महाघोरमङ्गुल्या तुदसे भृशम् ॥ ४६ ॥

यदन्तरं सिंहशृगालयोर्वने
यदन्तरं स्यन्दिनिकासमुद्रयोः ।
सुराग्र्यसौवीरकयोर्यदन्तरं
तदन्तरं वै तव राघवस्य च ॥ ४७ ॥

यदन्तरं काञ्चनसीसलोहयोर्यदन्तरं चन्दनवारिपङ्कयोः ।
यदन्तरं हस्तिबिडालयोर्वने तदन्तरं दाशरथेस्तवैव च ॥

यदन्तरं वायसवैनतेययो-
र्यदन्तरं मद्गुमयूरयोरपि ।
यदन्तरं सारसगृध्रयोर्वने
तदन्तरं दाशरथेस्तवैव च ॥ ४९ ॥

तस्मिन् सहस्राक्षसमप्रभावे
रामे स्थिते कार्मुकबाणपाणौ ।
हृताऽपि तेऽहं न जरां गमिष्ये
वज्रं यथा मक्षिकयाऽवगीर्णम् ॥ ५० ॥

इतीव तद्वाक्यमदुष्टभावा सुदुष्टमुक्त्वा रजनीचरं तम् ।
गात्रप्रकम्पव्यथिता बभूव वातोद्धता सा कदलीव तन्वी ॥

तां वेपमानामुपलक्ष्य सीतां
स रावणो मृत्युसमप्रभावः ।
कुलं बलं नाम च कर्म च स्वं
समाचचक्षे भयकारणार्थम् ॥ ५२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे सप्तचत्वारिंशः सर्गः ॥



अष्टचत्वारिंशः सर्गः

रावणस्यात्मश्लाघा ॥

एवं ब्रुवन्त्यां सीतायां संरब्धः परुषाक्षरम् ।
ललाटे भ्रुकुटीं कृत्वा रावणः प्रत्युवाच ह ॥ १ ॥

भ्राता वैश्रवणस्याहं सापत्न्यो वरवर्णिनि ।
रावणो नाम भद्रं ते दशग्रीवः प्रतापवान् ॥ २ ॥

यस्य देवाः सगन्धर्वाः पिशाचपतगोरगाः ।
विद्रवन्ति भयाद्भीता मृत्योरिव सदा प्रजाः ॥ ३ ॥

येन वैश्रवणो भ्राता द्वैमात्रः कारणान्तरे ।
द्वन्द्वमासादितः क्रोधाद्रणे विक्रम्य निर्जितः ॥ ४ ॥

मद्भयात्तत्परित्यज्य स्वमधिष्ठानमृद्धिमत् ।
कैलासं पर्वतश्रेष्ठमध्यास्ते नरवाहनः ॥ ५ ॥

यस्य तत्पुष्पकं नाम विमानं कामगं शुभम् ।
वीर्यादेवार्जितं भद्रे येन यामि विहायसम् ॥ ६ ॥

मम सञ्जातरोषस्य मुखं दृष्ट्वैव मैथिलि ।
विद्रवन्ति परित्रस्तास्सुराः शक्रपुरोगमाः ॥ ७ ॥

यत्र तिष्ठाम्यहं तत्र मारुतो वाति शङ्कितः ।
तीव्रांशुः शिशिरांशुश्च भयात्सम्पद्यते रविः ॥ ८ ॥

निष्कम्पपत्रास्तरवो नद्यश्च स्तिमितोदकाः ।
भवन्ति यत्र तत्राहं तिष्ठामि च चरामि च ॥ ९ ॥

मम पारे समुद्रस्य लङ्का नाम पुरी शुभा ।
सम्पूर्णा राक्षसैर्घोरैर्यथेन्द्रस्यामरावती ॥ १० ॥

प्राकारेण परिक्षिप्ता पाण्डुरेण विराजता ।
हेमकक्ष्या पुरी रम्या वैडूर्यमयतोरणा ॥ ११ ॥

हस्त्यश्वरथसंबाधा तूर्यनादविनादिता ।
सर्वकामफलैर्वृक्षैस्समृद्धोद्यानशोभिता ॥ १२ ॥

तत्र त्वं वसती सीते राजपुत्रि मया सह ।
न स्मरिष्यसि नारीणां मानुषीणां मनस्विनी ॥ १३ ॥

भुञ्जाना मानुषान् भोगान्दिव्यांश्च वरवर्णिनि ।
न स्मरिष्यसि रामस्य मानुषस्य गतायुषः ॥ १४ ॥

स्थापयित्वा प्रियं पुत्रं राज्ञा दशरथेन यः ।
मन्दवीर्यस्ततो ज्येष्ठस्सुतः प्रस्थापितो वनम् ॥ १५ ॥

तेन किं भ्रष्टराज्येन रामेण गतचेतसा ।
करिष्यसि विशालाक्षि तापसेन तपस्विना ॥ १६ ॥

यक्षराक्षसभर्तारं कामात्स्वयमिहागतम् ।
न मन्मथशराविष्टं प्रत्याख्यातुं त्वमर्हसि ॥ १७ ॥

प्रत्याख्याय हि मां भीरु परितापं गमिष्यसि ।
चरणेनाभिहत्येव पुरूरवसमुर्वशी ॥ १८ ॥

अङ्गुल्या न समो रामो मम युद्धे स मानुषः ।
तव भाग्येन संप्राप्तं भजस्व वरवर्णिनि ॥ १९ ॥

एवमुक्ता तु वैदेही क्रुद्धा संरक्तलोचना ।
अब्रवीत् परुषं वाक्यं रहिते राक्षसाधिपम् ॥ २० ॥

कथं वैश्रवणं देवं सर्वभूतनमस्कृतम् ।
भ्रातरं व्यपदिश्य त्वमशुभं कर्तुमिच्छसि ॥ २१ ॥

अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः ।
येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ॥ २२ ॥

अपहृत्य शचीं भार्यां शक्यमिन्द्रस्य जीवितुम् ।
न च रामस्य भार्यां मामपनीयास्ति जीवितम् ॥ २३ ॥

जीवेच्चिरं वज्रधरस्य हस्तात्
शचीं प्रधृष्याप्रतिरूपरूपाम् ।
न मादृशीं राक्षस धर्षयित्वा
पीतामृतस्यापि तवास्ति मोक्षः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे अष्टचत्वारिंशः सर्गः ॥

आदितः श्लोकाः 8337 आरण्यकाण्डे आदितः श्लोकाः 1625

एकोनपञ्चाशः सर्गः

सीतापहरणम् ॥

सीताया वचनं श्रुत्वा दशग्रीवः प्रतापवान् ।
हस्ते हस्तं समाहत्य चकार सुमहद्वपुः ॥ १ ॥

स मैथिलीं पुनर्वाक्यं बभाषे च ततो भृशम् ।
नोन्मत्तया श्रुतौ मन्ये मम वीर्यपराक्रमौ ॥ २ ॥

उद्वहेयं भुजाभ्यां तु मेदिनीमम्बरे स्थितः ।
आपिबेयं समुद्रं च मृत्युं हन्यां रणे स्थितः ॥ ३ ॥

अर्कं रुन्ध्यां शरैस्तीक्ष्णैर्विभिद्यां हि महीतलम् ।
कामरूपिणमुन्मत्ते पश्य मां कामदं पतिम् ॥ ४ ॥

एवमुक्तवतस्तस्य रावणस्य शिखिप्रभे ।
क्रुद्धस्य हरिपर्यन्ते रक्ते नेत्रे बभूवतुः ॥ ५ ॥

सद्यःसौम्यं परित्यज्य भिक्षुरूपं स रावणः ।
स्वरूपं कालरूपाभं भेजे वैश्रवणानुजः ॥ ६ ॥

संरक्तनयनः श्रीमांस्तप्तकाञ्चनकुण्डलः ।
क्रोधेन महताविष्टो नीलजीमूतसन्निभः ॥ ७ ॥

दशास्यः कार्मुकी बाणी बभूव क्षणदाचरः ॥ ८ ॥

स परिव्राजकच्छद्म महाकायो विहाय तत् ।
प्रतिपेदे स्वकं रूपं रावणो राक्षसाधिपः ॥ ९ ॥

संरक्तनयनः क्रोधाज्जीमूतनिचयप्रभः ।
रक्ताम्बरधरस्तस्थौ स्त्रीरत्नं प्रेक्ष्य मैथिलीम् ॥ १० ॥

सीतामसितकेशान्तां भास्करस्य प्रभामिव ।
वसनाभरणोपेतां मैथिलीं रावणोऽब्रवीत् ॥ ११ ॥

त्रिषु लोकेषु विख्यातं यदि भर्तारमिच्छसि ।
मामाश्रय वरारोहे तवाहं सदृशः पतिः ॥ १२ ॥

मां भजस्व चिराय त्वमहं श्लाघ्यस्तव प्रियः ।
नैव चाहं क्वचिद्भद्रे करिष्ये तव विप्रियम् ॥ १३ ॥

त्यज्यतां मानुषो भावो मयि भावः प्रणीयताम् ।
राज्याच्च्युतमसिद्धार्थं रामं परिमितायुषम् ॥ १४ ॥

कैर्गुणैरनुरक्तासि मूढे पण्डितमानिनि ।
यः स्त्रिया वचनाद्राज्यं विहाय ससुहृज्जनम् ॥ १५ ॥

अस्मिन् व्यालानुचरिते वने वसति दुर्मतिः ॥ १६ ॥
इत्युक्त्वा मैथिलीं वाक्यं प्रियार्हां प्रियवादिनीम् ।

अभिगम्य सुदुष्टात्मा राक्षसः कालचोदितः ॥ १७ ॥

जग्राह रावणस्सीतां बुधः खे रोहिणीमिव ॥ १८ ॥

वामेन सीतां पद्माक्षीं मूर्धजेषु करेण सः ।
ऊर्वोस्तु दक्षिणेनैव परिजग्राह पाणिना ॥ १९ ॥

तं दृष्ट्वा गिरिशृङ्गाभं तीक्ष्णदंष्ट्रं महाभुजं ।
प्राद्रवन्मृत्युसदृशं भयार्ता वनदेवताः ॥ २० ॥

स च मायामयो दिव्यः खरयुक्तः खरस्वनः ।
प्रत्यदृश्यत हेमाङ्गो रावणस्य महारथः ॥ २१ ॥

ततस्तां परुषैर्वाक्यैरभितर्ज्य महास्वनः ।
अङ्केनोद्यम्य वैदेहीं रथमारोपयत्तदा ॥ २२ ॥

सा गृहीता विचुक्रोश रावणेन यशस्विनी ।
रामेति सीता दुःखार्ता रामं दूरगतं वने ॥ २३ ॥

तामकामां स कामार्तः पन्नगेन्द्रवधूमिव ।
विवेष्टमानामादाय उत्पपाताथ रावणः ॥ २४ ॥

ततः सा राक्षसेन्द्रेण ह्रियमाणा विहायसा।
भृशं चुक्रोश मत्तेव भ्रान्तचित्ता यथाऽऽतुरा ॥ २५ ॥

हा लक्ष्मण महाबाहो गुरुचित्तप्रसादक।
ह्रियमाणां न जानीषे रक्षसा माममर्षिणा ॥ २६ ॥

जीवितं सुखमर्थांश्च धर्महेतोः परित्यजन्।
ह्रियमाणामधर्मेण मां राघव न पश्यसि ॥ २७ ॥

ननु नामाविनीतानां विनेताऽसि परन्तप।
कथमेवंविधं पापं न त्वं शाधि हि रावणम् ॥ २८ ॥

न तु सद्योऽविनीतस्य दृश्यते कर्मणः फलम् ॥ २९ ॥

कालोऽप्यङ्गीभवत्यत्र सस्यानामिव पक्तये ॥ ३० ॥

स कर्म कृतवानेतत्कालोपहतचेतनः।
जीवितान्तकरं घोरं रामाद्व्यसनमाप्नुहि ॥ ३१ ॥

हन्तेदानीं सकामा तु कैकेयी बान्धवैस्सह।
ह्रिये यद्धर्मकामस्य धर्मपत्नी यशस्विनः ॥ ३२ ॥

आमन्त्रये जनस्थाने कर्णिकारान् सुपुष्पितान्।
क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥ ३३ ॥

दैवतानि च यान्यस्मिन्वने विविधपादपे।
नमस्करोम्यहं तेभ्यो भर्तुः शंसत मां हृताम् ॥ ३४ ॥

यानि कानिचिदप्यत्र सत्त्वानि निवसन्त्युत।
सर्वाणि शरणं यामि मृगपक्षिगणानपि ॥ ३५ ॥

ह्रियमाणां प्रियां भर्तुः प्राणेभ्योऽपि गरीयसीम्।
विवशाऽपहृता सीता रावणेनेति शंसत ॥ ३६ ॥

विदित्वा मां महाबाहुरमुत्रापि महाबलः।
आनेष्यति पराक्रम्य वैवस्वतहृतामपि ॥ ३७ ॥

सा तदा करुणा वाचो विलपन्ती सुदुःखिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥ ३८ ॥

सा तमुद्वीक्ष्य सुश्रोणी रावणस्य वशं गता।
समाक्रन्दद्भयपरा शब्दोपहतया गिरा ॥ ३९ ॥

जटायो पश्य मामार्य ह्रियमाणामनाथवत्।
अनेन राक्षसेन्द्रेण करुणं पापकर्मणा ॥ ४० ॥

नैष वारयितुं शक्यस्त्वया क्रूरो निशाचरः।
सत्त्ववाञ्छितकाशी च सायुधश्चैव दुर्मतिः ॥ ४१ ॥

रामाय तु यथातत्त्वं जटायो हरणं मम।
लक्ष्मणाय च तत्सर्वमाख्यातव्यमशेषतः ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकोनपञ्चाशः सर्गः ॥

आदितः श्लोकाः 8379 आरण्यकाण्डे आदितः श्लोकाः 1667



पञ्चाशः सर्गः

जटायुषा रावणनिरोधः ॥

तं शब्दमवसुप्तस्तु जटायुरपि शुश्रुवे ।
निरैक्षत च वैदेहीं रावणं च ददर्श ह ॥ १ ॥

ततः पर्वतकूटाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान् व्याजहार शुभां गिरम् ॥ २ ॥

दशग्रीव स्थितो धर्मे पुराणे सत्यसंश्रयः ।
जटायुर्नाम नाम्नाऽहं गृध्रराजो महाबलः ॥ ३ ॥

राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः ।
लोकानां च हिते युक्तो रामो दशरथात्मजः ॥ ४ ॥

तस्यैषा लोकनाथस्य धर्मपत्नी यशस्विनी ।
सीता नाम वरारोहा यां त्वं हर्तुमिहेच्छसि ॥ ५ ॥

कथं राजा स्थितो धर्मे परदारान् परामृशेत् ।
रक्षणीया विशेषेण राजदारा महाबल ॥ ६ ॥

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत् समाचरेद्धीरो यत् परोऽस्य विगर्हयेत् ॥
यथाऽऽत्मनस्तथान्येषां दारा रक्ष्या विमर्शता ॥ ७ ॥

अर्थे वा यदि वा कामं शिष्टाः शास्त्रेष्वनागतम् ।
व्यवस्यन्त्यनुराजानं धर्मं पौलस्त्यनन्दन ॥ ८ ॥

राजा धर्मश्च कामश्च द्रव्याणां चोत्तमो निधिः ।
धर्मः शुभं वा पापं वा राजमूलं प्रवर्तते ॥ ९ ॥

पापस्वभावश्चपलः कथं त्वं रक्षसां वर ।
ऐश्वर्यमभिसंप्राप्तो विमानमिव दुष्कृतिः ॥ १० ॥

कामं स्वभावो यो यस्य न शक्यः परिमार्जितुम् ।
न हि दुष्टात्मनामार्यमावसत्यालये चिरम् ॥ ११ ॥

विषये वा पुरे वा ते यदि रामो महाबलः ।
नापराध्यति धर्मात्मा कथं तस्यापराध्यसि ॥ १२ ॥

यदि शूर्पणखाहेतोर्जनस्थानगतः खरः ।
अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा ॥ १३ ॥

अत्र ब्रूहि यथातत्त्वं को रामस्य व्यतिक्रमः ।
यस्य त्वं लोकनाथस्य हृत्वा भार्यां गमिष्यसि ॥ १४ ॥

क्षिप्रं विसृज वैदेहीं मा त्वा घोरेण चक्षुषा ।
दहेद्दहनकल्पेन वृत्रमिन्द्राशनिर्यथा ॥ १५ ॥

सर्पमाशीविषं बद्ध्वा वस्त्रान्ते नावबुध्यसे ।
ग्रीवायां प्रतिसक्तं च कालपाशं न पश्यसि ॥ १६ ॥

स भारः सौम्य भर्तव्यो यो नरं नावसादयेत् ।
तदन्नमपि भोक्तव्यं जीर्यते यदनामयम् ॥ १७ ॥

यत्कृत्वा न भवेद्धर्मो न कीर्तिर्न यशो भुवि।
शरीरस्य भवेत् खेदः कस्तत्कर्म समाचरेत् ॥ १८ ॥

षष्टिर्वर्षसहस्राणि मम जातस्य रावण।
पितृपैतामहं राज्यं यथावदनुतिष्ठतः ॥ १९ ॥

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी।
तथाप्यादाय वैदेहीं कुशली न गमिष्यसि ॥ २० ॥

न शक्तस्त्वं बलाद्धर्तुं वैदेहीं मम पश्यतः।
हेतुभिर्न्यायसंयुक्तैर्ध्रुवां वेदश्रुतीमिव ॥ ॥ २१ ॥

युध्यस्व यदि शूरोऽसि मुहूर्तं तिष्ठ रावण।
शयिष्यसे हतो भूमौ यथा पूर्वं खरस्तथा ॥ २२ ॥

असकृत् संयुगे येन निहता दैत्यदानवाः।
न चिराच्चीरवासास्त्वां रामो युधि वधिष्यति ॥ २३ ॥

किं नु शक्यं मया कर्तुं गतौ दूरं नृपात्मजौ।
क्षिप्रं त्वं नश्यसे नीच तयोर्भीतो न संशयः ॥ २४ ॥

नहि मे जीवमानस्य नयिष्यसि शुभामिमाम्।
सीतां कमलपत्राक्षीं रामस्य महिषीं प्रियाम् ॥ २५ ॥

अवश्यं तु मया कार्यं प्रियं तस्य महात्मनः।
जीवितेनापि रामस्य तथा दशरथस्य च ॥ २६ ॥

तिष्ठ तिष्ठ दशग्रीव मुहूर्तं पश्य रावण।
युद्धातिथ्यं प्रदास्यामि यथाप्राणं निशाचर ॥ २७ ॥

वृन्तादिव फलं त्वां तु पातयेयं रथोत्तमात् ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे पञ्चाशः सर्गः ॥

आदितः श्लोकाः 8407 आरण्यकाण्डे आदितः श्लोकाः 1695

एकपञ्चाशः सर्गः

जटायूरावणयुद्धम् ॥

इत्युक्तस्य यथान्यायं रावणस्य जटायुषा।
क्रुद्धस्याग्निनिभाः सर्वा रेजुर्विंशतिदृष्टयः ॥ १ ॥

संरक्तनयनः क्रोधात्तप्तकाञ्चनकुण्डलः।
राक्षसेन्द्रोऽभिदुद्राव पतगेन्द्रममर्षणः ॥ २ ॥

स संप्रहारस्तुमुलस्तयोस्तस्मिन् महावने।
बभूव वातोद्धतयोर्मेघयोर्गगने यथा ॥ ३ ॥

तद्बभूवाद्भुतं युद्धं गृध्रराक्षसयोस्तदा।
सपक्षयोर्माल्यवतोर्महापर्वतयोरिव ॥ ४ ॥

ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः।
अभ्यवर्षन्महाघोरैर्गृध्रराजं महाबलः ॥ ५ ॥

स तानि शरजालानि गृध्रः पत्ररथेश्वरः।
जटायुः प्रतिजग्राह रावणास्त्राणि संयुगे ॥ ६ ॥

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः।
चकार बहुधा गात्रे व्रणान् पतगसत्तमः ॥ ७ ॥

अथ क्रोधाद्दशग्रीवो जग्राह दश मार्गणान्।
मृत्युदण्डनिभान् घोराञ्छत्रुमर्दनकांक्षया ॥ ८ ॥

स तैर्बाणैर्महावीर्यः पूर्णमुक्तैरजिह्मगैः।
बिभेद निशितैस्तीक्ष्णैर्गृध्रं घोरैश्शिलीमुखैः ॥ ९ ॥

स रावणरथे पश्यञ्जानकीं बाष्पलोचनाम्।
अचिन्तयित्वा तान् बाणान्राक्षसं समभिद्रवत् ॥ १० ॥

ततोऽस्य सशरं चापं मुक्तामणिविभूषितम्।
चरणाभ्यां महातेजा बभञ्ज पतगेश्वरः ॥ ११ ॥

ततोऽन्यद्धनुरादाय रावणः क्रोधमूर्च्छितः।
ववर्ष शरवर्षाणि शतशोऽथ सहस्रशः ॥ १२ ॥

शरैरावारितस्तस्य संयुगे पतगेश्वरः।
कुलायमुपसंप्राप्तः पक्षीव स बभौ तदा ॥ १३ ॥

स तानि शरजालानि पक्षाभ्यां तु विधूय च।
चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ॥ १४ ॥

तच्चाग्निसदृशं दीप्तं रावणस्य शरावरम् ।
पक्षाभ्यां स महावीर्यो व्यधुनोत्पतगेश्वरः ॥ १५ ॥

काञ्चनोरश्छदान्दिव्यान्पिशाचवदनान् खरान् ।
तांश्चास्य जवसम्पन्नाञ्जघान समरे बली ॥ १६ ॥

वरं त्रिवेणुसम्पन्नं कामगं पावकार्चिषम् ।
मणिहेमविचित्राङ्गं बभञ्ज च महारथम् ॥ १७ ॥

पूर्णचन्द्रप्रतीकाशं छत्रं च व्यजनैस्सह ।
पातयामास वेगेन ग्राहिभी राक्षसैस्सह ॥ १८ ॥

सारथेश्चास्य वेगेन तुण्डेनैव महच्छिरः ।
पुनर्व्यपाहरच्छ्रीमान् पक्षिराजो महाबलः ॥ १९ ॥

स भग्नधन्वा विरथो हताश्वो हतसारथिः ।
अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥ २० ॥

दृष्ट्वा निपतितं भूमौ रावणं भग्नवाहनम् ।
साधु सध्विति भूतानि गृध्रराजमपूजयन् ॥ २१ ॥

परिश्रान्तं तु तं दृष्ट्वा जरया पक्षियूथपम् ।
उत्पपात पुनर्हृष्टो मैथिलीं गृह्य रावणः ॥ २२ ॥

तं प्रहृष्टं निधायाङ्के गच्छन्तं जनकात्मजाम् ।
गृध्रराजस्समुत्पत्य समभिद्रुत्य रावणम् ।
समावार्य महातेजा जटायुरिदमब्रवीत् ॥ २३ ॥

वज्रसंस्पर्शबाणस्य भार्यां रामस्य रावण।
अल्पबुद्धे हरस्येनां वधाय खलु रक्षसाम् ॥ २४ ॥

समित्रबन्धुस्सामात्यस्सबलस्त्वं रिच्छदः।
विषपानं पिबस्येतत्पिपासित इवोदकम् ॥ २५ ॥

अनुबन्धमजानन्तः कर्मणामविचक्षणाः।
शीघ्रमेव विनश्यन्ति यथा त्वं विनशिष्यसि ॥ २३ ॥

बद्धस्त्वं कालपाशेन क्व गतस्तस्य मोक्ष्यसे।
वधाय बडिशं गृह्य सामिषं जलजो यथा ॥ २७ ॥

न हि जातु दुराधर्षौ काकुत्स्थौ तव रावण।
धर्षणं चाश्रमस्यास्य क्षमिष्येते तु राघवौ ॥ २८ ॥

यथा त्वया कृतं कर्म भीरुणा लोकगर्हितम्।
तस्करा चरितो मार्गो नैष वीरनिषेवितः ॥ २९ ॥

युध्यस्व यदि शूरोऽसि मुहूर्तं तिष्ठ रावण ॥ ३० ॥

शयिष्यसे हतो भूमौ यथा भ्राता खरस्तथा ॥ ३१ ॥

परेतकाले पुरुषो यत्कर्म प्रतिपद्यते।
विनाशायात्मनोऽधर्म्यं प्रतिपन्नोऽसि कर्म तत् ॥ ३२ ॥

पापानुबन्धो वै यस्य कर्मणः कर्म को नु तत्।
कुर्वीत लोकाधिपतिः स्वयंभूर्भगवानपि ॥ ३३ ॥

एवमुक्त्वा शुभं वाक्यं जटायुस्तस्य रक्षसः।
निपपात भृशं पृष्ठे दशग्रीवस्य वीर्यवान् ॥ ३४ ॥

तं गृहीत्वा नखैस्तीक्ष्णैर्विरराद समन्ततः
अधिरूढो गजारोहो यथा स्याद्दुष्टवारणम् ॥ ३५ ॥

विरराद नखैरस्य तुण्डं पृष्ठे समर्पयन्।
केशांश्चोत्पाटयामास नखपक्षमुखायुधः ॥ ३६ ॥

स तथा गृध्रराजेन क्लिश्यमानो मुहुर्मुहुः।
अमर्षस्फुरितोष्ठस्सन् प्राकम्पत स रावणः ॥ ३७ ॥

संपरिष्वज्य वैदेहीं वामेनाङ्केन रावणः।
तलेनाभिजघानार्तो जटायुं क्रोधमूर्च्छितः ॥ ३८ ॥

जटायुस्तमभिक्रम्य तुण्डेनास्य खगाधिपः।
वामबाहून्दश तदा व्यपाहरदरिन्दमः ॥ ३९ ॥

संछिन्नबाहोस्सद्यैव बाहवस्सहसाऽभवन्।
विषज्वालावलीयुक्ता वल्मीकादिव पन्नगाः ॥ ४० ॥

ततः क्रोधादशग्रीवस्सीतामुत्सृज्य वीर्यवान्।
मुष्टिभ्यां चरणाभ्यां च गृध्रराजमपोथयत् ॥ ४१ ॥

ततो मुहूर्तं सङ्ग्रामो बभूवातुलवीर्ययोः।
राक्षसानां च मुख्यस्य पक्षिणां प्रवरस्य च ॥ ४२ ॥

तस्य व्यायच्छमानस्य रामस्यार्थेऽथ रावणः।
पक्षौ पार्श्वौ च पादौ च खड्गमुद्धृत्य सोऽच्छिनत्॥४३॥

स छिन्नपक्षस्सहसा रक्षसा रौद्रकर्मणा।
निपपात ततो गृध्रो धरण्यामल्पजीवितः ॥ ४४ ॥

तं दृष्ट्वा पतितं भूमौ क्षतजार्द्रं जटायुषम्।
अभ्यधावत वैदेही स्वबन्धुमिव दुःखिता ॥ ४५ ॥

तं नीलजीमूतनिकाशकल्पं
सुपाण्डुरोरस्कमुदारवीर्यम्।
ददर्श लङ्काधिपतिः पृथिव्यां
जटायुषं शान्तमिवाग्निदावम् ॥ ४६ ॥

ततस्तु तं पत्ररथं महीतले
निपातितं रावणवेगमर्दितम्।
पुनः परिष्वज्य शशिप्रभानना
रुरोद सीता जनकात्मजा तदा ॥ ४७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकपञ्चाशः सर्गः ॥

आदितः श्लोकाः 8454 आरण्यकाण्डे आदितः श्लोकाः 1742



द्विपञ्चाशः सर्गः

सीताविलापः

तमल्पजीवितं भूमौ स्फुरन्तं राक्षसाधिपः।
ददर्श गृध्रं पतितं समीपे राघवाश्रमात् ॥ १ ॥

सा तु ताराधिपमुखी रावणेन समीक्ष्य तम्।
गृध्रराजं विनिहतं विललाप सुदुःखिता ॥ २ ॥

निमित्तं लक्षणज्ञानं शकुनिस्वरदर्शनम्।
अवश्यं सुखदुःखेषु नराणां प्रतिदृश्यते ॥ ३ ॥

नूनं राम न जानासि महद्व्यसनमात्मनः।
धावन्ति नूनं काकुत्स्थं मदर्थं मृगपक्षिणः ॥ ४ ॥

अयं हि पापचारेण मां त्रातुमभिसङ्गतः।
शेते विनिहतो भूमौ ममाभाग्याद्विहङ्गमः ॥ ५ ॥

त्राहि मामद्य काकुत्स्थ लक्ष्मणेति वराङ्गना।
सुसंत्रस्ता समाक्रन्दच्छृण्वतां तु यथाऽन्तिके ॥ ६ ॥

तां क्लिष्टमाल्याभरणां विलपन्तीमनाथवत्।
अभ्यधावत वैदेहीं रावणो राक्षसाधिपः ॥ ७ ॥

तां लतामिव वेष्टन्तीमालिङ्गन्तीं महाद्रुमान्।
मुञ्च मुञ्चेति बहुशः प्रवदन् राक्षसाधिपः ॥ ८ ॥

क्रोशन्तीं राम रामेति जग्राहान्तकसन्निभः ॥ ९ ॥

प्रधर्षितायां सीतायां बभूव सचराचरम् ।
जगत्सर्वममर्यादं तमसाऽन्धेन संवृतम् ॥ १० ॥

न वाति मारुतस्तत्र निष्प्रभोऽभूद्दिवाकरः ॥ ११ ॥

दृष्ट्वा दीनां परामृष्टां सीतां दिव्येन चक्षुषा ।
कृतं कार्यमिति श्रीमान् व्याजहार पितामहः ॥ १२ ॥

प्रहृष्टा व्यथिताश्वासन् सर्वे ते परमर्षयः ।
दृष्ट्वा सीतां परामृष्टां दण्डकारण्यवासिनः ॥ १३ ॥

शोकेन महताऽऽविष्टा बभूवुर्गतचेतसः ।
रावणस्य विनाशं च प्राप्तं बुद्ध्वा यदृच्छया ॥ १४ ॥

स तु तां राम रामेति रुदन्तीं लक्ष्मणेति च ।
जगामादाय चाकाशं रावणो राक्षसेश्वरः ॥ १५ ॥

तप्ताभरणवर्णाङ्गी पीतकौशेयवासिनी ।
रराज राजपुत्री तु विद्युत्सौदामिनी यथा ॥ १६ ॥

उद्धूतेन च वस्त्रेण तस्याः पीतेन रावणः ।
अधिकं प्रतिबभ्राज गिरिर्दीप्त इवाग्निना ॥ १७ ॥

तस्याः परमकल्याण्यास्ताम्राणि सुरभीणि च ।
पद्मपत्राणि वैदेह्या अभ्यकीर्यन्त रावणम् ॥ १८ ॥

तस्याः कौशेयमुद्भूतमाकाशे कनकप्रभम् ।
बभौ चादित्यरागेण ताम्रमभ्रमिवातपे ॥ १९ ॥

तस्यास्तत्सुनसं वक्त्रमाकाशे रावणाङ्कगम् ।
न रराज विना रामं विनालमिव पङ्कजम् ॥ २० ॥

बभूव जलदं नीलं भित्त्वा चन्द्र इवोदितः ।
सुललाटं सुकेशान्तं पद्मगर्भाभमव्रणम् ॥ २१ ॥

शुक्लैस्सुविमलैर्दन्तैः प्रभावद्भिरलङ्कृतम् ।
तस्यास्तद्विमलं वक्त्रमाकाशे रावणाङ्कगम् ॥ २२ ॥

रुदितं व्यपमृष्टास्रं चन्द्रवत्प्रियदर्शनम् ।
सुनेत्रं चारुताम्रोष्ठमाकाशे हाटकप्रभम् ॥ २३ ॥

राक्षसेन्द्रसमाधूतं तस्यास्तद्वदनं शुभम् ।
शुशुभे न विना रामं दिवा चन्द्र इवोदितः ॥ २४ ॥

सा हेमवर्णा नीलाङ्गं मैथिली राक्षसाधिपम् ।
शुशुभे काञ्चनी काञ्ची नीलं मणिमिवाश्रिता ॥ २५ ॥

सा पद्मगौरी हेमाभा रावणं जनकात्मजा ।
विद्युद्घनमिवाविश्य शुशुभे तप्तभूषणा ॥ २६ ॥

तरुप्रवालरक्ता सा नीलाङ्गं राक्षसेश्वरम् ।
प्राशोभयत वैदेही गजं कक्ष्येव काञ्चनी ॥ २७ ॥

तस्या भूषणघोषेण वैदेह्या राक्षसेश्वरः ।
बभौ सचपलो नीलस्सघोष इव तोयदः ॥ २८ ॥

उत्तमाङ्गाच्च्युता तस्याः पुष्पवृष्टिस्समन्ततः ।
सीताया ह्रियमाणायाः पपात धरणीतले ॥ २९ ॥

सा तु रावणवेगेन पुष्पवृष्टिस्समन्ततः ।
समाधूता दशग्रीवं पुनरेवाभ्यवर्तत ॥ ३० ॥

अभ्यवर्तत पुष्पाणां धारा वैश्रवणानुजम् ।
नक्षत्रमाला विमला मेरुं नगमिवोन्नतम् ॥ ३१ ॥

चरणान्नूपुरं भ्रष्टं वैदेह्या रत्नभूषितम् ।
विद्युन्मण्डलसंकाशं पपात मधुरस्वरम् ॥ ३२ ॥

तां महोल्कामिवाकाशे दीप्यमानां स्वतेजसा ।
जहाराकाशमाविश्य सीतां वैश्रवणानुजः ॥ ३३ ॥

तस्यास्तान्यग्निवर्णानि भूषणानि महीतले ।
सघोषाण्यवकीर्यन्त क्षीणास्तारा इवाम्बरात् ॥ ३४ ॥

तस्याः स्तनान्तराद्भ्रष्टो हारस्ताराधिपद्युतिः ।
वैदेह्या निपतन् भाति गङ्गेव गगनाच्च्युता ॥ ३५ ॥

उत्पन्नवाताभिहता नानाद्विजगणायुताः ।
धूमा भैरिति विताम्रा व्याजहुरिव पादपाः ॥ ३६ ॥

नलिन्यो ध्वस्तकमलास्त्रस्तमीनजलेचराः ।
सखीमिव गतोच्छ्वासामन्वशोचन्त मैथिलीम् ॥ ३७ ॥

समन्तादभिसंपत्य सिंहव्याघ्रमृगद्विजाः ।
अन्वधावंस्तदा रोषात्सीतां छायानुगामिनः ॥ ३८ ॥

जलप्रपातास्रमुखाः शृङ्गैरुच्छ्रितबाहवः ।
सीतायां ह्रियमाणायां विक्रोशन्तीव पर्वताः ॥ ३९ ॥

ह्रियमाणान्तु वैदेहीं दृष्ट्वा दीनो दिवाकरः ।
प्रविध्वस्तप्रभः श्रीमानासीत्पाण्डरमण्डलः ॥ ४० ॥

नास्ति धर्मः कुतस्सत्यं नार्जवं नानृशंसता ।
यत्र रामस्य वैदेहीं भार्यां हरति रावणः ।
इति सर्वाणि भूतानि गणशः पर्यदेवयन् ॥ ४१ ॥

वित्रस्तका दीनमुखा रुरुदुर्मृगपोतकाः ।
उद्वीक्ष्योद्वीक्ष्य नयनैरास्रपाताविलेक्षणाः ॥ ४२ ॥

सुप्रवेपितगात्राश्च बभूवुर्वनदेवताः ।
विक्रोशन्तीं दृढं सीतां दृष्ट्वा दुःखं तथा गताम् ॥ ४३ ॥

तां तु लक्ष्मण रामेति क्रोशन्तीं मधुरस्वरम् ।
अवेक्षमाणां बहुशो वैदेहीं धरणीतलम् ॥ ४४ ॥

सीतामाकुलकेशान्तां विप्रमृष्टविशेषकाम् ।
जहारात्मविनाशाय दशग्रीवो मनस्विनीम् ॥ ४५ ॥

ततस्तु सा चारुदती शुचिस्मिता
विनाकृता बन्धुजनेन मैथिली ।
अपश्यती राघवलक्ष्मणावुभौ
विवर्णवक्त्रा भयभारपीडिता ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे द्विपञ्चाशः सर्गः ॥

आदितः श्लोकाः 8500 आरण्यकाण्डे आदितः श्लोकाः 1788

त्रिपञ्चाशः सर्गः

रावणनिन्दा ॥

खमुत्पतन्तं तं दृष्ट्वा मैथिली जनकात्मजा ।
दुःखिता परमोद्विग्ना भये महति वर्तिनी ॥ १ ॥

रोषरोदनताम्राक्षी भीमाक्षं राक्षसाधिपम् ।
रुदन्ती करुणं सीता ह्रियमाणेदमब्रवीत् ॥ २ ॥

न व्यपत्रपसे नीच कर्मणाऽनेन रावण ।
भर्त्राविरहितां यो मां चोरयित्वा पलायसे ॥ ३ ॥

त्वयैव नूनं दुष्टात्मन् भीरुणा हर्तुमिच्छता ।
ममापवाहितो भर्ता मृगरूपेण मायया ॥ ४ ॥

यो हि मामुद्यतस्त्रातुं सोऽप्ययं विनिपातितः ।
गृध्रराजः पुराणोऽसौ श्वशुरस्य सखा मम ॥ ५ ॥

परमं खलु ते वीर्यं दृश्यते राक्षसाधम ।
विश्राव्य नामधेयं हि युद्धेनास्मि जिता त्वया ॥ ६ ॥

ईदृशं गर्हितं कर्म कथं कृत्वा न लज्जसे ।
स्त्रियाश्च हरणं नीच रहिते तु परस्य च ॥ ७ ॥

कथयिष्यन्ति लोकेषु पुरुषाः कर्म कुत्सितम् ।
सुनृशंसमधर्मिष्ठं तव शौण्डीर्यमानिनः ॥ ८ ॥

धिक्ते शौर्यं च सत्त्वं च यत्त्वं कथितवांस्तदा ।
कुलाक्रोशकरं लोके धिक्ते चारित्रमीदृशम् ॥ ९ ॥

किं कर्तुं शक्यमेवं हि यज्जवेनैव धावसि ।
मुहूर्तमपि तिष्ठ त्वं न जीवन्प्रतियास्यसि ॥ १० ॥

न हि चक्षुष्पथं प्राप्य तयोः पार्थिवपुत्रयोः ।
ससैन्योऽपि समर्थस्त्वं मुहूर्तमपि जीवितुम् ॥ ११ ॥

न त्वं तयोः शरस्पर्शं सोढुं शक्तः कथंचन ।
वने प्रज्वलितस्येव स्पर्शमग्नेर्विहङ्गमः ॥ १२ ॥

साधु कृत्वाऽऽत्मनः पथ्यं साधु मां मुञ्च रावण ॥ १३ ॥

मत्प्रधर्षणरुष्टो हि भ्रात्रा सह पतिर्मम ।
विधास्यति विनाशाय त्वं मां यदि न मुञ्चसि ॥ १४ ॥

येन त्वं व्यवसायेन बलान्मां हर्तुमिच्छसि ।
व्यवसायः स ते नीच भविष्यति निरर्थकः ॥ १५ ॥

न ह्यहं तमपश्यन्ती भर्तारं विबुधोपमम्।
उत्सहे शत्रुवशगा प्राणान्धारयितुं चिरम् ॥ १६ ॥

न नूनं चात्मनः श्रेयः पथ्यं वा समवेक्षसे।
मृत्युकाले यथा मर्त्यो विपरीतानि सेवते ॥ १७ ॥

मुमूर्षूणां हि सर्वेषां यत्पथ्यं तन्न रोचते।
पश्याम्यद्य हि कण्ठे त्वां कालपाशावपाशितम् ॥ १८ ॥

यथा चास्मिन्भयस्थाने न बिभेषि दशानन।
व्यक्तं हिरण्मयान्हि त्वं संपश्यसि महीरुहान् ॥ १९ ॥

नदीं वैतरणीं घोरां रुधिरौघप्रवाहिनीम्।
असिपत्रवनं चैव भीमं पश्यसि रावण ॥ २० ॥

तप्तकाञ्चनपुष्पां च वैडूर्यप्रवरच्छदाम्।
द्रक्ष्यसे शाल्मलीं तीक्ष्णैरायसैः कण्टकैश्चिताम् ॥ २१ ॥

न हि त्वमीदृशं कृत्वा तस्यालीकं महात्मनः।
चरितुं शक्ष्यसि चिरं विषं पीत्वेव निर्घृणः ॥ २२ ॥

बद्धस्त्वं कालपाशेन दुर्निवारेण रावण।
क्व गतो लप्स्यसे शर्म मम भर्तुर्महात्मनः ॥ २३ ॥

निमेषान्तरमात्रेण विना भ्रातरमाहवे।
राक्षसा निहता येन सहस्राणि चतुर्दश ॥ २४ ॥

कथं स राघवो वीरस्सर्वास्त्रकुशलो बली ।
न त्वां हन्याच्छरैस्तीक्ष्णैरिष्टभार्यापहारिणम् ॥ २५ ॥

एतच्चान्यच्च परुषं वैदेही रावणाङ्कगा ।
भयशोकसमाविष्टा करुणं विललाप ह ॥ २६ ॥

तथा भृशार्तां बहु चैव भाषिणीं
विलापपूर्वं करुणं च भामिनीम् ।
जहार पापः करुणं विवेष्टतीं
नृपात्मजामागतगात्रवेपथुम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे त्रिपञ्चाशः सर्गः ॥

आदितः श्लोकाः 8527 आरण्यकाण्डे आदितः श्लोकाः 1815



चतुष्पञ्चाशः सर्गः

लङ्काप्राप्तिः ॥

ह्रियमाणा तु वैदेही कंचिन्नाथमपश्यती ।
ददर्श गिरिशृङ्गस्थान्पञ्च वानरपुङ्गवान् ॥ १ ॥

तेषां मध्ये विशालाक्षी कौशेयं कनकप्रभम् ।
उत्तरीयं वरारोहा शुभान्याभरणानि च ॥
मुमोच यदि रामाय शंसेयुरिति मैथिली ॥ २ ॥

वस्त्रमुत्सृज्य तन्मध्ये निक्षिप्तं सह भूषणम् ।
संभ्रमात्तु दशग्रीवस्तत्कर्म न स बुद्धवान् ॥ ३ ॥

पिङ्गाक्षास्तां विशालाक्षीं नेत्रैरनिमिषैरिव।
विक्रोशन्तीं तथा सीतां ददृशुर्वानरर्षभाः ॥ ४ ॥

स च पम्पामतिक्रम्य लङ्कामभिमुखः पुरीम्।
जगाम रुदतीं गृह्य वैदेहीं राक्षसेश्वरः ॥ ५ ॥

तां जहार सुसंहृष्टो रावणो मृत्युमात्मनः।
उत्सङ्गेनैव भुजगीं तीक्ष्णदंष्ट्रां महाविषाम् ॥ ६ ॥

वनानि सरितः शैलान् सरांसि च विहायसा।
स क्षिप्रं समतीयाय शरश्चापादिव च्युतः ॥ ७ ॥

तिमिनक्रनिकेतं तु [illegible]मक्षयम्।
सरितां शरणं गत्वा समतीयाय सागरम् ॥ ८ ॥

संभ्रमात्परिवृत्तोर्मी रुद्धमीनमहोरगः।
वैदेह्यां ह्रियमाणायां बभूव वरुणालयः ॥ ९ ॥

अन्तरिक्षगता वाचस्तस्रुजुश्चारणास्तदा।
एतदन्तो दशग्रीव इति सिद्धास्तदाऽब्रुवन् ॥ १० ॥

स तु सीतां विवेष्टन्तीमङ्केनादाय रावणः।
प्रविवेश पुरीं लङ्कां रूपिणीं मृत्युमात्मनः ॥ ११ ॥

सोऽभिगम्य पुरीं लङ्कां सुविभक्तमहापथाम्।
संरुद्धकक्ष्याबहुलं स्वमन्तःपुरमाविशत् ॥ १२ ॥

तत्र तामसितापाङ्गां शोकमोहपरायणाम् ।
निदधे रावणः सीतां मयो मायामिवासुरीम् ॥ १३ ॥

अब्रवीच्च दशग्रीवः पिशाचीर्घोरदर्शनाः ।
यथा नेमां पुमान् स्त्री वा सीतां पश्यत्यसंमतः ॥ १४ ॥

मुक्तामणिसुवर्णानि वस्त्राण्याभरणानि च ।
यद्यदिच्छेत्तदेवास्या देयं मच्छन्दतो यथा ॥ १५ ॥

या च वक्ष्यति वैदेहीं वचनं किञ्चिदप्रियम् ।
अज्ञानाद्यदि वा ज्ञानान्न तस्या जीवितं प्रियम् ॥ १६ ॥

तथोक्त्वा राक्षसीस्तास्तु राक्षसेन्द्रः प्रतापवान् ।
निष्क्रम्यान्तःपुरात्तस्मात्किं कृत्यमिति चिन्तयन् ॥ १७ ॥

ददर्शाष्टौ महावीर्यान्राक्षसान् पिशिताशनान् ॥ १८ ॥

स तान् दृष्ट्वा महावीर्यो वरदानेन मोहितः ।
उवाचैतानिदं वाक्यं प्रशस्य बलवीर्यतः ॥ १९ ॥

नानाप्रहरणाः क्षिप्रमितो गच्छत सत्वराः ।
जनस्थानं हतस्थानं भूतपूर्वं खरालयम् ॥ २० ॥

तत्रोष्यतां जनस्थाने शून्ये निहतराक्षसे ।
पौरुषं बलमाश्रित्य त्रासमुत्सृज्य दूरतः ॥ २१ ॥

बलं हि सुमहद्यन्मे जनस्थाने निवेशितम् ।
सदूषणखरं युद्धे हतं रामेण सायकैः ॥ २२ ॥

तत्र क्रोधो ममामर्षाद्धैर्यस्योपरि वर्तते।
वैरं च सुमहज्जातं रामं प्रति सुदारुणम् ॥ २३ ॥
तं त्विदानीमहं हत्वा खरदूषणघातिनम्।
रामं शर्मोपलप्स्यामि धनं लब्ध्वेव निर्धनः ॥ २४ ॥
जनस्थाने वसद्भिस्तु भवद्भी राममाश्रिता।
प्रवृत्तिरुपनेतव्या किं करोतीति तत्त्वतः ॥ २५ ॥
अप्रमादाच्च गन्तव्यं सर्वैरेव निशाचरैः।
कर्तव्यश्च सदा यत्नो राघवस्य वधं प्रति ॥ २६ ॥
युष्माकं हि बलज्ञोऽहं बहुशो रणमूर्धनि।
अतश्चास्मिञ्जनस्थाने मया यूयं नियोजिताः ॥ २७ ॥

ततः प्रियं वाक्यमुपेत्य राक्षसा
महार्थमष्टावभिवाद्य रावणम्।
विहाय लङ्कां सहिताः प्रतस्थिरे
यतो जनस्थानमलक्ष्यदर्शनाः ॥ २८ ॥

ततस्तु सीतामुपलभ्य रावणः
सुसंप्रहृष्टः परिगृह्य मैथिलीम्।
प्रसज्य रामेण च वैरमुत्तमं
बभूव मोहान्मुदितः स रावणः ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे चतुष्पञ्चाशः सर्गः ॥

पञ्चपञ्चाशः सर्गः

सीताप्रलोभनम् ॥

सन्दिश्य राक्षसान् घोरान् रावणोऽष्टौ महाबलान् ।
आत्मानं बुद्धिवैक्लव्यात्कृतकृत्यममन्यत ॥ १ ॥

स चिन्तयानो वैदेहीं कामबाणसमर्पितः ।
प्रविवेश गृहं रम्यं सीतां द्रष्टुमभित्वरन् ॥ २ ॥

स प्रविश्य तु तद्वेश्म रावणो राक्षसेश्वरः ।
अपश्यद्राक्षसीमध्ये सीतां शोकपरायणाम् ॥ ३ ॥

अश्रुपूर्णमुखीं दीनां शोकभारावपीडिताम् ।
वायुवेगैरिवाक्रान्तां मज्जन्तीं नावमर्णवे ॥ ४ ॥

मृगयूथपरिभ्रष्टां मृगीं श्वभिरिवावृताम् ।
अधोमुखमुखीं दीनामभ्येत्य स निशाचरः ॥ ५ ॥

तां तु शोकवशां दीनामवशां राक्षसाधिपः ।
स बलाद्दर्शयामास गृहं देवगृहोपमम् ॥ ६ ॥

हर्म्यप्रासादसंबाधं स्त्रीसहस्रनिषेवितम् ।
नाना पक्षिगणैर्जुष्टं नाना रत्नविभूषितम् ॥ ७ ॥

काञ्चनैस्तापनीयैश्च स्फाटिकै राजतैरपि ।
वज्रवैडूर्यचित्रैश्च स्तम्भैर्दृष्टिमनोहरैः ॥ ८ ॥

दिव्यदुन्दुभिनिर्ह्रादं तप्तकाञ्चनतोरणम् ।
सोपानं काञ्चनं चित्रमारुरोह तया सह ॥ ९ ॥

दान्तका राजताश्चैव गवाक्षाः प्रियदर्शनाः।
हेमजालावृताश्चासंस्तत्र प्रासादपङ्क्तयः ॥ १० ॥

सुधामणिविचित्राणि भूमिभागानि सर्वशः।
दशग्रीवः स्वभवने प्रादर्शयत मैथिलीम् ॥ ११ ॥

दीर्घिकाः पुष्करिण्यश्च नानावृक्षसमन्विताः।
रावणो दर्शयामास सीतां शोकपरायणाम् ॥ १२ ॥

दर्शयित्वा तु वैदेह्याः कृत्स्नं तद्भवनोत्तमम्।
उवाच वाक्यं पापात्मा रावणो जनकात्मजाम् ॥ १३ ॥

दश राक्षसकोट्यश्च द्वाविंशतिरथापराः।
तेषां प्रभुरहं सीते सर्वेषां भीमकर्मणाम् ॥ १४ ॥

वर्जयित्वा जरावृद्धान् बालांश्च रजनीचरान्।
सहस्रमेकमेकस्य मम कार्यपुरःसरम् ॥ १५ ॥

यदिदं राजतन्त्रं मे त्वयि सर्वं प्रतिष्ठितम्।
जीवितं च विशालाक्षि त्वं मे प्राणैर्गरीयसी ॥ १६ ॥

बहूनां स्त्रीसहस्राणां मम योऽसौ परिग्रहः।
तासां त्वमीश्वरी सीते मम भार्या भव प्रिये ॥ १७ ॥

साधु किं तेऽन्यथा बुद्ध्या रोचयस्व वचो मम।
भजस्व माऽभितप्तस्य प्रसादं कर्तुमर्हसि ॥ १८ ॥

परिक्षिप्ता समुद्रेण लङ्केयं शतयोजना।
नेयं धर्षयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ १९ ॥

न देवेषु न यक्षेषु न गन्धर्वेषु पक्षिषु।
अहं पश्यामि लोकेषु यो मे वीर्यसमो भवेत् ॥ २० ॥

राज्यभ्रष्टेन दीनेन तापसेन गतायुषा।
किं करिष्यसि रामेण मानुषेणाल्पतेजसा ॥ २१ ॥

भजस्व सीते मामेव भर्ताऽहं सदृशस्तव।
यौवनं ह्यध्रुवं भीरु रमस्वेह मया सह ॥ २२ ॥

दर्शने मा कृथा बुद्धिं राघवस्य वरानने।
काऽस्य शक्तिरिहागन्तुमपि सीते मनोरथैः ॥ २३ ॥

न शक्यो वायुराकाशे पाशैर्बद्धुं महाजवः।
दीप्यमानस्य वाप्यग्नेर्ग्रहीतुं विमला शिखा ॥ २४ ॥

त्रयाणामपि लोकानां न तं पश्यामि शोभने।
विक्रमेण नयेद्यस्त्वां मद्बाहुपरिपालिताम् ॥ २५ ॥

लङ्कायां सुमहद्राज्यमिदं त्वमनुपालय।
त्वत्प्रेष्या मद्विधाश्चैव देवाश्चापि चराचराः ॥ २६ ॥

अभिषेकोदकक्लिन्ना तुष्टा च रमयस्व माम् ॥ २७ ॥

दुष्कृतं यत्पुरा कर्म वनवासेन संगतम्।
यश्च ते सुकृतो धर्मस्तस्येह फलमाप्नुहि ॥ २८ ॥

इह माल्यानि सर्वाणि दिव्यगन्धानि मैथिलि।
भूषणानि च मुख्यानि सेवस्व च मया सह ॥ २९ ॥

पुष्पकं नाम सुश्रोणि भ्रातुर्वैश्रवणस्य मे।
विमानं सूर्यसङ्काशं तरसा निर्जितं मया ॥ ३० ॥
विशालं रमणीयं च तद्विमानं मनोजवम्।
तत्र सीते मया सार्धं विहरस्व यथासुखम् ॥ ३१ ॥
वदनं पद्मसङ्काशं विमलं चारुदर्शनम्।
शोकार्तं तु वरारोहे न भ्राजति वरानने ॥ ३२ ॥
एवं वदति तस्मिन्सा वस्त्रान्तेन वराङ्गना।
पिधायेन्दुनिभं सीता मुखमश्रूण्यवर्तयत् ॥ ३३ ॥
ध्यायन्तीं तामिवास्वस्थां दीनां चिन्ताहतप्रभाम्।
उवाच वचनं पापो रावणो राक्षसेश्वरः ॥ ३४ ॥
अलं व्रीडेन वैदेहि धर्मलोपकृतेन ते।
आर्षोऽयं दैवनिष्यन्दो यस्त्वामभिगमिष्यति ॥ ३५ ॥
एतौ पादौ महास्निग्धौ शिरोभिः परिपीडितौ।
प्रसादं कुरु मे क्षिप्रं वश्यो दासोऽहमस्मि ते ॥ ३६ ॥
इमाः शून्या मया वाचः शुष्यमाणेन भाषिताः।
न चापि रावणः काञ्चिन्मूर्ध्ना स्त्रीं प्रणमेत ह ॥ ३७ ॥
एवमुक्त्वा दशग्रीवो मैथिलीं जनकात्मजाम्।
कृताञ्जलिरापन्नो ममेयमिति मन्यते ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे पञ्चपञ्चाशः सर्गः ॥

षट्पञ्चाशः सर्गः

संवत्सरावधिकरणम् ॥

सा तथोक्ता तु वैदेही निर्भया शोककर्शिता ।
तृणमन्तरतः कृत्वा रावणं प्रत्यभाषत ॥ १ ॥

राजा दशरथो नाम धर्मसेतुरिवाचलः ।
सत्यसन्धः परिज्ञातो यस्य पुत्रः स राघवः ॥ २ ॥

रामो नाम स धर्मात्मा त्रिषु लोकेषु विश्रुतः ।
दीर्घबाहुर्विशालाक्षो दैवतं हि पतिर्मम ॥ ३ ॥

इक्ष्वाकूणां कुले जातः सिंहस्कन्धो महाद्युतिः ।
लक्ष्मणेन सह भ्रात्रा यस्ते प्राणान्हरिष्यति ॥ ४ ॥

प्रत्यक्षं यद्यहं तस्य त्वया स्यां धर्षिता बलात् ।
शयिता त्वं हतः सङ्ख्ये जनस्थाने यथा खरः ॥ ५ ॥

य एते राक्षसाः प्रोक्ता घोररूपा महाबलाः ।
राघवे निर्विषाः सर्वे सुपर्णे पन्नगा यथा ॥ ६ ॥

तस्य ज्याविप्रमुक्तास्ते शराः काञ्चनभूषणाः ।
शरीरं विधमिष्यन्ति गङ्गाकूलमिवोर्मयः ॥ ७ ॥

असुरैर्वा सुरैर्वा त्वं यद्यवध्योऽसि रावण ।
उत्पाद्य सुमहद्वैरं जीवंस्तस्य न मोक्ष्यसे ॥ ८ ॥

स ते जीवितशेषस्य राघवोऽन्तकरो बली ।
पशोर्यूपगतस्येव जीवितं तव दुर्लभम् ॥ ९ ॥

यदि पश्येत्स रामस्त्वां रोषदीप्तेन चक्षुषा ।
रक्षस्त्वमद्य निर्दग्धो गच्छेः सद्यः पराभवम् ॥ १० ॥

यश्चन्द्रं नभसो भूमौ पातयेन्नाशयेत वा ।
सागरं शोषयेद्वाऽपि स सीतां मोचयेदिह ॥ ११ ॥

गतायुस्त्वं गतश्रीको गतसत्त्वो गतेन्द्रियः ।
लङ्का वैधव्यसंयुक्ता त्वत्कृतेन भविष्यति ॥ १२ ॥

न ते पापमिदं कर्म सुखोदर्कं भविष्यति ।
याऽहं नीता विनाभावं पतिपार्श्वात्त्वया वने ॥ १३ ॥

स हि देवरसंयुक्तो मम भर्ता महाद्युतिः ।
निर्भयो वीर्यमाश्रित्य शून्ये वसति दण्डके ॥ १४ ॥

स ते दर्पं बलं वीर्यमुत्सेकं च तथाविधम् ।
अपनेष्यति गात्रेभ्यः शरवर्षेण संयुगे ॥ १५ ॥

यदा विनाशो भूतानां दृश्यते कालचोदितः ।
तदा कार्ये प्रमाद्यन्ति नराः कालवशंगताः ॥ १६ ॥

मां प्रधृष्य स ते कालः प्राप्तोऽयं राक्षसाधम ।
आत्मनो राक्षसानां च वधायान्तःपुरस्य च ॥ १७ ॥

इदमन्तःपुरं रम्यं रत्नस्थापितमीदृशम् ।
रामबाणानलः सर्वं दग्धं तव करिष्यति ॥ १८ ॥

न शक्या यज्ञमध्यस्था वेदिःस्रुग्भाण्डमण्डिता।
द्विजातिमन्त्रपूता च चण्डालेनावमर्दितुम् ॥ १९ ॥

तथाऽहं धर्मनित्यस्य धर्मपत्नी पतिव्रता।
त्वया स्प्रष्टुं न शक्याऽस्मि राक्षसाधम पापिना ॥ २० ॥

क्रीडन्ती राजहंसेन पद्मषण्डेषु नित्यदा।
हंसी सा तृणषण्डस्थं कथं पश्येत मद्विधम् ॥ २१ ॥

इदं शरीरं निःसंज्ञं बन्ध वा खादयस्व वा।
नेदं शरीरं रक्षिष्ये जीवितं चाऽपि राक्षस ॥ २२ ॥

न तु शक्ष्याम्युपक्रोशं पृथिव्यां दातुमात्मनः ॥ २३ ॥

एवमुक्त्वा तु वैदेही क्रोधात्सुपरुषं वचः।
रावणं मैथिली तत्र पुनर्नोवाच किञ्चन ॥ २४ ॥

सीताया वचनं श्रुत्वा परुषं रोमहर्षणम्।
प्रत्युवाच ततः सीतां भयसन्दर्शनं वचः ॥ २५ ॥

शृणु मैथिलि मद्वाक्यं मासान्द्वादश भामिनि।
कालेनानेन नाभ्येषि यदि मां चारुहासिनि ॥
ततस्त्वां प्रातराशार्थं सूदाश्छेत्स्यन्ति लेशशः ॥ २६ ॥

इत्युक्त्वा परुषं वाक्यं रावणः शत्रुरावणः।
राक्षसीश्च ततः क्रुद्ध इदं वचनमब्रवीत् ॥ २७ ॥

शीघ्रमेव हि राक्षस्यो विकृता घोरदर्शनाः।
दर्पमस्या विनेष्यध्वं मांसशोणितभोजनाः ॥ २८ ॥

वचनादेव तास्तस्य सुघोरा राक्षसीगणाः।
कृतप्राञ्जलयो भूत्वा मैथिलीं पर्यवारयन् ॥ २९ ॥

स ताः प्रोवाच राजा तु रावणो घोरदर्शनः।
प्रचाल्य चरणोत्कर्षैर्दारयन्निव मेदिनीम् ॥ ३० ॥

अशोकवनिकामध्ये मैथिली नीयतामियम्।
तत्रेयं रक्ष्यतां गूढं युष्माभिः परिवारिता ॥ ३१ ॥

तत्रैनां तर्जनैर्घोरैः पुनः सान्त्वैश्च मैथिलीम्।
आनयध्वं वशं सर्वाः वन्यां गजवधूमिव ॥ ३२ ॥

इति प्रतिसमादिष्टा राक्षस्यो रावणेन ताः।
अशोकवनिकां जग्मुर्मैथिलीं प्रतिगृह्य तु ॥ ३३ ॥

सर्वकामफलैर्वृक्षैर्नानापुष्पफलैर्वृताम्।
सर्वकालमदैश्चापि द्विजैः समुपसेविताम् ॥ ३४ ॥

सा तु शोकपरीताङ्गी मैथिली जनकात्मजा।
राक्षसीवशमापन्ना व्याघ्रीणां हरिणी यथा ॥ ३५ ॥

शोकेन महता ग्रस्ता मैथिली जनकात्मजा।
न शर्म लभते भीरुः पाशबद्धा मृगी यथा ॥ ३६ ॥

न विन्दते तत्र तु शर्म मैथिली
विरूपनेत्राभिरतीव तर्जिता ।
पतिं स्मरन्ती दयितं सलक्ष्मणं
विचेतनाऽभूद्भयशोकपीडिता ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे षट्पञ्चाशः सर्गः ॥
आदितः श्लोकाः 8631 आरण्यकाण्डे आदितः श्लोकाः 1919

सप्तपञ्चाशः सर्गः

दुर्निमित्तदर्शनम् ॥

राक्षसं मृगरूपेण चरन्तं कामरूपिणम् ।
निहत्य रामो मारीचं तूर्णं पथि निवर्तते ॥ १ ॥

तस्य संत्वरमाणस्य द्रष्टुकामस्य मैथिलीम् ।
क्रूरस्वरोऽथ गोमायुर्विननादास्य पृष्ठतः ॥ २ ॥

स तस्य स्वरमाज्ञाय दारुणं रोमहर्षणम् ।
चिन्तयामास गोमायोः स्वरेण परिशङ्कितः ॥ ३ ॥

अशुभं बत मन्येऽहं गोमायुर्वाश्यते यथा ।
स्वस्ति स्यादथ वैदेह्या राक्षसैर्भक्षणं विना ॥ ४ ॥

मारीचेन तु विज्ञाय स्वरमालक्ष्य मामकम् ।
विक्रुष्टं मृगरूपेण लक्ष्मणः शृणुयाद्यदि ॥ ५ ॥

स सौमित्रिः स्वरं श्रुत्वा तां च हित्वा तु मैथिलीम्।
तयैव प्रहितः क्षिप्रं मत्सकाशमिहैष्यति ॥ ६ ॥

राक्षसैःसहितैर्नूनं सीताया ईप्सितो वधः।
काञ्चनश्च मृगो भूत्वा व्यपनीयाश्रमात्तु माम् ॥ ७ ॥

दूरं नीत्वा तु मारीचो राक्षसोऽभूच्छराहतः।
हा लक्ष्मण हतोऽस्मीति यद्वाक्यं व्याजहार ह ॥ ८ ॥

लक्ष्मणस्तद्वचः श्रुत्वा मत्सकाशमिहैष्यति।
अपि स्वस्ति भवेत्ताभ्यां रहिताभ्यां मया वने ॥
जनस्थाननिमित्तं हि कृतवैरोऽस्मि राक्षसैः ॥ ९ ॥

निमित्तानि च घोराणि दृश्यन्तेऽत्र बहूनि च।
इत्येवं चिन्तयन् रामः श्रुत्वा गोमायुनिस्वनम् ॥ १० ॥

आत्मनश्चापनयनं मृगरूपेण रक्षसा।
आजगाम जनस्थानं राघवः परिशङ्कितः ॥ ११ ॥

तं दीनमनसो दीनमासेदुर्मृगपक्षिणः।
सव्यं कृत्वा महात्मानं घोरांश्च ससृजुः स्वरान् ॥ १२ ॥

तानि दृष्ट्वा निमित्तानि महाघोराणि राघवः।
न्यवर्तताथ त्वरितो जवेनाश्रममात्मनः ॥ १३ ॥

स तु सीतां वरारोहां लक्ष्मणं च महाबलम्।
आजगाम जनस्थानं चिन्तयन्नेव राघवः ॥ १४ ॥

ततो लक्ष्मणमायान्तं ददर्श विगतप्रभम् ॥ १५ ॥

ततोऽविदूरे रामेण समीयाय स लक्ष्मणः ।
विषण्णस्सुविषण्णेन दुःखितो दुःखभागिना ॥ १६ ॥

संजगर्हेऽथ तं भ्राता दृष्ट्वा लक्ष्मणमागतम् ।
विहाय सीतां विजने वने राक्षससेविते ॥ १७ ॥

गृहीत्वा च करं सव्यं लक्ष्मणं रघुनन्दनः ।
उवाच मधुरोदर्कमिदं वचनमार्तवत् ॥ १८ ॥

अहो लक्ष्मण गर्ह्यं ते कृतं यत्त्वं विहाय ताम् ।
सीतामिहागतस्सौम्य कच्चित्स्वस्ति भवेदिह ॥ १९ ॥

न मेऽस्ति संशयो वीर सर्वथा जनकात्मजा ।
विनष्टा भक्षिता वाऽपि राक्षसैर्वनचारिभिः ॥
अशुभान्येव भूयिष्ठं यथा प्रादुर्भवन्ति मे ॥ २० ॥

अपि लक्ष्मण सीतायाः सामग्र्यं प्राप्नुयावहे ।
जीवन्त्याः पुरुषव्याघ्र सुतायाः जनकस्य वै ॥ २१ ॥

यथा वै मृगसङ्घाश्च गोमायुश्चैव भैरवम् ।
वाश्यन्ते शकुनाश्चापि प्रदीप्तामभितो दिशम् ॥ २२ ॥

अपि स्वस्ति भवेत्तस्या राजपुत्र्या महाबल ॥ २३ ॥

इदं हि रक्षो मृगसन्निकाशं
प्रलोभ्य मां दूरमनुप्रयान्तम् ।
हतं कथञ्चिन्महता श्रमेण
स राक्षसोऽभून्म्रियमाण एव ॥ २४ ॥

मनश्च मे दीनमिहाप्रहृष्टं
चक्षुश्च सव्यं कुरुते विकारम् ।
असंशयं लक्ष्मण नास्ति सीता
हृता मृता वा पथि वर्तते वा ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे सप्तपञ्चाशः सर्गः ॥

आदितः श्लोकाः 8656 आरण्यकाण्डे आदितः श्लोकाः 1944



अष्टपञ्चाशः सर्गः

सीतागुणानुवादः ॥

स दृष्ट्वा लक्ष्मणं दीनं शून्ये दशरथात्मजः ।
पर्यपृच्छत धर्मात्मा वैदेहीमागतं विना ॥ १ ॥

प्रस्थितं दण्डकारण्यं या मामनुजगाम ह ।
क्व सा लक्ष्मण वैदेही यां हित्वा त्वमिहागतः ॥ २ ॥

राज्यभ्रष्टस्य दीनस्य दण्डकान्परिधावतः ।
क्व सा दुःखसहाया मे वैदेही तनुमध्यमा ॥ ३ ॥

यां विना नोत्सहे वीर मुहूर्तमपि जीवितुम् ।
क्व सा प्राणसहाया मे सीता सुरसुतोपमा ॥ ४ ॥

पतित्वममराणां वा पृथिव्याश्चापि लक्ष्मण ।
तां विना तपनीयाभां नेच्छेयं जनकात्मजाम् ॥ ५ ॥

कच्चिज्जीवति वैदेही प्राणैःप्रियतरा मम ।
कच्चित्पत्राजनं सौम्य न मे मिथ्या भविष्यति ॥ ६ ॥

सीतानिमित्तं सौमित्रे मृते मयि गते त्वयि ।
कच्चित् सकामा सुखिता कैकेयी सा भविष्यति ॥ ७ ॥

तां पुत्रराज्य सिद्धार्थां मृतपुत्रा तपस्विनी ।
उपस्थास्यति कौसल्या कच्चित्सौम्य न केकयीम् ॥

यदि जीवति वैदेही गमिष्याम्याश्रमं पुनः ।
सुवृत्ता यदि वृत्ता सा प्राणांस्त्यक्ष्यामि लक्ष्मण ॥

यदि मामाश्रमगतं वैदेही नाऽभिभाषते ।
पुनः प्रहसिता सीता विनशिष्यामि लक्ष्मण ॥ १० ॥

ब्रूहि लक्ष्मण वैदेही यदि जीवति वा न वा ।
त्वयि प्रमत्ते रक्षोभिर्भक्षिता वा तपस्विनी ॥ ११ ॥

सुकुमारी च बाला च नित्यं चादुःखदर्शिनी ।
मद्वियोगेन वैदेही व्यक्तं शोचति दुर्मनाः ॥ १२ ॥

सर्वथा रक्षसा तेन जिह्मेन सुदुरात्मना ।
वदतालक्ष्मणेत्युच्चैस्तवापि जनितं भयम् ॥ १३ ॥

श्रुतश्च शङ्के वैदेह्या सः स्वरः सदृशो मम ।
त्रस्तया प्रेषितस्त्वं च द्रष्टुं मां शीघ्रमागतः ॥ १४ ॥

सर्वथा तु कृतं कृष्टं सीतामुत्सृजता वने ।
प्रतिकर्तुं नृशंसानां रक्षसां दत्तमन्तरम् ॥ १५ ॥

दुःखिताः खरघातेन राक्षसाः पिशिताशनाः ।
तैः सीता निहता घोरैर्भविष्यति न संशयः ॥ १६ ॥

अहोऽस्मि व्यसने मग्नस्सर्वथा शत्रुसूदन ।
किं न्विदानीं करिष्यामि शङ्के प्राप्तव्यमीदृशम् ॥ १७ ॥

इति सीतां वरारोहां चिन्तयन्नेव राघवः ।
आजगाम जनस्थानं त्वरया सहलक्ष्मणः ॥ १८ ॥

विगर्हमाणोऽनुजमार्तरूपं
क्षुधा श्रमाच्चैव पिपासया च ।
विनिःश्वसन् शुष्कमुखो विवर्णः
प्रतिश्रयं प्राप्य समीक्ष्य शून्यम् ॥ १९ ॥

स्वमाश्रमं संप्रविगाह्य वीरो
विहारदेशाननुसृत्य कांश्चित् ।
एतत्तदित्येव निवासभूमौ
प्रहृष्टरोमा व्यथितो बभूव ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे अष्टपञ्चाशः सर्गः ॥

आदितः श्लोकाः 8676 आरण्यकाण्डे आदितः श्लोकाः 1964

एकोनषष्टितमः सर्गः

लक्ष्मणागमननिन्दा ॥

अथाऽऽश्रमादुपावृत्तमन्तरा रघुनन्दनः ।
परिपप्रच्छ सौमित्रिं रामो दुःखार्दितं पुनः ॥ १ ॥

तमुवाच किमर्थं त्वमागतोऽपास्य मैथिलीम् ।
यदा सा तव विश्वासाद्वने विरहिता मया ॥ २ ॥

दृष्ट्वैवाभ्यागतं त्वां मे मैथिलीं त्यज्य लक्ष्मण ।
शङ्कमानं महत्पापं यत्सत्यं व्यथितं मनः ॥ ३ ॥

स्फुरते नयनं सव्यं बाहुश्च हृदयं च मे ।
दृष्ट्वा लक्ष्मण दूरे त्वां सीताविरहितं पथि ॥ ४ ॥

एवमुक्तस्तु सौमित्रिर्लक्ष्मणश्शुभलक्षणः ।
भूयो दुःखसमाविष्टो दुःखितं राममब्रवीत् ॥ ५ ॥

न स्वयं कामकारेण तां त्यक्त्वाऽहमिहागतः ।
प्रचोदितस्तयैवोग्रैस्त्वत्सकाशमिहागतः ॥ ६ ॥

आर्येणेव पराक्रुष्टं हा सीते लक्ष्मणेति च ।
परित्राहीति यद्वाक्यं मैथिल्यास्तच्छ्रुतं गतम् ॥ ७ ॥

सा तमार्तस्वरं श्रुत्वा तव स्नेहेन मैथिली ।
गच्छ गच्छेति मामाह रुदन्ती भयविक्लबा ॥ ८ ॥

प्रचोद्यमानेन मया गच्छेति बहुशस्तया ।
प्रत्युक्ता मैथिली वाक्यमिदं त्वत्प्रत्ययान्वितम् ॥ ९ ॥

न तत् पश्याम्यहं रक्षो यदस्य भयमानयेत् ।
निर्वृता भव नास्त्येतत्केनाप्येवमुदाहृतम् ॥ १० ॥

विगर्हितं च नीचं च कथमार्योऽभिधास्यति ।
त्राहिति वचनं सीते यस्त्रायेत्त्रिदशानपि ॥ ११ ॥

किं निमित्तं तु केनापि भ्रातुरालम्ब्य मे स्वरम् ।
राक्षसेनेरितं वाक्यं लक्ष्मण त्राहि मामिति ॥ १२ ॥

न भवत्या व्यथा कार्या कुनारीजनसेविता ॥ १३ ॥

अलं वैक्लब्यमालम्ब्य स्वस्था भव निरुत्सुका ।
न सोऽस्ति त्रिषु लोकेषु पुमान् वै राघवं रणे ॥
जातो वा जायमानो वा संयुगे यः पराजयेत् ॥ १४ ॥

न जय्यो राघवो युद्धे देवैश्शक्रपुरोगमैः ॥ १५ ॥

एवमुक्ता तु वैदेही परिमोहितचेतना ।
उवाचाश्रूणि मुञ्चन्ती दारुणं मामिदं वचः ॥ १६ ॥

भावो मयि तवात्यर्थं पापभावो निवेशितः ।
विनष्टे भ्रातरि प्राप्तुं न च त्वं मामवाप्स्यसि ॥ १७ ॥

सङ्केताद्धरतेन त्वं रामं समनुगच्छसि ।
क्रोशन्तं हि यथात्यर्थं नैनमभ्यवपद्यसे ॥ १८ ॥

रिपुः प्रच्छन्नचारी त्वं मदर्थमनुगच्छसि ।
राघवस्यान्तरप्रेप्सुस्तथैनं नाभिपद्यसे ॥ १९ ॥

एवमुक्तोहि वैदेह्या संरब्धो रक्तलोचनः ।
क्रोधात् प्रस्फुरमाणोष्ठ आश्रमादभिनिर्गतः ॥ २० ॥

एवं ब्रुवाणं सौमित्रिं रामः सन्तापमोहितः ।
अब्रवीदुष्कृतं सौम्य तां विना यत्त्वमागतः ॥ २१ ॥

जानन्नपि समर्थं मां रक्षसां विनिवारणे ।
अनेन क्रोधवाक्येन मैथिल्या निःसृतो भवान् ॥ २२ ॥

न हि ते परितुष्यामि त्यक्त्वा यद्यासि मैथिलीम् ।
क्रुद्धायाः परुषं श्रुत्वा स्त्रियाश्च त्वमिहागतः ॥ २३ ॥

सर्वथा त्वपनीतं ते सीतया यत्प्रचोदितः ।
क्रोधस्य वशमापन्नो नाकरोः शासनं मम ॥ २४ ॥

असौ हि राक्षसः शेते शरेणाभिहतो मया ।
मृगरूपेण येनाहमाश्रमादपवाहितः ॥ २५ ॥

विकृष्य चापं प्रणिधाय सायकं
सलीलबाणेन च ताडितो मया ।
मार्गीं तनुं त्यज्य सविक्लबस्वरो
बभूव केयूरधरः स राक्षसः ॥ २६ ॥

शराहतेनैव तदाऽऽर्तया गिरा स्वरं
ममालम्ब्य सुदूरसंश्रवम् ।
उदाहृतं तद्वचनं सुदारुणं त्वमागतो
येन विहाय मैथिलीम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकोनषष्टितमः सर्गः ॥

आदितः श्लोकाः 8703 आरण्यकाण्डे आदितः श्लोकाः 1991



षष्टितमः सर्गः

श्रीरामलक्ष्मणयोः पर्णशालागमनम् ॥

भृशमाव्रजमानस्य तस्याधोवामलोचनम् ।
प्रास्फुरच्चास्खलद्रामो वेपथुश्चाप्यजायत ॥ १ ॥

उपालक्ष्य निमित्तानि सोऽशुभानि मुहुर्मुहुः ।
अपि क्षेमं तु सीताया इति वै व्याजहार च ॥ २ ॥

त्वरमाणो जगामाथ सीतादर्शनलालसः ।
शून्यमावसथं दृष्ट्वा बभूवोद्विग्नमानसः ॥ ३ ॥

उद्भ्रमन्निव वेगेन विक्षिपन्रघुनन्दनः ।
तत्र तत्रोटजस्थानमभिवीक्ष्य समन्ततः ॥ ४ ॥

ददर्श पर्णशालां च सीतया रहितां तदा ।
श्रिया विरहितां ध्वस्तां हेमन्ते पद्मिनीमिव ॥ ५ ॥

रुदन्तमिव वृक्षैश्च म्लानपुष्पमृगद्विजम् ।
श्रिया विहीनं विध्वस्तं संत्यक्तवनदेवतम् ॥ ६ ॥

विप्रकीर्णाजिनकुशं विप्रविद्धबृसीकटम् ।
दृष्ट्वा शून्यं निजस्थानं विललाप सुदुःखितः ॥ ७ ॥

हृता मृता वा नष्टा वा भक्षिता वा भविष्यति ।
निलीनाऽप्यथ वा भीरुरथवा वनमाश्रिता ॥ ८ ॥

गता विचेतुं पुष्पाणि फलान्यपि हि वा पुनः ।
अथवा पद्मिनीं याता जलार्थं वा नदीं गता ॥ ९ ॥

यत्नान्मृगयमाणस्तु नाससाद वने प्रियाम् ।
शोकरक्तेक्षणः शोकादुन्मत्त इव लक्ष्यते ॥ १० ॥

वृक्षाद्वृक्षं प्रधावन् स गिरेश्चाद्रिं नदान्नदीम् ।
बभूव विलपन् रामः शोकार्णवपरिप्लुतः ॥ ११ ॥

अपि कच्चित्त्वया दृष्टा सा कदम्बप्रिया मम ।
कदम्ब यदि जानीषे शंस सीतां शुभाननाम् ॥ १२ ॥

स्निग्धपल्लवसङ्काशा पीतकौशेयवासिनी ।
शंसस्व यदि वा दृष्टा बिल्व बिल्वोपमस्तनी ॥ १३ ॥

अथवाऽर्जुन शंस त्वं प्रियां तामर्जुनप्रियाम् ।
जनकस्य सुता भीरुर्यदि जीवति वा न वा ॥ १४ ॥

ककुभः ककुभोरूं तां व्यक्तं जानाति मैथिलीम् ।
यथा पल्लवपुष्पाढ्यो भाति ह्येष वनस्पतिः ॥ १५ ॥

भ्रमरैरुपगीतश्च यथा द्रुमवरो ह्ययम् ।
एष व्यक्तं विजानाति तिलकस्तिलकप्रियाम् ॥ १६ ॥

अशोक शोकापनुद शोकोपहतचेतसम् ।
त्वन्नामानं कुरु क्षिप्रं प्रियासंदर्शनाद्धि माम् ॥ १७ ॥

यदि ताल त्वया दृष्टा पक्वतालफलस्तनी ।
कथयस्व वरारोहां कारुण्यं यदि ते मयि ॥ १८ ॥

यदि दृष्टा त्वया सीता जम्बु जाम्बूनदप्रभा ।
प्रियां यदि विजानीषे निःशङ्कं कथयस्व मे ॥ १९ ॥

अहो त्वं कर्णिकाराद्य सुपुष्पैः शोभसे भृशम् ।
कर्णिकारप्रिया साध्वी शंस दृष्टा प्रिया यदि ॥ २० ॥

चूतनीपमहासालान् पनसान् कुरवांस्तथा ।
दाडिमानपि तान् गत्वा दृष्ट्वा रामो महायशाः ॥ २१ ॥

मल्लिकामाधवीश्चैव चम्पकान् केतकीस्तथा ।
पृच्छन्रामो वने भ्रान्त उन्मत्त इव लक्ष्यते ॥ २२ ॥

अथ वा मृगशाबाक्षीं मृग जानासि मैथिलीम् ।
मृगविप्रेक्षणी कान्ता मृगीभिः सहिता भवेत् ॥ २३ ॥

गज सा गजनासोरूर्यदि दृष्टा त्वया भवेत् ।
तां मन्ये विदितां तुभ्यमाख्याहि वरवारण ॥ २४ ॥

शार्दूल यदि सा दृष्टा प्रिया चन्द्रनिभानना ।
मैथिली मम विस्रब्धः कथयस्व न ते भयम् ॥ २५ ॥

किं धावसि प्रिये नूनं दृष्टाऽसि कमलेक्षणे ।
वृक्षैराच्छाद्य चात्मानं किं मां न प्रतिभाषसे ॥ २६ ॥

तिष्ठ तिष्ठ वरारोहे न तेऽस्ति करुणा मयि ।
नात्यर्थं हास्यशीलाऽसि किमर्थं मामुपेक्षसे ॥ २७ ॥

पीतकौशेयकेनासि सूचिता वरवर्णिनि ।
धावन्त्यपि मया दृष्टा तिष्ठ यद्यस्ति सौहृदम् ॥ २८ ॥

नैव सा नूनमथवा हिंसिता चारुहासिनी ।
कृच्छ्रं प्राप्तं न मां नूनं यथोपेक्षितुमर्हति ॥ २९ ॥

व्यक्तं सा भक्षिता बाला राक्षसैः पिशिताशनैः ।
विभज्याङ्गानि सर्वाणि मया विरहिता प्रिया ॥ ३० ॥

नूनं तच्छुभदन्तोष्ठं सुनासं शुभकुण्डलम् ।
पूर्णचन्द्रमिव ग्रस्तं मुखं निष्प्रभतां गतम् ॥ ३१ ॥

भक्षितं भयशीलाक्षं सास्रपाताविलेक्षणम् ।
सा हि चम्पकवर्णाभा ग्रीवा ग्रैवेयशोभिता
कोमला विलपन्त्यास्तु कान्ताया भक्षिता शुभा ॥ ३२ ॥

नूनं विक्षिप्यमाणौ तौ बाहू पल्लवकोमलौ ।
भक्षितौ वेपमानाग्रौ सहस्ताभरणाङ्गदौ ॥ ३३ ॥

मया विरहिता बाला रक्षसां भक्षणाय वै ॥ ३४ ॥

सा वनेऽस्मिन् परित्यक्ता भक्षिता बहुबान्धवा ॥ ३५ ॥

हा लक्ष्मण महाबाहो पश्यसि त्वं प्रियां क्वचित् ॥ ३६ ॥

हा प्रिये क्व गता भद्रे हा सीतेति पुनः पुनः ॥ ३७ ॥

इत्येवं विलपन् रामः पर्यधावद्वनाद्वनम् ।
क्वचिदुद्भ्रमते वेगात् क्वचिद्विभ्रमते बलात्
क्वचिन्मत्त इवाभाति कान्तान्वेषणतत्परः ॥ ३८ ॥

स वनानि नदीः शैलान् गिरिप्रस्रवणानि च ।
काननानि स्म वेगेन भ्रमत्यपरिसंस्थितः ॥ ३९ ॥

तथा स गत्वा विपुलं महद्वनं
परीत्य सर्वं त्वथ मैथिलीं प्रति ।
अनिष्ठिताशः स चकार मार्गणे
पुनः प्रियायाः परमं परिश्रमम् ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे षष्टितमः सर्गः ॥

आदितः श्लोकाः 8743 आरण्यकाण्डे आदितः श्लोकाः 2031

एकषष्टितमः सर्गः
सीतान्वेषणम् ॥

दृष्ट्वाश्रमपदं शून्यं रामो दशरथात्मजः ।
रहितां पर्णशालां च प्रविद्धान्यासनानि च ॥ १ ॥

अदृष्ट्वा तत्र वैदेहीं संनिरीक्ष्य च सर्वशः ।
उवाच रामः प्राक्रुश्य प्रगृह्य रुचिरौ भुजौ ॥ २ ॥

क्व नु लक्ष्मण वैदेही कं वा देशमितो गता ।
केनाहृता वा सौमित्रे केन वा भक्षिता प्रिया ॥ ३ ॥

दृक्षेणावार्य यदि मां सीते हसितुमिच्छसि ।
अलं ते हसितेनाद्य मां भजस्व सुदुःखितम् ॥ ४ ॥

यैः सह क्रीडसे सीते विश्वस्तैर्मृगपोतकैः ।
एते हीनास्त्वया सीते ध्यायन्त्यास्राविलेक्षणाः ॥ ५ ॥

सीतया रहितोऽहं वै न हि जीवामि लक्ष्मण ॥ ६ ॥

मृतं शोकेन महता सीताहरणजेन माम् ।
परलोके महाराजो नूनं द्रक्ष्यति मे पिता ॥ ७ ॥

कथं प्रतिज्ञां संश्रुत्य मया त्वमभियोजितः ।
अपूरयित्वा तं कालं मत्सकाशमिहागतः ॥ ८ ॥

कामवृत्तमनार्यं मां मृषावादिनमेव च ।
धिक्त्वामिति परे लोके व्यक्तं वक्ष्यति मे पिता ॥ ९ ॥

विवशं शोकसन्तप्तं दीनं भग्नमनोरथम् ।
मामिहोत्सृज्य करुणं कीर्तिर्नरमिवानृजुम् ॥ १० ॥

क्व गच्छसि वरारोहे मां नोत्सृज सुमध्यमे ।
त्वया विरहितश्चाहं मोक्ष्ये जीवितमात्मनः ॥ ११ ॥

इतीव विलपन् रामः सीतादर्शनलालसः ।
न ददर्श सुदुःखार्तो राघवो जनकात्मजाम् ॥ १२ ॥

अनासादयमानं तं सीतां दशरथात्मजम् ।
पङ्कमासाद्य विपुलं सीदन्तमिव कुञ्जरम् ॥
लक्ष्मणो राममत्यर्थमुवाच हितकाम्यया ॥ १३ ॥

मा विषीद महाबाहो कुरु यत्नं मया सह ।
इदं च हि वनं शूर बहुकन्दरशोभितम् ॥ १४ ॥

प्रियकाननसञ्चारा वनोन्मत्ता च मैथिली।
सा वनं वा प्रविष्टा स्यान्नलिनीं वा सुपुष्पिताम् ॥ १५ ॥

सरितं वापि संप्राप्ता मीनवञ्जुलसेविताम्।
स्नातुकामा निलीना स्याद्वासकामा वने क्वचित्॥ १६ ॥

जिज्ञासमाना वैदेही त्वं मां च पुरुषर्षभ।
तस्या ह्यन्वेषणे श्रीमन् क्षिप्रमेव यतावहै ॥ १७॥

वनं सर्वं विचिनुवो यत्र सा जनकात्मजा।
मन्यसे यदि काकुत्स्थ मा स्म शोके मनः कृथाः ॥ १८ ॥

एवमुक्तस्तु सौहार्दाल्लक्ष्मणेन समाहितः।
सह सौमित्रिणा रामो विचेतुमुपचक्रमे ॥ १९ ॥

तौ वनानि गिरींश्चैव सरितश्च सरांसि च।
निखिलेन विचिन्वन्तौ सीतां दशरथात्मजौ ॥ २० ॥

तस्य शैलस्य सानूनि गुहाश्च शिखराणि च।
निखिलेन विचिन्वन्तौ नैव तामभिजग्मतुः ॥ २१ ॥

विचित्य सर्वतः शैलं रामो लक्ष्मणमब्रवीत्।
नेह पश्यामि सौमित्रे वैदेहीं पर्वते शुभाम् ॥ २२ ॥

ततो दुःखाभिसन्तप्तो लक्ष्मणो वाक्यमब्रवीत्।
विचरन् दण्डकारण्यं भ्रातरं दीप्ततेजसम् ॥ २३ ॥

प्राप्स्यसि त्वं महाप्राज्ञ मैथिलीं जनकात्मजाम् ।
यथा विष्णुर्महाबाहुर्बलिं बद्ध्वा महीमिमाम् ॥ २४ ॥

एवमुक्तस्तु वीरेण लक्ष्मणेन स राघवः ।
उवाच दीनया वाचा दुःखाभिहतचेतनः ॥ २५ ॥

वनं सर्वं सुविचितं पक्षिन्यः फुल्लपङ्कजाः ।
गिरिश्चायं महाप्राज्ञ बहुकन्दरनिर्झरः ॥ २६ ॥

न हि पश्यामि वैदेहीं प्राणेभ्योऽपि गरीयसीम् ॥ २७ ॥

एवं स विलपन् रामः सीताहरणकर्शितः ।
दीनः शोकसमाविष्टो मुहूर्तं विह्वलोऽभवत् ॥ २८ ॥

स विह्वलितसर्वाङ्गो गतबुद्धिर्विचेतनः ।
निषसादातुरो दीनो निःश्वस्याशीतमायतम् ॥ २९ ॥

बहुशः स तु निःश्वस्य रामो राजीवलोचनः ।
हा प्रियेति विचुक्रोश बहुशो बाष्पगद्गदः ॥ ३० ॥

तं ततः सान्त्वयामास लक्ष्मणः प्रियबान्धवः ।
बहुप्रकारं धर्मज्ञः प्रश्रितं प्रश्रिताञ्जलिः ॥ ३१ ॥

अनादृत्य तु तद्वाक्यं लक्ष्मणोष्ठपुटाच्च्युतम् ।
अपश्यंस्तां प्रियां सीतां प्राक्रोशत्स पुनः पुनः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकषष्टितमः सर्गः ॥

द्विषष्टितमः सर्गः

श्रीरामविलापः ॥

सीतामपश्यन् धर्मात्मा कामोपहतचेतनः।
विललाप महाबाहू रामः कमललोचनः ॥ १ ॥

पश्यन्निव स तां सीतामपश्यन्मदनार्दितः।
उवाच राघवो वाक्यं विलापाश्रयदुर्वचम् ॥ २ ॥

त्वमशोकस्य शाखाभिः पुष्पप्रियतया प्रिये।
आवृणोषि शरीरं ते मम शोकविवर्धनी ॥ ३ ॥

कदलीकाण्डसदृशौ कदल्या संवृतावुभौ।
ऊरू पश्यामि ते देवि नासि शक्ता निगूहितुम् ॥ ४ ॥

कर्णिकारवनं भद्रे हसन्ती देवि सेवसे।
अलं ते परिहासेन मम बाधावहेन वै ॥ ५ ॥

परिहासेन किं सीते परिश्रान्तस्य मे प्रिये।
अयं स परिहासोऽपि साधु देवि न रोचते ॥ ६ ॥

विशेषेणाश्रमस्थाने हासोऽयं न प्रशस्यते।
अवगच्छामि ते शीलं परिहासप्रियं प्रिये ॥ ७ ॥

आगच्छ त्वं विशालाक्षि शून्योऽयमुटजस्तव ॥ ८ ॥

सुव्यक्तं राक्षसैः सीता भक्षिता वा हृताऽपि वा।
न हि सा विलपन्तं मामुपसम्प्रैति लक्ष्मण ॥ ९ ॥

एतानि मृगयूथानि साश्रुनेत्राणि लक्ष्मण ।
शंसन्तीव हि वैदेहीं भक्षितां रजनीचरैः ॥ १० ॥

हा ममार्ये क्व यातासि हा साध्वि वरवर्णिनि ।
हा सकामा त्वया देवी कैकेयी सा भविष्यति ॥ ११ ॥

सीतया सह निर्यातो विना सीतामुपागतः ।
कथं नाम प्रवेक्ष्यामि शून्यमन्तःपुरं पुनः ॥ १२ ॥

निर्वीर्य इति लोकोऽयं निर्दयश्चेति वक्ष्यति ।
कातरत्वं प्रकाशं हि सीतापनयनेन मे ॥ १३ ॥

निवृत्तवनवासश्च जनकं मिथिलाधिपम् ।
कुशलं परिपृच्छन्तं कथं शक्ष्ये निरीक्षितुम् ॥ १४ ॥

विदेहराजो नूनं मां दृष्ट्वा विरहितं तया ।
दुहितृस्नेहसन्तप्तो मोहस्य वशमेष्यति ॥ १५ ॥

अथ वा न गमिष्यामि पुरीं भरतपालिताम् ।
स्वर्गोऽपि सीतया हीनः शून्य एव मतो मम ॥ १६ ॥

मामिहोत्सृज्य हि वने गच्छायोध्यां पुरीं शुभाम् ।
न त्वहं तां विना सीतां जीवेयं हि कथञ्चन ॥ १७ ॥

गाढमाश्लिष्य भरतो वाच्यो मद्वचनात्त्वया ।
अनुज्ञातोऽसि रामेण पालयेति वसुन्धराम् ॥ १८ ॥

अम्बा च मम कैकेयी सुमित्रा च त्वया विभो।
कौसल्या च यथान्यायमभिवाद्या ममाज्ञया ॥
रक्षणीया प्रयत्नेन भवता युक्तकारिणा ॥ १९ ॥

सीतायाश्च विनाशोऽयं मम चामित्रसूदन।
विस्तरेण जनन्या मे विनिवेद्यस्त्वया भवेत् ॥ २० ॥

इति विलपति राघवे सुदीने
वनमुपगम्य तया विना सुकेश्या।
भयविकलमुखस्तु लक्ष्मणोऽपि
व्यथितमना भृशमातुरो बभूव ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे द्विषष्टितमः सर्गः ॥

आदितः श्लोकाः 8796 आरण्यकाण्डे आदितः श्लोकाः 2084

द्विषष्टितमः सर्गः

लक्ष्मणेन श्रीरामसान्त्वनम् ॥

स राजपुत्रः प्रियया विहीनः
कामेन शोकेन च पीड्यमानः।
विषादयन् भ्रातरमार्तरूपो
भूयो विषादं प्रविवेश तीव्रम् ॥ १ ॥

स लक्ष्मणं शोकवशाभिपन्नं
शोके निमग्नो विपुले तु रामः ।
उवाच वाक्यं व्यसनानुरूप-
मुष्णं विनिःश्वस्य रुदन् सशोकम् ॥ २ ॥

न मद्विधो दुष्कृतकर्मकारी
मन्ये द्वितीयोऽस्ति वसुन्धरायाम् ।
शोकेन शोको हि परम्पराया
मामेति भिन्दन् हृदयं मनश्च ॥ ३ ॥

पूर्वं मया नूनमभीप्सितानि
पापानि कर्माण्यसकृत् कृतानि ।
तत्रायमद्यापतितो विपाको
दुःखेन दुःखं यदहं विशामि ॥ ४ ॥

राज्यप्रणाशः स्वजनैर्वियोगः
पितुर्विनाशो जननीवियोगः ।
सर्वाणि मे लक्ष्मण शोकवेग-
मापूरयन्ति प्रविचिन्तितानि ॥ ५ ॥

सर्वं तु दुःखं मम लक्ष्मणेदं
शान्तं शरीरे वनमेत्य शून्यम् ।
सीतावियोगात्पुनरप्युदीर्ण
काष्ठैरिवाग्निः सहसा प्रदीप्तः ॥ ६ ॥

सा नूनमार्या मम राक्षसेन
ह्यभ्याहृता खं समुपेत्य भीरुः ।
अपस्वरं सस्वरविप्रलापा
भयेन विक्रन्दितवत्यभीक्ष्णम् ॥ ७ ॥

तौ लोहितस्य प्रियदर्शनस्य
सदोचितावुत्तमचन्दनस्य ।
वृत्तौ स्तनौ शोणितपङ्कदिग्धौ
नूनं प्रियाया मम नाभिभातः ॥ ८ ॥

तच्छ्लक्ष्णसुव्यक्तमृदुप्रलापं
तस्या मुखं कुञ्चितकेशभारम् ।
रक्षोवशं नूनमुपागतायाः
न भ्राजते राहुमुखे यथेन्दुः ॥ ९ ॥

तां हारपाशस्य सदोचितायाः
ग्रीवां प्रियाया मम सुव्रतायाः ।
रक्षांसि नूनं परिपीतवन्ति
शून्ये हि भित्त्वा रुधिराशनानि ॥ १० ॥

मया विहीना विजने वने या
रक्षोभिराहृत्य विकृष्यमाणा ।
नूनं विनादं कुररीव दीना
सा मुक्तवत्यायतकान्तनेत्रा ॥ ११ ॥

अस्मिन् मया सार्द्धमुदारशीला
शिलातले पूर्वमुपोपविष्टा ।
कान्तस्मिता लक्ष्मण जातहासा
मामाह सीता बहु वाक्यजातम् ॥ १२ ॥

गोदावरीयं सरितां वरिष्ठा
प्रिया प्रियाया मम नित्यकालम् ।
अप्यत्र गच्छेदिति चिन्तयामि
नैकाकिनी याति हि सा कदाचित् ॥ १३ ॥

पद्मानना पद्मविशालनेत्रा
पद्मानि वाऽऽनेतुमभिप्रयाता ।
तदप्ययुक्तं न हि सा कदाचित्
मया विना गच्छति पङ्कजानि ॥ १४ ॥

कामं त्विदं पुष्पितवृक्षषण्डं
नानाविधैः पक्षिगणैरुपेतम् ।
वनं प्रयाता नु तदप्ययुक्त-
मेकाकिनी साऽतिबिभेति भीरुः ॥ १५ ॥

आदित्य भो लोककृताकृतज्ञ
लोकस्य सत्यानृतकर्मसाक्षिन् ।
मम प्रिया सा क्व गता हृता वा
शंसस्व मे शोकवशस्य सत्यम् ॥ १६ ॥

लोकेषु सर्वेषु च नास्ति किञ्चि-
द्यत्ते न नित्यं विदितं भवेत्तत् ।
शंसस्व वायो कुलशालिनीं तां
हृता मृता वा पथि वर्तते वा ॥ १७ ॥

इतीव तं शोकविधेयदेहं
रामं विसंज्ञं विलपन्तमेवम् ।
उवाच सौमित्रिरदीनसत्त्वो
न्याये स्थितः कालयुतं च वाक्यम् ॥ १८ ॥

शोकं विमुञ्चार्य धृतिं भजस्व
सोत्साहता चास्तु विमार्गणेऽस्याः ।
उत्साहवन्तो हि नरा न लोके
सीदन्ति कर्मस्वतिदुष्करेषु ॥ १९ ॥

इतीव सौमित्रिमुदग्रपौरुषं
ब्रुवन्तमार्तो रघुवंशवर्द्धनः ।
न चिन्तयामास धृतिं विमुक्तवान्
पुनश्च दुःखं महदभ्युपागमत् ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे त्रिषष्टितमः सर्गः ॥

आदितः श्लोकाः 8816 आरण्यकाण्डे आदितः श्लोकाः 2140

इत्यार्षे श्रीमद्रामायणे द्वादशेऽह्नि वर्तमानकथाप्रसङ्गः



चतुःषष्टितमः सर्गः

रामक्रोधः ॥

स दीनो दीनया वाचा लक्ष्मणं वाक्यमब्रवीत् ॥ १ ॥

शीघ्रं लक्ष्मण जानीहि गत्वा गोदावरीं नदीम् ।
अपि गोदावरीं सीता पद्मान्यानयितुं गता ॥ २ ॥

एवमुक्तस्तु रामेण लक्ष्मणः पुनरेव हि ।
नदीं गोदावरीं रम्यां जगाम लघुविक्रमः ॥ ३ ॥

तां लक्ष्मणस्तीर्थवतीं विचित्वा राममब्रवीत् ॥ ४ ॥

नैनां पश्यामि तीर्थेषु क्रोशतो न शृणोति मे ।
कं नु सा देशमापन्ना वैदेही क्लेशनाशिनी ॥
न ह्यहं वेद तं देशं यत्र सा जनकात्मजा ॥ ५ ॥

लक्ष्मणस्य वचः श्रुत्वा दीनः सन्तापमोहितः ।
रामः समभिचक्राम स्वयं गोदावरीं नदीम् ॥ ६ ॥

स तामुपस्थितो रामः क्व सीतेत्येवमब्रवीत् ॥ ७ ॥

भूतानि राक्षसेन्द्रेण वधार्हेण हृतामपि ।
न तां शशंसू रामाय तथा गोदावरी नदी ॥ ८ ॥

ततः प्रचोदिता भूतैः शंसास्मै तां प्रियामिति ।
न तु साभ्यवदत्सीतां पृष्टा रामेण शोचता ॥ ९ ॥

रावणस्य च तद्रूपं कर्माणि च दुरात्मनः ।
ध्यात्वा भयात्तु वैदेहीं सा नदी न शशंस ताम् ॥ १० ॥

निराशस्तु तया नद्या सीताया दर्शने कृतः ।
उवाच रामस्सौमित्रिं सीताऽदर्शनकर्शितः ॥ ११ ॥

एषा गोदावरी सौम्य किञ्चिन्न प्रतिभाषते ।
किं नु लक्ष्मण वक्ष्यामि समेत्य जनकं वचः ॥
मातरं चैव वैदेह्या विना तामहमप्रियम् ॥ १२ ॥

या मे राज्यविहीनस्य वने वन्येन जीवतः ।
सर्वं व्यपनयेच्छोकं वैदेही क्व नु सा गता ॥ १३ ॥

ज्ञातिपक्षविहीनस्य राजपुत्रीमपश्यतः ।
मन्ये दीर्घा भविष्यन्ति रात्रयो मम जाग्रतः ॥ १४ ॥

मन्दाकिनीं जनस्थानमिमं प्रस्रवणं गिरिम् ।
सर्वाण्यनुचरिष्यामि यदि सीता हि दृश्यते ॥ १५ ॥

एते मृगा महावीर्या मामीक्षन्ते मुहुर्मुहुः ।
वक्तुकामा इव हि मे इङ्गितान्युपलक्षये ॥ १६ ॥

तांस्तु दृष्ट्वा नरव्याघ्रो राघवः प्रत्युवाच ह ।
क्व सीतेति निरीक्षन् वै बाष्पसंरुद्धया दृशा ॥ १७ ॥

एवमुक्ता नरेन्द्रेण ते मृगास्सहसोत्थिताः ।
दक्षिणाभिमुखास्सर्वे दर्शयन्तो नभःस्थलम् ॥ १८ ॥

मैथिली ह्रियमाणा सा दिशं यामन्वपद्यत ।
तेन मार्गेण धावन्तो निरीक्षन्ते नराधिपम् ॥ १९ ॥

येन मार्गं च भूमिं च निरीक्षन्ते स्म ते मृगाः ।
पुनश्च मार्गमिच्छन्ति लक्ष्मणेनोपलक्षिताः ॥ २० ॥

तेषां वचनसर्वस्वं लक्षयामास चेङ्गितम् ।
उवाच लक्ष्मणो ज्येष्ठं धीमान् भ्रातरमार्तवत् ॥ २१ ॥

क्व सीतेति त्वया पृष्टा यथेमे सहसोत्थिताः ।
दर्शयन्ति क्षितिं चैव दक्षिणां च दिशं मृगाः ॥ २२ ॥

साधु गच्छावहै देव दिशमेतां हि नैर्ऋतिम् ।
यदि स्यादागमः कश्चिदार्या वा साऽथ लक्ष्यते ॥ २३ ॥

बाढमित्येव काकुत्स्थः प्रस्थितो दक्षिणां दिशम् ।
लक्ष्मणानुगतः श्रीमान् वीक्षमाणो वसुन्धराम् ॥ २४ ॥

एवं सम्भाषमाणौ तावन्योन्यं भ्रातरावुभौ ।
वसुन्धरायां पतितं पुष्पमार्गमपश्यताम् ॥ २५ ॥

तां पुष्पवृष्टिं पतितां दृष्ट्वा रामो महीतले ।
उवाच लक्ष्मणं वीरो दुःखितो दुःखितं वचः ॥ २६ ॥

अभिजानामि पुष्पाणि तानीमानीह लक्ष्मण ।
अपिनद्धानि वैदेह्या मया दत्तानि कानने ॥ २७ ॥

मन्ये सूर्यश्च वायुश्च मेदिनी च यशस्विनी ।
अभिरक्षन्ति पुष्पाणि प्रकुर्वाणा मम प्रियम् ॥ २८ ॥

एवमुक्त्वा महाबाहुर्लक्ष्मणं पुरुषर्षभम् ।
उवाच रामो धर्मात्मा गिरिं प्रस्रवणाकुलम् ॥ २९ ॥

कच्चित् क्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वने ह्यस्मिन् मया विरहिता त्वया ॥ ३० ॥

क्रुद्धोऽब्रवीद्गिरिं तत्र सिंहः क्षुद्रमृगं यथा ॥ ३१ ॥

तां हेमवर्णां हेमाभां सीतां दर्शय पर्वत ।
यावत्सर्वाणि सानूनि न ते विध्वंसयाम्यहम् ॥ ३२ ॥

एवमुक्तस्तु रामेण पर्वतो मैथिलीं प्रति ।
शंसन्निव ततस्सीतां नादर्शयत राघवे ॥ ॥ ३३ ॥

ततो दाशरथी राम उवाच च शिलोच्चयम् ॥ ३४ ॥

मम बाणाग्निनिर्दग्धो भस्मीभूतो भविष्यसि ।
असेव्यः सन्ततं चैव निस्तृणद्रुमपल्लवः ॥ ३५ ॥

इमां वा सरितं चाद्य शोषयिष्यामि लक्ष्मण ।
यदि नाख्याति मे सीतामद्य चन्द्रनिभाननाम् ॥ ३६ ॥

एवं स रुषितो रामो दिधक्षन्निव चक्षुषा ।
ददर्श भूमौ निष्क्रान्तं राक्षसस्य पदं महत् ॥ ३७ ॥

त्रस्ताया रामकाङ्क्षिण्याः प्रधावन्त्या इतस्ततः ।
राक्षसेनाभितप्ताया मैथिल्याश्च पदान्यथ ॥ ३७ ॥

स समीक्ष्य परिक्रान्तं सीताया राक्षसस्य च ।
भग्नं धनुश्च तूणी च विकीर्णं बहुधा रथम् ॥ ३८ ॥

सम्भ्रान्तहृदयो रामः शशंस भ्रातरं प्रति ॥ ३९ ॥

पश्य लक्ष्मण वैदेह्याश्शीर्णाः कनकबिन्दवः ।
भूषणानां हि सौमित्रे माल्यानि विविधानि च ॥ ४० ॥

तप्तबिन्दुनिकाशैश्च चित्रैः क्षतजबिन्दुभिः ।
आवृतं पश्य सौमित्रे सर्वतो धरणीतलम् ॥ ४१ ॥

मन्ये लक्ष्मण वैदेही राक्षसैः कामरूपिभिः ।
भित्त्वा भित्त्वा विभक्ता वा भक्षिता वा भविष्यति ॥४२॥

तस्या निमित्तं वैदेह्याद्वयोर्विवदमानयोः ।
बभूव युद्धं सौमित्रे घोरं राक्षसयोरिह ॥ ४३ ॥

मुक्तामणिचितं चेदं तपनीयविभूषितम् ।
धरण्यां पतितं सौम्य कस्य भग्नं महद्धनुः ॥ ४४ ॥

तरुणादित्यसङ्काशं वैडूर्यगुलिकाचितम् ।
विशीर्णं पतितं भूमौ कवचं कस्य काञ्चनम् ॥ ४५ ॥

छत्रं शतशलाकं च दिव्यमाल्योपशोभितम् ।
भग्नदण्डमिदं कस्य भूमौ सौम्य निपातितम् ॥ ४६ ॥

काञ्चनोरश्छदाश्चेमे पिशाचवदनाः खराः।
भीमरूपा महाकायाः कस्य वा निहता रणे ॥ ४७ ॥

दीप्तपावकसङ्काशो द्युतिमान् समरध्वजः।
अपविद्धश्च भग्नश्च कस्य सांग्रामिको रथः ॥ ४८ ॥

रथाक्षमात्रा विशिखास्तपनीयविभूषणाः।
कस्येमेऽभिहता बाणाः प्रकीर्णा घोरकर्मणः ॥ ४९ ॥

शरावरौ शरैः पूर्णौ विध्वस्तौ पश्य लक्ष्मण।
प्रतोदाभीषुहस्तो वै कस्यायं सारथिर्हतः ॥ ५० ॥

कस्येमौ पुरुषव्याघ्र शयाते निहतौ युधि।
चामरग्राहिणौ सौम्य सोष्णीषमणिकुण्डलौ ॥ ५१ ॥

पदवी पुरुषस्यैषा व्यक्तं कस्यापि रक्षसः।
वैरं शतगुणं पश्य ममेदं जीवितान्तकम् ॥ ५२ ॥

सा घोरहृदयैः सौम्य राक्षसैः कामरूपिभिः।
हृता मृता वा सीताऽपि भक्षिता वा तपस्विनी ॥ ५३ ॥

न धर्मस्त्रायते सीतां ह्रियमाणां महावने ॥ ५४ ॥

भक्षितायां हि वैदेह्यां हतायामपि लक्ष्मण।
के हि लोकेऽप्रियं कर्तुं शक्ताः सौम्य ममेश्वराः ॥ ५५ ॥

कर्तारमपि लोकानां शूरं करुणवेदिनम्।
अज्ञानादवमन्येरन् सर्वभूतानि लक्ष्मण ॥ ५६ ॥

मृदुं लोकहिते युक्तं दान्तं करुणवेदिनम् ।
निर्वीर्य इति मन्यन्ते नूनं मां त्रिदशेश्वराः ॥ ५७ ॥

मां प्राप्य हि गुणो दोषस्संवृत्तः पश्य लक्ष्मण ।
अद्यैव सर्वभूतानां रक्षसामभवाय च ॥ ५८ ॥

संहृत्यैव शशिज्योत्स्नां महान् सूर्य इवोदितः ।
संहृत्यैव गुणान् सर्वान् मम तेजः प्रकाशते ॥ ५९ ॥

नैव यक्षा न गन्धर्वा न पिशाचा न राक्षसाः ।
किन्नरा वा मनुष्या वा सुखं प्राप्स्यन्ति लक्ष्मण ॥ ६० ॥

ममास्त्रबाणसंपूर्णमाकाशं पश्य लक्ष्मण ।
निःसंपातं करिष्यामि ह्यद्य त्रैलोक्यचारिणाम् ॥ ६१ ॥

संनिरुद्धग्रहगणमावारितनिशाकरम् ।
विप्रनष्टानलमरुद्भास्करद्युतिसंवृतम् ॥ ६२ ॥

विनिर्मथितशैलाग्रं शुष्यमाणजलाशयम् ।
ध्वस्तद्रुमलतागुल्मं विप्रणाशितसागरम् ॥
त्रैलोक्यं तु करिष्यामि संयुक्तं कालकर्मणा ॥ ६३ ॥

न तां कुशलिनीं सीतां प्रदास्यन्ति ममेश्वराः ।
अस्मिन् मुहूर्ते सौमित्रे मम द्रक्ष्यन्ति विक्रमम् ॥ ६४ ॥

नाकाशमुत्पतिष्यन्ति सर्वभूतानि लक्ष्मण ।
मम चापगुणोन्मुक्तैर्बाणजालैर्निरन्तरम् ॥ ६५ ॥

अर्दितं मम नाराचैर्ध्वस्तभ्रान्त मृगद्विजम्।
समाकुलममर्यादं जगत्पश्यार्य लक्ष्मण ॥ ६६ ॥

आकर्णपूर्णैरिषुभिर्जीवलोकं दुरावरैः।
करिष्ये मैथिलीहेतोरपिशाचमराक्षसम् ॥ ६७ ॥

मम रोषप्रयुक्तानां सायकानां बलं सुराः।
द्रक्ष्यन्त्यद्य विमुक्तानामतिदूरातिगामिनाम् ॥ ६८ ॥

नैव देवा न दैतेया न पिशाचा न राक्षसाः।
भविष्यन्ति मम क्रोधात्त्रैलोक्ये विप्रणाशिते ॥ ६९ ॥

देवदानवयक्षाणां लोका ये रक्षसामपि।
बहुधा न भविष्यन्ति बाणौघैश्शकलीकृताः ॥ ७० ॥

निर्मर्यादानिमान् लोकान् करिष्याम्यद्य सायकैः।
हृतां मृतां वा सौमित्रे न दास्यन्ति ममेश्वराः ॥ ७१ ॥

तथारूपां हि वैदेहीं न दास्यन्ति यदि प्रियाम्।
नाशयामि जगत्सर्वं त्रैलोक्यं सचराचरम् ॥ ७२ ॥

इत्युक्त्वा रोषताम्राक्षो रामो निष्पीड्य कार्मुकम्।
शरमादाय संदीप्तं घोरमाशीविषोपमम् ॥ ७३ ॥

संदधे धनुषि श्रीमान् रामः परपुरञ्जयः।
युगान्ताग्निरिव क्रुद्ध इदं वचनमब्रवीत् ॥ ७४ ॥

यथा जरा यथा मृत्युर्यथा कालो यथा विधिः ।
नित्यं न प्रतिहन्यन्ते सर्वभूतेषु लक्ष्मण ॥
तथाऽहं क्रोधसंयुक्तो न निवार्योऽस्मि सर्वथा ॥ ७५ ॥

पुरेव मे चारुदतीमनिन्दितां
दिशन्ति सीतां यदि नाद्य मैथिलीम् ।
सदेवगन्धर्वमनुष्यपन्नगं
जगत् सशैलं परिवर्तयाम्यहम् ॥ ७४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे चतुःषष्टितमः सर्गः ॥

आदितः श्लोकाः 8892 आरण्यकाण्डे आदितः श्लोकाः 2180

पञ्चषष्टितमः सर्गः

क्रोधोपसंहारप्रार्थनम् ॥

तप्यमानं तथा रामं सीताहरणकर्शितम् ।
लोकानामभवे युक्तं संवर्तकमिवानलम् ॥ १ ॥

वीक्षमाणं धनुस्सज्यं निश्वसन्तं मुहुर्मुहुः ।
हन्तुकामं पशुं रुद्रं क्रुद्धं दक्षक्रतौ यथा ॥ २ ॥

दग्धुकामं जगत्सर्वं युगान्ते तु यथा हरम् ॥ ३ ॥

अदृष्टपूर्वं संक्रुद्धं दृष्ट्वा रामं तु लक्ष्मणः ।
अब्रवीत्प्राञ्जलिर्वाक्यं मुखेन परिशुष्यता ॥ ४ ॥

पुरा भूत्वा मृदुर्दान्तः सर्वभूतहिते रतः ।
न क्रोधवशमापन्नः प्रकृतिं हातुमर्हसि ॥ ५ ॥

चन्द्रे लक्ष्मीः प्रभा सूर्ये गतिर्वायौ भुवि क्षमा ।
एतच्च नियतं सर्वं त्वयि चानुत्तमं यशः ॥ ६ ॥

एकस्य नापराधेन लोकान् हन्तुं त्वमर्हसि ।
अन्यद्ददामि राजेन्द्र निदानं सर्वसम्पदाम् ॥ ७ ॥

धर्मे जयति नाधर्मः कदाचिदपि चोभयोः ।
सीता पतिव्रता लक्ष्मीर्न नाशं वै गमिष्यति ॥ ८ ॥

न तु जानामि कस्यायं भग्नस्सांग्रामिको रथः ।
केन वा कस्य वा हेतोस्सायुधस्सपरिच्छदः ॥ ९ ॥

खुरनेमिक्षतश्चायं सिक्तो रुधिरबिन्दुभिः ।
देशो निर्वृत्तसङ्ग्रामस्सुघोरः पार्थिवात्मज ॥ १० ॥

एकस्य तु विमर्दोऽयं न द्वयोर्वदतां वर ।
न हि वृत्तं हि पश्यामि बलस्य महतः पदम् ॥ ११ ॥

नैकस्य तु कृते लोकान् विनाशयितुमर्हसि ।
युक्तदण्डा हि मृदवः प्रशान्ता वसुधाधिपाः ॥ १२ ॥

सदा त्वं सर्वभूतानां शरण्यः परमा गतिः ।
को नु दारप्रणाशं ते साधु मन्येत राघव ॥ १३ ॥

सरितः सागराः शैला देवगन्धर्वदानवाः।
नालं ते विप्रियं कर्तुं दीक्षितस्येव साधवः ॥ १४ ॥

येन राजन् हृता सीता तमन्वेषितुमर्हसि।
मद्द्वितीयो धनुष्पाणिः सहायैः परमर्षिभिः ॥ १५ ॥

समुद्रं च विचेष्यामः पर्वतांश्च वनानि च।
गुहाश्च विविधा घोरा नदीः पद्मवनानि च ॥ १६ ॥

देवगन्धर्वलोकांश्च विचेष्यामः समाहिताः।
यावन्नाधिगमिष्यामस्तव भार्यापहारिणम् ॥ १७ ॥

न चेत्साम्ना प्रदास्यन्ति पत्नीं ते त्रिदशेश्वराः।
कोसलेन्द्र ततः पश्चात्प्राप्तकालं करिष्यसि ॥ १८ ॥

शिवेन साम्ना विनयेन सीतां
नयेन न प्राप्स्यसि चेन्नरेन्द्र ।
ततस्समुत्सादय हेमपुङ्खै-
र्महेन्द्रवज्रप्रतिमैः शरौघैः ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे पञ्चषष्टितमः सर्गः ॥

षट्षष्टितमः सर्गः

श्रीरामाश्वासनम् ॥

तं तथा शोकसन्तप्तं विलपन्तमनाथवत् ।
मोहेन महताऽऽविष्टं परिद्यूनमचेतनम् ॥ १ ॥

ततः सौमित्रिराश्वास्य मुहूर्तादिव लक्ष्मणः ।
रामं संबोधयामास चरणौ चाभिपीडयन् ॥ २ ॥

महता तपसा राम महता चापि कर्मणा ।
राज्ञा दशरथेनासि लब्धोऽमृतमिवामरैः ॥ ३ ॥

तव चैव गुणैर्बद्धस्त्वद्वियोगान्महीपतिः ।
राजा देवत्वमापन्नो भरतस्य यथा श्रुतम् ॥ ४ ॥

यदि दुःखमिदं प्राप्तं काकुत्स्थ न सहिष्यसे ।
प्राकृतश्चाल्पसत्त्वश्च इतरः कः सहिष्यति ॥ ५ ॥

दुःखितो हि भवांल्लोकांस्तेजसा यदि धक्ष्यते ।
आर्ताः प्रजा नरव्याघ्र क्व नुयास्यन्ति निर्वृतिम् ॥ ६ ॥

लोकस्वभाव एवैष ययातिर्नहुषात्मजः ।
गतश्शक्रेण सालोक्यमपतत्स तमः स्पृशन् ॥ ७ ॥

महर्षिर्यो वसिष्ठस्तु यः पितुर्नः पुरोहितः ।
अह्ना पुत्रशतं जज्ञे तथैवास्य पुनर्हतम् ॥ ८ ॥

या चेयं जगतो माता देवी लोकनमस्कृता ।
अस्याश्च चलनं भूमेर्दृश्यते सत्यसंश्रय ॥ ९ ॥

यौ धर्मौ जगतां नेत्रौ यत्र सर्वं प्रतिष्ठितम् ।
आदित्यचन्द्रौ ग्रहणमभ्युपेतौ महाबलौ ॥ १० ॥

सुमहान्त्यपि भूतानि देवाश्च पुरुषर्षभ ।
न दैवस्य प्रमुञ्चन्ति सर्वभूतादिदेहिनः ॥ ११ ॥

शक्रादिष्वपि देवेषु वर्तमानौ नयानयौ ।
श्रूयेते नरशार्दूल न त्वं व्यथितुमर्हसि ॥ १२ ॥

नष्टायामपि वैदेह्यां हृतायामपि चानघ ।
शोचितुं नार्हसे वीर यथाऽन्यः प्राकृतस्तथा ॥ १३ ॥

त्वद्विधा न हि शोचन्ति सततं सत्यदर्शनाः ।
सुमहत्स्वपि कृच्छ्रेषु रामानिर्विण्णदर्शनाः ॥ १४ ॥

तत्त्वतो हि नरश्रेष्ठ बुद्ध्या समनुचिन्तय ।
बुद्ध्या युक्ता महाप्राज्ञा विजानन्ति शुभाशुभे ॥ १५ ॥

अदृष्टगुणदोषाणामश्रुतानां तु कर्मणाम् ।
नान्तरेण क्रियां तेषां फलमिष्टं प्रवर्तते ॥ १६ ॥

त्वमेव हि पुरा राम मामेवं बहुशोऽन्वशाः ।
अनुशिष्याद्धि को नु त्वामपि साक्षाद्बृहस्पतिः ॥ १७ ॥

बुद्धिश्च ते महाप्राज्ञ दैवैरपि दुरन्वया ।
शोकेनाभिप्रसुप्तं ते ज्ञानं संबोधयाम्यहम् ॥ १८ ॥

दिव्यं च मानुषं च त्वमात्मनश्च पराक्रमम् ।
इक्ष्वाकुवृषभावेक्ष्य यतस्व द्विषतां वधे ॥ १९ ॥

किं ते सर्वविनाशेन कृतेन पुरुषर्षभ ।
तमेव त्वं रिपुं पापं विज्ञायोद्धर्तुमर्हसि ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे षट्षष्टितमः सर्गः ॥

आदितः श्लोकाः 8931 आरण्यकाण्डे आदितः श्लोकाः 2219



सप्तषष्टितमः सर्गः

जटायुर्दर्शनम् ॥

पूर्वजोऽप्युक्तमात्रस्तु लक्ष्मणेन सुभाषितम् ।
सारग्राही महासारं प्रतिजग्राह राघवः ॥ १ ॥

सन्निगृह्य महाबाहुः प्रवृद्धं कोपमात्मनः ।
अवष्टभ्य धनुश्चित्रं रामो लक्ष्मणमब्रवीत् ॥ २ ॥

किं करिष्यावहे वत्स क्व वा गच्छाव लक्ष्मण ।
केनोपायेन पश्येयं सीतामिति विचिन्तय ॥ ३ ॥

तं तथा परितापार्तं लक्ष्मणो राममब्रवीत् ॥ ४ ॥

इदमेव जनस्थानं त्वमन्वेषितुमर्हसि ।
राक्षसैर्बहुभिः कीर्णं नानाद्रुमलतायुतम् ॥ ५ ॥

सन्तीह गिरिदुर्गाणि निर्दराः कन्दराणि च।
गुहाश्च विविधा घोरा नानामृगगणाकुलाः ॥ ६ ॥

आवासाः किन्नराणां च गन्धर्वभवनानि च।
तानि युक्तो मया सार्धं त्वमन्वेषितुमर्हसि ॥ ७ ॥

त्वद्विधा बुद्धिसम्पन्ना महात्मानो नरर्षभ।
आपत्सु न प्रकम्पन्ते वायुवेगैरिवाचलाः ॥ ८ ॥

इत्युक्तस्तद्वनं सर्वं विचचार सलक्ष्मणः।
क्रुद्धो रामः शरं घोरं सन्धाय धनुषि क्षुरम् ॥ ९ ॥

ततः पर्वतकूटाभं महाभागं द्विजोत्तमम्।
ददर्श पतितं भूमौ क्षतजार्द्रं जटायुषम् ॥
तं दृष्ट्वा गिरिशृङ्गाभं रामो लक्ष्मणमब्रवीत् ॥ १० ॥

अनेन सीता वैदेही भक्षिता नात्र संशयः।
गृध्ररूपमिदं व्यक्तं रक्षो भ्रमति कानने ॥ ११ ॥

भक्षयित्वा विशालाक्षीमास्ते सीतां यथासुखम्।
एनं वधिष्ये दीप्तास्यैर्घोरैर्बाणैरजिह्मगैः ॥ १२ ॥

इत्युक्त्वाऽभ्यपतद्गृध्रं सन्धाय धनुषि क्षुरम्।
क्रुद्धो रामस्समुद्रान्तां चालयन्निव मेदिनीम् ॥ १३ ॥

तं दीनो दीनया वाचा सफेनं रुधिरं वमन्।
अभ्यभाषत पक्षी तु रामं दशरथात्मजम् ॥ १४ ॥

यामोषधिमिवायुष्मन्नन्वेषसि महावने ।
सा देवी मम च प्राणा रावणेनोभयं हृतम् ॥ १५ ॥

त्वया विरहिता देवी लक्ष्मणेन च राघव ।
ह्रियमाणा मया दृष्टा रावणेन बलीयसा ॥ १६ ॥

सीतामभ्यवपन्नोऽहं रावणश्च रणे मया ।
विध्वंसितरथच्छत्रः पातितो धरणीतले ॥ १७ ॥

एतदस्य धनुर्भग्नमेतदस्य शरावरम् ।
अयं तु सारथिस्तस्य मत्पक्षनिहतो युधि ॥
अयमस्य रणे राम भग्नः सांग्रामिको रथः ॥ १८ ॥

परिश्रान्तस्य मे पक्षौ छित्त्वा खड्गेन रावणः ।
सीतामादाय वैदेहीमुत्पपात विहायसम् ॥ १९ ॥

रक्षसा निहतं पूर्वं न मां हन्तुं त्वमर्हसि ॥ २० ॥

रामस्तस्य तु विज्ञाय बाष्पपूर्णमुखस्तदा ।
द्विगुणीकृततापार्तः सीतासक्तां प्रियां कथाम् ॥ २१ ॥

गृध्रराजं परिष्वज्य परित्यज्य महद्धनुः ।
निपपातावशो भूमौ रुरोद सहलक्ष्मणः ॥ २२ ॥

एकमेकायने दुर्गे निःश्वसन्तं मुहुर्मुहुः ।
समीक्ष्य दुःखितो रामः सौमित्रिमिदमब्रवीत् ॥ २३ ॥

राज्याद्भ्रंशो वने वासः सीता नष्टा द्विजो हतः।
ईदृशीयं ममालक्ष्मीर्निर्दहेदपि पावकम् ॥ २४ ॥

संपूर्णमपि चेदद्य प्रतरेयं महोदधिम्।
सोऽपि नूनं ममालक्ष्म्या विशुष्येत्सरितां पतिः ॥ २५ ॥

नास्त्यभाग्यतरो लोके मत्तोऽस्मिन्सचराचरे।
येनेयं महती प्राप्ता मया व्यसनवागुरा ॥ २६ ॥

अयं पितृवयस्यो मे गृध्रराजो जरान्वितः।
शेते विनिहतो भूमौ मम भाग्यविपर्ययात् ॥ २७ ॥

इत्येवमुक्त्वा बहुशो राघवः सहलक्ष्मणः।
जटायुषं च पस्पर्श पितृस्नेहं विदर्शयन् ॥ २८ ॥

निकृत्तपक्षं रुधिरावसिक्तं
तं गृध्रराजं परिरभ्य रामः।
क्व मैथिली प्राणसमा गतेति
विमुच्य बाष्पं निपपात भूमौ ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे सप्तषष्टितमः सर्गः ॥

अष्टषष्टितमः सर्गः

जटायुस्संस्कारः

रामः संप्रेक्ष्य तं गृध्रं भुवि रौद्रेण पातितम्।
सौमित्रिं मित्रसंपन्नमिदं वचनमब्रवीत् ॥ १ ॥

ममायं नूनमर्थेषु यतमानो विहङ्गमः।
राक्षसेन हतः संख्ये प्राणांस्त्यजति दुस्त्यजान् ॥ २ ॥

अयमस्य शरीरेऽस्मिन्प्राणो लक्ष्मण विद्यते।
तथा हि स्वरहीनोऽयं विक्लबः समुदीक्षते ॥ ३ ॥

जटायो यदि शक्नोषि वाक्यं व्याहरितुं पुनः।
सीतामाख्याहि भद्रं ते वधमाख्याहि चात्मनः ॥ ४ ॥

किं निमित्तोऽहरत्सीतां रावणस्तस्य किं मया।
अपराधं तु यं दृष्ट्वा रावणेन हृता प्रिया ॥ ५ ॥

कथं तच्चन्द्रसङ्काशं मुखमासीन्मनोहरम्।
सीतया कानि चोक्तानि तस्मिन्काले द्विजोत्तम ॥ ६ ॥

कथं वीर्यः कथंरूपः किं कर्मा स च राक्षसः।
क्व चास्य भवनं तात ब्रूहि मे परिपृच्छतः ॥ ७ ॥

तमुद्वीक्ष्याथ दीनात्मा विलपन्तमनन्तरम्।
वाचाऽतिसन्नया रामं जटायुरिदमब्रवीत् ॥ ८ ॥

हृता सा राक्षसेन्द्रेण रावणेन विहायसा।
मायामास्थाय विपुलां वातदुर्दिनसंकुलाम् ॥ ९ ॥

परिश्रान्तस्य मे तात पक्षौ छित्त्वा स राक्षसः।
सीतामादाय वैदेहीं प्रयातो दक्षिणां दिशम् ॥ १० ॥

उपरुध्यन्ति मे प्राणा दृष्टिर्भ्रमति राघव।
सर्वक्लेशविमुक्तं मां बाहुभ्यां संपरिष्वज ॥ ११ ॥

पश्यामि वृक्षान्सौवर्णानुशीरकृतमूर्धजान् ॥ १२ ॥

येन याति मुहूर्तेन सीतामादाय रावणः।
विप्रनष्टं धनं क्षिप्रं तत्स्वामी प्रतिपद्यते ॥ १३ ॥

विन्दो नाम मुहूर्तोऽसौ स च काकुत्स्थ नाबुधत्।
त्वत्प्रियां जानकीं हृत्वा रावणो राक्षसेश्वरः।
झषवद्बडिशं गृह्य क्षिप्रमेव विनश्यति ॥ १४ ॥

न च त्वया व्यथा कार्या जनकस्य सुतां प्रति।
वैदेह्यां रंस्यसे क्षिप्रं हत्वा तं राक्षसं रणे ॥ १५ ॥

असंमूढस्य गृध्रस्य रामं प्रत्यनुभाषतः।
आस्यात्सुस्राव रुधिरं म्रियमाणस्य सामिषम् ॥ १६ ॥

पुत्रो विश्रवसः साक्षाद्भ्राता वैश्रवणस्य च।
इत्युक्त्वा दुर्लभान्प्राणान्मुमोच पतगेश्वरः ॥ १७ ॥

ब्रूहि ब्रूहीति रामस्य ब्रुवाणस्य कृताञ्जलेः।
त्यक्त्वा शरीरं गृध्रस्य जग्मुः प्राणा विहायसम् ॥ १८ ॥

स निक्षिप्य शिरो भूमौ प्रसार्या चरणौ तथा ।
विक्षिप्य च शरीरं स्वं पपात धरणीतले ॥ १९ ॥

तं गृध्रं प्रेक्ष्य ताम्राक्षं गतासुमचलोपमम् ।
रामस्सुबहुभिर्दुःखैर्दीनस्सौमित्रिमब्रवीत् ॥ २० ॥

बहूनि रक्षसां वासे वर्षाणि वसता सुखम् ।
अनेन दण्डकारण्ये विशीर्णमिह पक्षिणा ॥ २१ ॥

अनेकवार्षिको यस्तु चिरकालसमुत्थितः ।
सोऽयमद्य हतश्शेते कालो हि दुरतिक्रमः ॥ २२ ॥

पश्य लक्ष्मण गृध्रोऽयमुपकारी हतश्च मे ।
सीतामभ्यवपन्नो वै रावणेन बलीयसा ॥ २३ ॥

गृध्रराज्यं परित्यज्य पितृपैतामहं महत् ।
मम हेतोरयं प्राणान् मुमोच पतगेश्वरः ॥ २४ ॥

सर्वत्र खलु दृश्यन्ते साधवो धर्मचारिणः ।
शूराश्शरण्यास्सौमित्रे तिर्यग्योनिगतेष्वपि ॥ २५ ॥

सीताहरणजं दुःखं न मे सौम्य तथागतम् ।
यथा विनाशो गृध्रस्य मत्कृते च परन्तप ॥ २६ ॥

राजा दशरथः श्रीमान् यथा मम महायशाः ।
पूजनीयश्च मान्यश्च तथाऽयं पतगेश्वरः ॥ २७ ॥

सौमित्रे हर काष्ठानि निर्मथिष्यामि पावकम्।
गृध्रराजं हि धक्ष्यामि मत्कृते निधनं गतम् ॥ २८ ॥

नाथं पतगलोकस्य चितामारोपयाम्यहम्।
इमं धक्ष्यामि सौमित्रे हतं रौद्रेण रक्षसा ॥ २९ ॥

गोदावर्यास्तटे शुभ्रे चितां कुरु महाभुज।
एवमुक्त्वा तु सौमित्रिं समालक्ष्य जटायुषम् ॥ ३० ॥

समुद्धृत्य गतिः श्रीमान् गोदावर्यास्तटं प्रति।
ततो गत्वा तु तत्तीरे शुभ्रे [illegible] ॥ ३१ ॥

अवतीर्याथ निक्षिप्य मथित्वाग्निं महायशाः।
लक्ष्मणेनाहृतैः काष्ठैश्चितां कृत्वा महाभुजः ॥ ३२ ॥

या गतिर्यज्ञशीलानामाहिताग्नेश्च या गतिः।
अपरावर्तिनां या च या च भूमिप्रदायिनाम् ॥ ३३ ॥

मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान्।
गृध्रराज महासत्व संस्कृतश्च मया व्रज ॥ ३४ ॥

एवमुक्त्वा चितां दीप्तामारोप्य पतगेश्वरम्।
ददाह रामो धर्मात्मा स्वबन्धुमिव दुःखितः ॥ ३५ ॥

रामोऽथ सहसौमित्रिर्वनं गत्वा स वीर्यवान्।
स्थूलान् हत्वा महारोहीननु तस्तार तं द्विजम्॥ ३६ ॥

रोहिमांसानि चोत्कृत्य पेशीकृत्वा महायशाः ।
शकुनीनां ददौ रामो रम्ये हरितशाद्वले ॥ ३७ ॥

यत्तत्प्रेतस्य मर्त्यस्य कथयन्ति द्विजातयः ।
तत्स्वर्गगमनं तस्य पित्र्यं रामो जजाप ह ॥ ३८ ॥

गोदावरीमयातां तौ नदीं नरवरात्मजौ ॥ ३९ ॥

शास्त्रदृष्टेन विधिना जले तत्र च राघवौ ।
स्नात्वा तौ गृध्रराजाय उदकं चक्रतुस्तदा ॥ ४० ॥

स गृध्रराजः कृतवान्यशस्करं
सुदुष्करं कर्म रणे निपातितः ।
महर्षिकल्पेन च संस्कृतस्तदा
जगाम पुण्यां गतिमात्मनश्शुभाम् ॥ ४१ ॥

कृतोदकौ तावपि पक्षिसत्तमे
स्थिरां च बुद्धिं प्रणिधाय जग्मतुः ।
प्रवेश्य सीताधिगमे ततो मनो
वनं सुरेन्द्राविव विष्णुवासवौ ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे अष्टषष्टितमः सर्गः ॥

आदितः श्लोकाः 9002 आरण्यकाण्डे आदितः श्लोकाः 2290



एकोनसप्ततितमः सर्गः

अयोमुखीकबन्धयोर्दर्शनम् ॥

कृत्वैवमुदकं तस्मै प्रस्थितौ रामलक्ष्मणौ ।
अवेक्षन्तौ वने सीतां पश्चिमां जग्मतुर्दिशम् ॥ १ ॥

तौ दिशं दक्षिणां गत्वा शरचापासिधारिणौ ।
अविप्रहतमैक्ष्वाकौ पन्थानं प्रतिजग्मतुः ॥ २ ॥

गुल्मैर्वृक्षैश्च बहुभिर्लताभिश्च प्रवेष्टितम् ।
आवृतं सर्वतो दुर्गं गहनं घोरदर्शनम् ॥ ३ ॥

व्यतिक्रम्य तु वेगेन व्यालसिंहनिषेवितम् ।
सुभीमं तन्महारण्यं व्यतियातौ महाबलौ ॥ ४ ॥

ततः परं जनस्थानात्त्रिक्रोशं गम्य राघवौ ।
क्रौञ्चारण्यं विविशतुर्गहनं तौ महौजसौ ॥ ५ ॥

नानाद्रुमलतागुल्मैः प्रहृष्टमिव सर्वतः ।
नानापक्षिगणैर्जुष्टं नानाव्यालमृगैर्युतम् ॥ ६ ॥

दिदृक्षमाणौ वैदेहीं तद्वनं तौ विचिक्यतुः ।
तत्र तत्रावतिष्ठन्तौ सीताहरणकर्शितौ ॥ ७ ॥

ततः पूर्वेण तौ गत्वा त्रिक्रोशं भ्रातरौ तदा ।
क्रौञ्चारण्यमतिक्रम्य मतङ्गाश्रममन्तरे ॥ ८ ॥

दृष्ट्वा तु तद्वनं घोरं बहुभीममृगद्विजम् ।
नानासत्त्वसमाकीर्णं सर्वं गहनपादपम् ॥ ९ ॥

ददृशाते तु तौ तत्र दरीं दशरथात्मजौ ।
पातालसमगंभीरां तमसा नित्यसंवृताम् ॥ १० ॥

आसाद्य तौ नरव्याघ्रौ दर्यास्तस्याविदूरतः ।
ददृशाते महारूपां राक्षसीं विकृतेक्षणाम् ॥ ११ ॥

भयदामल्पसत्वानां बीभत्सां रौद्रदर्शनाम् ।
लम्बोदरीं तीक्ष्णदंष्ट्रां करालां परुषत्वचम् ॥ १२ ॥

भक्षयन्तीं मृगान्भीमान्विकटां मुक्तमूर्धजाम् ।
प्रैक्षेतां तौ तदा तत्र भ्रातरौ रामलक्ष्मणौ ॥ १३ ॥

सा समासाद्य तौ वीरौ व्रजन्तं भ्रातुरग्रतः ।
एहि रंस्यावहेत्युक्त्वा समालम्बत लक्ष्मणम् ॥ १४ ॥

उवाच चैनं वचनं सौमित्रिमुपगुह्य सा ॥ १५ ॥

अहं त्वयोमुखी नाम लाभस्ते त्वमसि प्रियः ।
नाथ पर्वतकूटेषु नदीनां पुलिनेषु च ।
आयुश्शेषमिमं वीर त्वं मया सह रंस्यसे ॥ १६ ॥

एवमुक्तस्तु कुपितः खड्गमुद्धृत्य लक्ष्मणः ।
कर्णनासौ स्तनौ चास्या विचकर्तारिसूदनः ॥ १७ ॥

कर्णनासे निकृत्ते तु विस्वरं सा विनद्य च ।
यथागतं प्रदुद्राव राक्षसी भीमदर्शना ॥ १८ ॥

तस्यां गतायां गहनं व्रजन्तौ वनमोजसा।
आसेदतुरमित्रघ्नौ भ्रातरौ रामलक्ष्मणौ ॥ १९ ॥

लक्ष्मणस्तु महातेजाः सत्त्ववान् शीलवाञ्छुचिः।
अब्रवीत्प्राञ्जलिर्वाक्यं भ्रातरं दीप्ततेजसम् ॥ २० ॥

स्पन्दते मे दृढं बाहुरुद्विग्नमिव मे मनः।
प्रायशश्चाप्यनिष्टानि निमित्तान्युपलक्षये ॥ २१ ॥

तस्मात्सज्जीभवार्य त्वं कुरुष्व वचनं हितम्।
ममैव हि निमित्तानि सद्यः शंसन्ति संभ्रमम् ॥ २२ ॥

एष वङ्कुलको नाम पक्षी परमदारुणः।
आवयोर्विजयं युद्धे शंसन्निव विनर्दति ॥ २३ ॥

तयोरन्वेषतोरेवं सर्वं तद्वनमोजसा।
संजज्ञे विपुलश्शब्दः प्रभञ्जन्निव तद्वनम् ॥ २४ ॥

संवेष्टितमिवात्यर्थं गगनं मातरिश्वना।
वनस्य तस्य शब्दोऽभूद्दिवमापूरयन्निव ॥ २५ ॥

तं शब्दं कांक्षमाणस्तु रामः कक्षे सहानुजः।
ददर्श सुमहाकायं राक्षसं विपुलोरसम् ॥ २६ ॥

आसेदतुस्ततस्तत्र तावुभौ प्रमुखे स्थितम्।
विवृद्धमशिरोग्रीवं कबन्धमुदरेमुखम् ॥ २७ ॥

रोमभिर्निचितैस्तीक्ष्णैर्महागिरिमिवोच्छ्रितम् ।
नीलमेघनिभं रौद्रं मेघस्तनितनिस्वनम् ॥ २८ ॥

अग्निज्वालानिकाशेन ललाटस्थेन दीप्यता ।
महापक्ष्मेण पिङ्गेन विपुलेनायतेन च ॥ २९ ॥

एकेनोरसि घोरेण नयनेनाशुदर्शिना ।
महादंष्ट्रोपपन्नं तं लेलिहानं महामुखम् ॥ ३० ॥

भक्षयन्तं महाघोरानृक्षसिंहमृगद्विपान् ।
घोरौ भुजौ विकुर्वाणमुभौ योजनमायतौ ॥ ३१ ॥

कराभ्यां विविधान् गृह्य ऋक्षान्पक्षिगणान् मृगान् ।
आकर्षन्तं विकर्षन्तमनेकान् मृगयूथपान् ।
स्थितमावृत्य पन्थानं तयोर्भ्रात्रोः प्रपन्नयोः ॥ ३२ ॥

अथ तौ समभिक्रम्य क्रोशमात्रे ददर्शतुः ।
महान्तं दारुणं भीमं कबन्धं भुजसंवृतम् ।
कबन्धमिव संस्थानादतिघोरप्रदर्शनम् ॥ ३३ ॥

स महाबाहुरत्यर्थं प्रसार्य विपुलौ भुजौ ।
जग्राह सहितावेव राघवौ पीडयन् बलात् ॥ ३४ ॥

खड्गिनौ दृढधन्वानौ तिग्मतेजोवपुर्धरौ ।
भ्रातरौ विवशं प्राप्तौ कृष्यमाणौ महाबलौ ॥ ३५ ॥

तत्र धैर्येण शूरस्तु राघवो नैव विव्यथे ।
बाल्यादनाश्रयत्वाच्च लक्ष्मणस्त्वभिविव्यथे ॥ ३६ ॥

उवाच च विषण्णस्सन्राघवं राघवानुजः ॥ ३७ ॥

पश्य मां वीर विवशं राक्षसस्य वशं गतम् ।
मयैकेन विनिर्युक्तः परिमुञ्चस्व राघव ॥ ३८ ॥

मां हि भूतबलिं दत्वा पलायस्व यथासुखम् ॥ ३९ ॥

अधिगन्तासि वैदेहीमचिरेणेति मे मतिः ॥ ४० ॥

प्रतिलभ्य च काकुत्स्थ पितृपैतामहीं महीम् ।
तत्र मां राम राज्यस्थः स्मर्तुमर्हसि सर्वदा ॥ ४१ ॥

लक्ष्मणेनैवमुक्तस्तु रामः सौमित्रिमब्रवीत् ।
मा स्म त्रासं कृथा वीर न हि त्वादृग्विषीदति ॥ ४२ ॥

एतस्मिन्नन्तरे क्रूरो भ्रातरौ रामलक्ष्मणौ ।
पप्रच्छ घननिर्घोषः कबन्धो दानवोत्तमः ॥ ४३ ॥

कौ युवां वृषभस्कन्धौ महाखड्गधनुर्धरौ ।
घोरं देशमिमं प्राप्तौ मम भक्षावुपस्थितौ ॥ ४४ ॥

वदतं कार्यमिह वां किमर्थं चागतौ युवाम् ।
इमं देशमनुप्राप्तौ क्षुधार्तस्येह तिष्ठतः ॥ ४५ ॥

सबाणचापखड्गौ च तीक्ष्णशृङ्गाविवर्षभौ ।
ममास्यमनुसंप्राप्तौ दुर्लभं जीवितं पुनः ॥ ४३ ॥

तस्य तद्वचनं श्रुत्वा कबन्धस्य दुरात्मनः ।
उवाच लक्ष्मणं रामो मुखेन परिशुष्यता ॥ ४७ ॥

कृच्छ्रात्कृच्छ्रतरं प्राप्य दारुणं सत्यविक्रम ।
व्यसनं जीवितान्ताय प्राप्तमप्राप्य तां प्रियाम् ॥ ४८ ॥

कालस्य सुमहद्वीर्यं सर्वभूतेषु लक्ष्मण ।
त्वां च मां च नरव्याघ्र व्यसनैः पश्य मोहितौ ॥ ४९ ॥

नातिभारोऽस्ति दैवस्य सर्वभूतेषु लक्ष्मण ।
शूराश्च बलवन्तश्च कृतास्त्राश्च रणाजिरे ।
कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः ॥ ५० ॥

इति ब्रुवाणो दृढसत्यविक्रमो
महायशा दाशरथिः प्रतापवान् ।
अवेक्ष्य सौमित्रिमुदारविक्रमः
स्थिरां तदा स्वां मतिमात्मनाऽकरोत् ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकोनसप्ततितमः सर्गः ॥

सप्ततितमः सर्गः

कबन्धहस्तच्छेदनम् ॥

तौ तु तत्र स्थितौ दृष्ट्वा भ्रातरौ रामलक्ष्मणौ ।
बाहुपाशपरिक्षिप्तौ कबन्धो वाक्यमब्रवीत् ॥ १ ॥

तिष्ठतः किं नु मां दृष्ट्वा क्षुधार्तं क्षत्रियर्षभौ ।
आहारार्थं तु संदिष्टौ दैवेन गतचेतसौ ॥ २ ॥

तच्छ्रुत्वा लक्ष्मणो वाक्यं प्राप्तकालं हितं तदा ।
उवाचार्तिं समापन्नो विक्रमे कृतनिश्चयः ॥ ३ ॥

त्वां च मां च पुरा तूर्णमादत्ते राक्षसाधमः ॥ ४ ॥

तस्मादसिभ्यामस्याशु बाहू छिन्दावहै गुरू ॥ ५ ॥

भीषणोऽयं महाकायो राक्षसो भुजविक्रमः ।
लोकं ह्यतिजितं कृत्वा ह्यावां हन्तुमिहेच्छति ॥ ६ ॥

निश्चेष्टानां वधो राजन् कुत्सितो जगतीपते ।
क्रतुमध्योपनीतानां पशूनामिव राघव ॥ ७ ॥

एतत्संजल्पितं श्रुत्वा तयोः क्रुद्धस्तु राक्षसः ।
विदार्यास्यं तदा रौद्रस्तौ भक्षयितुमारभत् ॥ ८ ॥

ततस्तौ देशकालज्ञौ खड्गाभ्यामेव राघवौ ।
अच्छिन्दतां सुसंहृष्टौ बाहू तस्यांसदेशयोः ॥ ९ ॥

दक्षिणौ दक्षिणं बाहुमसक्तमसिना ततः।
चिच्छेद रामो वेगेन सव्यं वीरस्तु लक्ष्मणः ॥ १० ॥

स पपात महाबाहुश्छिन्नबाहुर्महास्वनः।
खं च गां च दिशश्चैव नादयञ्जलदो यथा ॥ ११ ॥

स निकृत्तौ भुजौ दृष्ट्वा शोणितौघपरिप्लुतः।
दीनः पप्रच्छ तौ वीरौ कौ युवामिति दानवः ॥ १२ ॥

इति तस्य ब्रुवाणस्य लक्ष्मणश्शुभलक्षणः।
शशंस तस्य काकुत्स्थं कबन्धस्य महाबलः ॥ १३ ॥

अयमिक्ष्वाकुदायादो रामो नाम जनैः श्रुतः।
अस्यैवावरजं विद्धि भ्रातरं मां च लक्ष्मणम् ॥ १४ ॥

मात्रा प्रतिहृते राज्ये रामः प्रव्राजितो वनम्।
मया सह चरत्येष भार्यया च महद्वनम् ॥ १५ ॥

अस्य देवप्रभावस्य वसतो विजने वने।
राक्षसापहृता भार्या यामिच्छन्ताविहागतौ ॥ १६ ॥

त्वं तु को वा किमर्थं वा कबन्धसदृशो वने।
आस्येनोरसि दीप्तेन भग्नजङ्घो विचेष्टसे ॥ १७ ॥

एवमुक्तः कबन्धस्तु लक्ष्मणेनोत्तरं वचः।
उवाच परमप्रीतस्तदिन्द्रवचनं स्मरन् ॥ १८ ॥

स्वागतं वां नरव्याघ्रौ
दिष्ट्या पश्यामि चाप्यहम् ।
दिष्ट्या चेमौ निकृत्तौ मे
युवाभ्यां बाहुबन्धनौ ॥ १९ ॥

विरूपं यच्च मे रूपं प्राप्तं ह्यविनयाद्यथा ।
तन्मे शृणु नरव्याघ्र तत्त्वतः शंसतस्तव ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे सप्ततितमः सर्गः ॥

आदितः श्लोकाः 9073 आरण्यकाण्डे आदितः श्लोकाः 2361

एकसप्ततितमः सर्गः

कबन्धेन स्ववृत्तान्तकथनम् ॥

पुरा राम महाबाहो महाबलपराक्रम ।
रूपमासीन्ममाचिन्त्यं त्रिषु लोकेषु विश्रुतम् । ॥ १ ॥

यथा सोमस्य शक्रस्य सूर्यस्य च यथा वपुः ॥ २ ॥

सोऽहं रूपमिदं कृत्वा लोकवित्रासनं महत् ।
ऋषीन्वनगतान्राम त्रासयामि ततस्ततः ॥ ३ ॥

ततः स्थूलशिरा नाम महर्षिः कोपितो मया ।
संचिन्वन् विविधं वन्यं रूपेणानेन धर्षितः ॥ ४ ॥

तेनाहमुक्तः प्रेक्ष्यैवं घोरशापाभिधायिना।
एतदेव नृशंसं ते रूपमस्तु विगर्हितम् ॥ ५ ॥

स मया याचितः क्रुद्धश्शापस्यान्तो भवेदिति।
अभिशापकृतस्येति तेनेदं भाषितं वचः ॥ ६ ॥

यदा छित्त्वा भुजौ रामस्त्वां दहेद्विजने वने।
तदा त्वं प्राप्स्यसे रूपं स्वमेव विपुलं शुभम् ॥ ७ ॥

श्रिया विराजितं पुत्रं दनोस्त्वं विद्धि लक्ष्मण।
इन्द्रकोपादिदं रूपं प्राप्तमेवं रणाजिरे ॥ ८ ॥

अहं हि तपसोग्रेण पितामहमतोषयम्।
दीर्घमायुः स मे प्रादात्ततो मां विभ्रमोऽस्पृशत् ॥ ९ ॥

दीर्घमायुर्मया प्राप्तं किं मे शक्रः करिष्यति।
इत्येवं बुद्धिमास्थाय रणे शक्रमधर्षयम् ॥ १० ॥

तस्य बाहुप्रमुक्तेन वज्रेण शतपर्वणा।
सक्थिनी चैव मूर्धा च शरीरे संप्रवेशितम् ॥ ११ ॥

स मया याच्यमानः सन्ननयद्यमसादनम्।
पितामहवचः सत्यं तदस्त्विति ममाब्रवीत् ॥ १२ ॥

अनाहारः कथं शक्तो भग्नसक्थिशिरोमुखः।
वज्रेणाभिहतः कालं सुदीर्घमपि जीवितुम् ॥ १३ ॥

एवमुक्तस्तु मे शक्रो बाहू योजनमायतौ ।
प्रादादास्यं च मे कुक्षौ तीक्ष्णदंष्ट्रमकल्पयत् ॥ १४ ॥

सोऽहं भुजाभ्यां दीर्घाभ्यां संकृष्यास्मिन्वनेचरान् ।
सिंहद्विपमृगव्याघ्रान् भक्षयामि समन्ततः ॥ १५ ॥

स तु मामब्रवीदिन्द्रो यदा रामः सलक्ष्मणः ।
छेत्स्यते समरे बाहू तदा स्वर्गं गमिष्यसि ॥ १३ ॥

अनेन वपुषा राम वनेऽस्मिन् राजसत्तम ।
यद्यत् पश्यामि सर्वस्य ग्रहणं साधु रोचये ॥ १७ ॥

अवश्यं ग्रहणं रामो मन्येऽहं समुपैष्यति ।
इमां बुद्धिं पुरस्कृत्य देहन्यासकृतश्रमः ॥ १८ ॥

स त्वं रामोऽसि भद्रं ते नाहमन्येन राघव ।
शक्यो हन्तुं यथा तत्वमेवमुक्तं महर्षिणा ॥ १९ ॥

अहं हि मतिसाचिव्यं करिष्यामि नरर्षभ ।
मित्रं चैवोपदेक्ष्यामि युवाभ्यां संस्कृतोऽग्निना ॥ २० ॥

एवमुक्तस्तु धर्मात्मा दनुना तेन राघवः ।
इदं जगाद वचनं लक्ष्मणस्योपशृण्वतः ॥ २१ ॥

रावणेन हृता सीता मम भार्या यशस्विनी ।
निष्क्रान्तस्य जनस्थानात्सह भ्रात्रा यथासुखम्॥ २२ ॥

नाममात्रं तु जानामि न रूपं तस्य रक्षसः ।
निवासं वा प्रभावं वा वयं तस्य न विद्महे ॥ २३ ॥

शोकार्तानामनाथानामेवं विपरिधावताम् ।
कारुण्यं सदृशं कर्तुमुपकारे च वर्तताम् ॥ २४ ॥

काष्ठान्यानीय शुष्काणि काले भग्नानि कुञ्जरैः ।
धक्ष्यामस्त्वां वयं वीर श्वभ्रे महति कल्पिते ॥ २५ ॥

स त्वं सीतां समाचक्ष्व येन वा यत्र वा हृता ।
कुरु कल्याणमत्यर्थं यदि जानासि तत्वतः ॥ २६ ॥

एवमुक्तस्तु रामेण वाक्यं दनुरनुत्तमम् ।
प्रोवाच कुशलो वक्तुं वक्तारमपि राघवम् ॥ २७ ॥

दिव्यमस्ति न मे ज्ञानं नाभिजानामि मैथिलीम् ।
यस्तां ज्ञास्यति तं वक्ष्ये दग्धः स्वं रूपमास्थितः ॥२८॥

अदग्धस्य हि विज्ञातुं शक्तिरस्ति न मे प्रभो ।
राक्षसं तं महावीर्यं सीता येन हृता तव ॥ २९ ॥

विज्ञानं हि मम भ्रष्टं शापदोषेण राघव ।
स्वकृतेन मया प्राप्तं रूपं लोकविगर्हितम् ॥ ३० ॥

किं तु यावन्न यात्यस्तं सविता श्रान्तवाहनः ।
तावन्मामवटे क्षिप्त्वा दह राम यथाविधि ॥ ३१ ॥

दग्धस्त्वयाऽहमवटे न्यायेन रघुनन्दन।
वक्ष्यामि तमहं वीर यस्तं ज्ञास्यति राक्षसम् ॥ ३२ ॥

तेन सख्यं च कर्तव्यं न्यायवृत्तेन राघव।
कल्पयिष्यति ते प्रीतस्साहाय्यं लघुविक्रमः ॥ ३३ ॥

न हि तस्यास्त्यविज्ञातं त्रिषु लोकेषु राघव।
सर्वान् परिसृतो लोकान् पुरा वै कारणान्तरे ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे एकसप्ततितमः सर्गः ॥

आदितः श्लोकाः 9107 आरण्यकाण्डे आदितः श्लोकाः 2395

द्विसप्ततितमः सर्गः

सीताप्राप्त्युपायकथनम् ॥

एवमुक्तौ तु तौ वीरौ कबन्धेन नरेश्वरौ।
कृतवन्तौ च महतीं चितां गिरिगुहोपमाम् ॥ १ ॥

ततः कबन्धमारोप्य चितां ज्वलिततेजसौ।
बाहू च सुमहाबाहू योजनायतविस्तृतौ ॥ २ ॥

लक्ष्मणस्तु महोल्काभिर्ज्वलिताभिस्समन्ततः।
चितामादीपयामास सा प्रजज्वाल सर्वतः ॥ ३ ॥

तां प्रेक्ष्य सर्वतो दीप्तां चितां दृढधनुर्द्धरः।
विस्मयान इदं वाक्यं राघवं लक्ष्मणोऽब्रवीत् ॥ ४ ॥

दग्धो जटायुः पूर्वं तु सीतामन्वेषता त्वया।
अयं द्वितीयो निर्दग्धस्तृतीयं किं नु वक्ष्यसि ॥ ५ ॥

महाभ्रशिखरप्रख्यं कबन्धमनलो महान्।
अन्तरिक्षं महोत्काभिरावृणोत्स सहस्रशः ॥ ६ ॥

तच्छरीरं कबन्धस्य घृतपिण्डोपमं महत्।
मेदसा पच्यमानस्य मन्दं दहति पावकः ॥ ७ ॥

स विधूय चितामाशु विधूमोऽग्निरिवोत्थितः।
अरजे वाससी बिभ्रन्मालां दिव्यां महाबलः ॥ ८ ॥

ततश्चिताया वेगेन भास्वरो विमलाम्बरः।
उत्पपाताशु संहृष्टस्सर्वप्रत्यङ्गभूषणः ॥ ९ ॥

विमाने भास्वरे तिष्ठन् हंसयुक्ते यशस्करे।
प्रभया च महातेजा दिशो दश विराजयन् ॥१०॥

सोऽन्तरिक्षगतो रामं कबन्धो वाक्यमब्रवीत्।
शृणु राघव तत्त्वेन यथा सीतामवाप्स्यसि ॥११॥

राम षडयुक्तयो लोके याभिः सर्वं विमृश्यते ॥१२॥

परिमृष्टो दशान्तेन दशाभागेन सेव्यते।
दशाभागगतो हीनस्त्वं हि रामस्सलक्ष्मणः ॥
यत्कृते व्यसन प्राप्तं त्वया दारप्रधर्षणम् ॥१३॥

तदवश्यं त्वया कार्यस्स सुहृत्सुहृदां वर ।
अकृत्वा हि न ते सिद्धिमहं पश्यामि चिन्तयन्॥ १४ ॥

श्रूयतां राम वक्ष्यामि सुग्रीवो नाम वानरः ।
भ्रात्रा निरस्तः क्रुद्धेन वालिना शक्रसूनुना ॥ १५ ॥

ऋश्यमूके गिरिवरे पम्पापर्यन्तशोभिते ।
निवसत्यात्मवान् वीरश्चतुर्भिः सह वानरैः ॥ १६ ॥

वानरेन्द्रो महावीर्यस्तेजोवानमितप्रभः ।
सत्यसन्धो विनीतश्च धृतिमान् मतिमान् महान् ॥ १७ ॥

दक्षः प्रगल्भो द्युतिमान् महाबलपराक्रमः ।
भ्रात्रा विवासितो राम राज्यहेतोर्महाबलः ॥ १८ ॥

स ते सहायो मित्रं च सीतायाः परिमार्गणे ।
भविष्यति हि ते राम मा च शोके मनः कृथाः ॥ १९ ॥

भवितव्यं हि यच्चापि न तच्छक्यमिहान्यथा ।
कर्तुमिक्ष्वाकुशार्दूल कालो हि दुरतिक्रमः ॥ २० ॥

गच्छ शीघ्रमितो राम सुग्रीवं तं महाबलम् ।
वयस्यं तं कुरु क्षिप्रमितो गत्वाऽद्य राघव
अद्रोहाय समागम्य दीप्यमाने विभावसौ ॥ २१ ॥

न च ते सोऽवमन्तव्यः सुग्रीवो वानराधिपः ।
कृतज्ञः कामरूपी च सहायार्थी च वीर्यवान् ॥ २२ ॥

शक्तौ ह्यद्य युवां कर्तुं कार्यं तस्य चिकीर्षितम् ।
कृतार्थो वाऽकृतार्थो वा कृत्यं तव करिष्यति ॥ २३ ॥

स ऋक्षरजसः पुत्रः पम्पामटति शङ्कितः।
भास्करस्यौरसः पुत्रो वालिना कृतकिल्बिषः ॥ २४ ॥

सन्निधायायुधं क्षिप्रमृश्यमूकालयं कपिम्।
कुरु राघव सत्येन वयस्यं वनचारिणम् ॥ २५ ॥

स हि स्थानानि सर्वाणि कात्स्न्र्येन कपिपुङ्गवः।
नरमांसाशिनां लोके नैपुण्यादधिगच्छति ॥ २६ ॥

न तस्याविदितं लोके किंचिदस्ति हि राघव।
यावत्सूर्यः प्रतपति सहस्रांशुरिन्दम ॥ २७ ॥

स नदीर्विपुलाञ्छैलान् गिरिदुर्गाणि कन्दरान्।
अन्विष्य वानरैः सार्धं पत्नीं तेऽधिगमिष्यति ॥ २८ ॥

वानरांश्च महाभागान् प्रेषयिष्यति राघव।
दिशो विचेतुं तां सीतां त्वद्वियोगेन शोचतीम् ॥ २९ ॥

स यास्यति वरारोहां निर्मलां रावणालये ॥ ३० ॥

स मेरुशृङ्गाग्रगतामनिन्दितां
प्रविश्य पातालतलेऽपि वाऽऽश्रिताम्।
प्लवङ्गमानां प्रवरस्तव प्रियां
निहत्य रक्षांसि पुनः प्रदास्यति ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे द्विसप्ततितमः सर्गः ॥

त्रिसप्ततितमः सर्गः

ऋश्यमूकाचलमार्गप्रदर्शनम् ॥

निदर्शयित्वा रामाय सीतायाः प्रतिपादने ।
वाक्यमन्वर्थमर्थज्ञः कबन्धः पुनरब्रवीत् ॥ १ ॥

एष राम शिवः पन्था यत्रैते पुष्पिता द्रुमाः ।
प्रतीचीं दिशमाश्रित्य प्रकाशन्ते मनोरमाः ॥ २ ॥

जम्बुप्रियालपनसप्लक्षन्यग्रोधतिन्दुकाः ।
अश्वत्थाः कर्णिकाराश्च चूताश्चान्ये च पादपाः ॥ ३ ॥

धन्वना नागवृक्षाश्च तिलका नक्तमालकाः ।
नीलाशोकाः कदम्बाश्च करवीराश्च पुष्पिताः
अशोकास्त्वतिमुक्ताश्च सुभद्राः पारिभद्रकाः ॥ ४ ॥

तानारुह्याथवा भूमौ पातयित्वा च तान् बलात् ।
फलान्यमृतकल्पानि भक्षयन्तौ गमिष्यथः ॥ ५ ॥

तदतिक्रम्य काकुत्स्थ वनं पुष्पितपादपम् ।
नन्दनप्रतिमं चान्यत् कुरवो ह्युत्तरा इव ॥ ६ ॥

सर्वकामफला वृक्षाः पादपास्तु मधुस्रवाः ।
सर्वे च ऋतवस्तत्र वने चैत्ररथे यथा ॥ ७ ॥

फलभारानताश्चैव महाविटपधारिणः ।
शोभन्ते सर्वतस्तत्र मेघपर्वतसन्निभाः ॥ ८ ॥

तानारुह्याथवा भूमौ पातयित्वा यथासुखम् ।
फलान्यमृतकल्पानि लक्ष्मणस्ते प्रदास्यति ॥ ९ ॥

चङ्क्रमन्तौ वरान् देशान् शैलाच्छैलं वनाद्वनम् ।
ततः पुष्करिणीं वीरौ पम्पां नाम गमिष्यथः ॥ १० ॥

अशर्करामविभ्रंशां समतीर्थामशैवलाम् ।
राम सञ्जातवालूकां कमलोत्पलशोभिताम् ॥ ११ ॥

तत्र हंसाः प्लवाः क्रौञ्चाः कुरराश्चैव राघव ।
वल्गुस्वना निकूजन्ति पम्पासलिलगोचराः ॥ १२ ॥

नोद्विजन्ते नरान् दृष्ट्वा वधस्याकोविदाः पुरा ।
घृतपिण्डोपमान् स्थूलांस्तान् द्विजान् भक्षयिष्यथः ॥

रोहितान् वक्रतुण्डांश्च नलमीनांश्च राघव ।
पम्पायामिषुभिर्मत्स्यांस्तत्र राम वरान् हतान् ॥ १४ ॥

निस्त्वक्पक्षानयस्तप्तानकृशानेककण्टकान् ।
तव भक्त्या समायुक्तो लक्ष्मणस्सम्प्रदास्यति ॥ १५ ॥

भृशं ते खादतो मत्स्यान् पम्पायाः पुष्पसञ्चये ।
पद्मगन्धि शिवं वारि स्वादु शीतमनामयम् ॥ १६ ॥

उद्धृत्य सितमक्लिष्टं रूप्यस्फटिकसन्निभम् ।
अथ पुष्करपत्रेण लक्ष्मणः पाययिष्यति ॥ १७ ॥

स्थूलान् गिरिगुहाशय्यान् वराहान् वनचारिणः ।
अपां लोभादुपावृत्तान् वृषभानिव नर्दतः ।
रूपान्वितांश्च पम्पायां द्रक्ष्यसि त्वं नरोत्तम ॥ १८ ॥

सायाह्ने विचरन् राम दर्शयिष्यति लक्ष्मणः।
पद्मषण्डयुतं स्वादु कूजत्पक्षिगणैर्युतम् ॥ १९ ॥

शीतोदकं च पम्पाया दृष्ट्वा शोकं विहास्यसि ॥ २० ॥

सुमनोभिश्चितांस्तत्र तिलकान्नक्तमालकान्।
उत्पलानि च फुल्लानि पङ्कजानि च राघव ॥ २१ ॥

न तानि कश्चिन्माल्यानि तत्रारोपयिता नरः।
न च वै म्लानतां यान्ति न च शीर्यन्ति राघव ॥

मतङ्गशिष्यास्तत्रासन्नृषयस्सुसमाहिताः।
तेषां भाराभितप्तानां वन्यमाहरतां गुरोः ॥ २३ ॥

ये प्रपेतुर्महिं तूर्णं शरीरात्स्वेदबिन्दवः।
तानि माल्यानि जातानि मुनीनां तपसा तदा।
स्वेदबिन्दुसमुत्थानि न विनश्यन्ति राघव ॥ २४ ॥

तेषामद्यापि तत्रैव दृश्यते परिचारिणी।
श्रमणी शबरी नाम काकुत्स्थ चिरजीविनी ॥ २५ ॥

त्वां तु धर्मे स्थिता नित्यं सर्वभूतनमस्कृतम्।
दृष्ट्वा देवोपमं राम स्वर्गलोकं गमिष्यति ॥ २६ ॥

ततस्तद्राम पम्पायास्तीरमासाद्य पश्चिमम्।
आश्रमस्थानमतुलं गुह्यं काकुत्स्थ पश्यसि ॥ २७ ॥

न तत्राक्रमितुं नागाः शक्नुवन्ति तमाश्रमम्।
विविधास्तत्र वै नागा वने तस्मिंश्च पर्वते ॥ २८ ॥

ऋषेस्तस्य मतङ्गस्य विधानात्तच्च काननम्।
मतङ्गवनमित्येव विश्रुतं रघुनन्दन ॥ २९ ॥

तस्मिन्नन्दनसंकाशे देवारण्योपमे वने।
नानाविहगसंकीर्णे रंस्यसे राम निर्वृतः ॥ ३० ॥

ऋश्यमूकस्तु पम्पायाः पुरस्तात् पुष्पितद्रुमः।
सुदुःखारोहणो नाम शिशुनागाभिरक्षितः। ॥ ३१ ॥

उदारो ब्रह्मणा चैव पूर्वकाले विनिर्मितः ॥ ३२ ॥

शयानः पुरुषो राम तस्य शैलस्य मूर्धनि।
यत्स्वप्ने लभते वित्तं तत्प्रबुद्धोऽधिगच्छति ॥ ३३ ॥

न त्वेनं विषमाचारः पापकर्माऽधिरोहति ॥ ३४ ॥

यस्तु तं विषमाचारः पापकर्माऽधिरोहति।
तत्रैव प्रहरन्त्येनं सुप्तमादाय राक्षसाः ॥ ३५ ॥

तत्रापि शिशुनागानामाक्रन्दः श्रूयते महान्।
क्रीडतां राम पम्पायां मतङ्गाश्रमवासिनाम् ॥ ३६ ॥

सिक्ता रुधिरधाराभिः संहृत्य परमद्विपाः।
प्रचरन्ति पृथक्कीर्णा मेघवर्णास्तरस्विनः ॥ ३७ ॥

ते तत्र पीत्वा पानीयं विमलं शीतमव्ययम्।
निर्वृताः संविगाहन्ते वनानि वनगोचराः ॥ ३८ ॥

ऋक्षांश्च द्वीपिनश्चैव नीलकोमलकप्रभान्।
रुरूनपेतापजयान्दृष्ट्वा शोकं जयिष्यसि ॥ ३९ ॥
राम तस्य तु शैलस्य महती शोभते गुहा।
शिलापिधाना काकुत्स्थ दुःखं चास्याःप्रवेशनम् ॥ ४० ॥
तस्यां गुहायां प्राग्द्वारे महान् शीतोदको ह्रदः।
बहुमूलफलो रम्यो नानामृगगणायुतः ॥ ४१ ॥
तस्यां वसति सुग्रीवश्चतुर्भिस्सह वानरैः।
कदाचिच्छिखरे तस्य पर्वतस्यावतिष्ठते ॥ ४२ ॥
कबन्धस्त्वनुशास्यैवं तावुभौ रामलक्ष्मणौ।
स्रग्वी भास्करवर्णाभः खे व्यरोचत वीर्यवान् ॥ ४३ ॥
तं तु खस्थं महाभागं कबन्धं रामलक्ष्मणौ।
प्रस्थितौ त्वं व्रजस्वेति वाक्यमूचतुरन्तिके ॥ ४४ ॥
गम्यतां कार्यसिद्ध्यर्थमिति तावब्रवीत्स च।
सुप्रीतौ तावनुज्ञाप्य कबन्धः प्रस्थितस्तदा ॥ ४५ ॥

स तत् कबन्धः प्रतिपद्य रूपं
वृतः श्रिया भास्करतुल्यदेहः।
निदर्शयन् राममवेक्ष्य खस्थः
सख्यं कुरुष्वेति तदाभ्युवाच ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे त्रिसप्ततितमः सर्गः ॥

चतुःसप्ततितमः सर्गः

शबरीस्वर्गगति ॥

तौ कबन्धेन तं मार्गं पम्पाया दर्शितं वने।
आतस्थतुर्दिशं गृह्य प्रतीचीं नृवरात्मजौ ॥ १ ॥

तौ शैलेष्वाचितान् वृक्षान् क्षौद्रकल्पफलान् द्रुमान्।
वीक्षन्तौ जग्मतुर्द्रष्टुं सुग्रीवं रामलक्ष्मणौ ॥ २ ॥

कृत्वा च शैलपृष्ठे तु तौ वासं रघुनन्दनौ।
पम्पायाः पश्चिमं तीरं राघवावुपतस्थतुः ॥ ३ ॥

तौ पुष्करिण्याः पम्पायास्तीरमासाद्य पश्चिमम्।
अपश्यतां ततस्तत्र शबर्या रम्यमाश्रमम् ॥ ४ ॥

तौ तमाश्रममासाद्य द्रुमैर्बहुभिरावृतम्।
सुरम्यमभिवीक्षन्तौ शबरीमभ्युपेयतुः ॥ ५ ॥

तौ तु दृष्ट्वा तदा सिद्धा समुत्थाय कृताञ्जलिः।
रामस्य पादौ जग्राह लक्ष्मणस्य च धीमतः ॥ ६ ॥

पाद्यमाचमनीयं च सर्वं प्रादाद्यथाविधि ॥ ७ ॥

तामुवाच ततो रामः श्रमणीं शंसितव्रताम् ॥ ८ ॥

कच्चित्ते निर्जिता विघ्नाः कच्चित्ते वर्द्धते तपः।
कच्चित्ते नियतः क्रोध आहारश्च तपोधने ॥ ९ ॥

कच्चित्ते नियमाः प्राप्ताः कच्चित्ते मनसः सुखम्।
कच्चित्ते गुरुशुश्रूषा सफला चारुभाषिणि ॥१०॥

रामेण तापसी पृष्टा सा सिद्धा सिद्धसम्मता ।
शशंस शबरी वृद्धा रामाय प्रत्युपस्थिता ॥ ११ ॥

अद्य प्राप्ता तपःसिद्धिस्तव सन्दर्शनान्मया ।
अद्य मे सफलं तप्तं गुरवश्च सुपूजिताः ॥ १२ ॥

अद्य मे सफलं जन्म स्वर्गश्चैव भविष्यति ।
त्वयि देववरे राम पूजिते पुरुषर्षभ ॥ १३ ॥

चक्षुषा तव सौम्येन पूताऽस्मि रघुनन्दन ।
गमिष्याम्यक्षयान् लोकान् त्वत्प्रसादादरिन्दम ॥ १४ ॥

चित्रकूटं त्वयि प्राप्ते विमानैरतुलप्रभैः ।
इतस्ते दिवमारूढा यानहं पर्यचारिषम् ॥ १५ ॥

तैश्चाहमुक्ता धर्मज्ञैर्महाभागैर्महर्षिभिः ।
आगमिष्यति ते रामः सुपुण्यमिममाश्रमम् ॥ १६ ॥

स ते प्रतिगृहीतव्यः सौमित्रीसहितोऽतिथिः ।
तं च दृष्ट्वा वरान् लोकानक्षयांस्त्वं गमिष्यसि ॥ १७ ॥

मया तु विविधं वन्यं संचितं पुरुषर्षभ ।
तवार्थे पुरुषव्याघ्र पम्पायास्तीरसंभवम् ॥ १८ ॥

एवमुक्तस्तु धर्मात्मा शबर्या शबरीमिदम् ।
राघवः प्राह विज्ञाने तां नित्यमबहिष्कृताः ॥ १९ ॥

दनोः सकाशात्तत्त्वेन प्रभावं ते महात्मनः ।
श्रुतं प्रत्यक्षमिच्छामि संद्रष्टुं यदि मन्यसे ॥ २० ॥

एतत्तु वचनं श्रुत्वा रामवक्त्राद्विनिःसृतम् ।
शबरी दर्शयामास तावुभौ तद्वनं महत् ॥ २१ ॥

पश्य मेघघनप्रख्यं मृगपक्षिसमाकुलम् ।
मतङ्गवनमित्येव विश्रुतं रघुनन्दन ॥ २२ ॥

इह ते भावितात्मानो गुरवो मे महामते ।
जुहवांचक्रिरे तीर्थं मन्त्रवन्मन्त्रपूजितम् ॥ २३ ॥

इयं प्रत्यक्स्थली वेदिर्यत्र ते पुरुषर्षभाः ।
पुष्पोपहारं कुर्वन्ति श्रमादुद्वेपिभिः करैः ॥ २४ ॥

तेषां तपःप्रभावेन पश्याद्यापि रघूत्तम ।
द्योतयन्ति दिशः सर्वाः श्रिया वेद्योऽतुलप्रभाः ॥ २५ ॥

अशक्नुवद्भिस्तैर्गन्तुमुपवासश्रमालसैः ।
चिन्तितेऽभ्यागतान् पश्य सहितान् सप्त सागरान् ॥

कृताभिषेकैस्तैर्न्यस्ता वल्कलाः पादपेष्विह ।
अद्यापि नैव शुष्यन्ति प्रदेशे रघुनन्दन ॥ २७ ॥

देवकार्याणि कुर्वद्भिर्यानीमानि कृतानि वै ।
पुष्पैः कुवलयैः सार्द्धं म्लानत्वं न तु यान्ति वै ॥ २८ ॥

कृत्स्नं वनमिदं दृष्टं श्रोतव्यं च श्रुतं त्वया ।
तदिच्छाम्यभ्यनुज्ञाता त्यक्तुमेतत् कलेवरम् ॥ २९ ॥

तेषामिच्छाम्यहं गन्तुं समीपं भावितात्मनाम् ।
मुनीनामाश्रमो येषामहं च परिचारिणी ॥ ३० ॥

धर्मिष्ठं तु वचः श्रुत्वा राघवः सहलक्ष्मणः ।
प्रहर्षमतुलं लेभे आश्चर्यमिति तत्त्वतः ॥ ३१ ॥

तामुवाच ततो रामः श्रमणीं संशितव्रताम् ।
अर्चितोऽहं त्वया भद्रे गच्छ कामं यथासुखम् ॥ ३२ ॥

इत्युक्ता जटिला वृद्धा चीरकृष्णाजिनांबरा ।
तस्मिन् मुहूर्ते शबरी देहं जीर्णं जिहासती ॥ ३३ ॥

अनुज्ञाता तु रामेण हुत्वाऽऽत्मानं हुताशने ।
ज्वलत्पावकसंकाशा स्वर्गमेव जगाम सा ॥ ३४ ॥

दिव्याभरणसंयुक्ता दिव्यमाल्यानुलेपना ।
दिव्याम्बरधरा तत्र बभूव प्रियदर्शना ॥ ३५ ॥

विराजयन्ती तं देशं विद्युत्सौदामिनी यथा ।
प्रणम्य शिरसा रामं स्वर्गता सुप्रभानना ॥ ३६ ॥

यत्र ते सुकृतात्मानो विहरन्ति महर्षयः ।
तत् पुण्यं शबरी स्थानं जगामात्मसमाधिना ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे चतुःसप्ततितमः सर्गः ॥

पञ्चसप्ततितमः सर्गः

पम्पादर्शनम् ॥

दिवं तु तस्यां यातायां शबर्यां स्वेन तेजसा ।
लक्ष्मणेन सह भ्रात्रा चिन्तयामास राघवः ॥ १ ॥

स चिन्तयित्वा धर्मात्मा प्रभावं तं महात्मनाम् ।
हितकारिणमेकाग्रं लक्ष्मणं राघवोऽब्रवीत् ॥ २ ॥

दृष्टोऽयमाश्रमः सौम्य बह्वाश्चर्यो महात्मनाम् ।
विश्वस्तमृगशार्दूलो नानाविहगसेवितः ॥ ३ ॥

सप्तानां च समुद्राणामेषु तीर्थेषु लक्ष्मण ।
उपस्पृष्टं च विधिवत्पितरश्चापि तर्पिताः ॥ ४ ॥

प्रनष्टमशुभं यत्तत्कल्याणं समुपस्थितम् ।
तेन तत्त्वेन हृष्टं मे मनो लक्ष्मण संप्रति ॥ ५ ॥

हृदये हि नरव्याघ्र शुभमाविर्भविष्यति ॥ ६ ॥

तदागच्छ गमिष्यावः पम्पां तां प्रियदर्शनाम् ।
ऋश्यमूको गिरिर्यत्र नातिदूरे प्रकाशते ॥ ७ ॥

यस्मिन् वसति धर्मात्मा सुग्रीवोंशुमतः सुतः ।
नित्यं वालिभयात्तूस्तश्चतुर्भिः सह वानरैः ॥ ८ ॥

अभित्वरे च तं द्रष्टुं सुग्रीवं वानरर्षभम् ।
तदधीनं हि मे सौम्य सीतायाः परिमार्गणम् ॥ ९ ॥

इति ब्रुवाणं तं वीरं रामं सौमित्रिरब्रवीत् ।
गच्छावस्त्वरितं तत्र ममापि त्वरते मनः ॥ १० ॥

आश्रमात्तु ततस्तस्मान्निर्गत्य च विशांपतिः ।
आजगाम ततः पम्पां लक्ष्मणेन सहाभिभूः ॥ ११ ॥

समीक्षमाणः पुष्पाढ्यं सर्वतो विपुलद्रुमम् ।
कोयष्टिकैश्चार्जुनकैः शतपत्रैश्च कीरकैः ॥ १२ ॥

एतैश्चान्यैश्च विविधैर्नादितं तद्वनं महत् ।
स रामो विविधान् वृक्षान् सरांसि विविधानि च ॥

पश्यन् कामाभिसन्तप्तो जगाम परमं ह्रदम् ।
स तामासाद्य वै रामो दूरादुदकवाहिनीम् ॥ १४ ॥

मतङ्गसरसं नाम ह्रदं समवगाहत ।
ततो जग्मतुरव्यग्रौ राघवौ हि समाहितौ ॥ १५ ॥

स तु शोकसमाविष्टो रामो दशरथात्मजः ।
विवेश नलिनीं पम्पां पङ्कजैश्च समावृताम् ॥ १६ ॥

तिलकाशोकपुन्नागवकुलोद्दालकाशिनीम् ।
रम्योपवनसंबाधां पद्मसंपीडितोदकाम् ॥ १७ ॥

स्फटिकोपमतोयाढ्यां श्लक्ष्णवालुकसंततताम् ।
मत्स्यकच्छपसंबाधां तीरस्थद्रुमशोभिताम् ॥ १८ ॥

सखीभिरिव युक्ताभिर्लताभिरनुवेष्टिताम् ।
किन्नरोरगगन्धर्वयक्षराक्षससेविताम् ॥ १९ ॥

नानाद्रुमलताकीर्णां शीतवारिनिधिं शुभाम् ।
पद्मैः सौगन्धिकैस्ताम्रां शुक्लां कुमुदमण्डलैः ॥ २० ॥

नीलां कुवलयैर्जातैर्बहुवर्णां कुथामिव ।
अरविन्दोत्पलवतीं पद्मसौगन्धिकायुताम् ॥ २१ ॥

पुष्पिताम्रवणोपेतां बर्हिणोद्घुष्टनादिताम् ।
स तां दृष्ट्वा ततः पम्पां रामः सौमित्रिणा सह ॥ २२ ॥

विललाप स तेजस्वी कामादशरथात्मजः ।
तिलकैर्बीजपूरैश्च वरैः शुक्लद्रुमैस्तथा ।
पुष्पितैः करवीरैश्च पुन्नागैश्च सुपुष्पितैः ॥ २३ ॥

मालतीकुन्दगुल्मैश्च भाण्डीरैर्निचुलैस्तथा ।
अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः ॥ २४ ॥

अन्यैश्च विविधैर्वृक्षैः प्रमदामिव भूषिताम् ॥ २५ ॥

अस्यास्तीरे तु पूर्वोक्तः पर्वतो धातुमण्डितः ।
ऋश्यमूक इति ख्यातश्चित्रपुष्पितकाननः ॥ २६ ॥

हरेर्ऋक्षरजोनाम्नः पुत्रस्तस्य महात्मनः ।
अध्यास्ते तं महावीर्यः सुग्रीव इति विश्रुतः ॥ २७ ॥

सुग्रीवमभिगच्छ त्वं वानरेन्द्रं नरर्षभ ।
इत्युवाच पुनर्वाक्यं लक्ष्मणं सत्यविक्रमम् ॥ २८ ॥

राज्यभ्रष्टेन दीनेन तस्यामासक्तचेतसा ।
कथं मया विना शक्यं सीतां लक्ष्मण जीवितुम् ॥ २९ ॥

इत्येवमुक्त्वा मदनाभिपीडितः
स लक्ष्मणं वाक्यमनन्यचेतसम् ।
विवेश पम्पां नलिनीं मनोरमां
रघूत्तमः शोकविषादयन्त्रितः ॥ ३० ॥

ततो महद्वर्त्म सुदूरसंक्रमः
क्रमेण गत्वा प्रविलोकयन् वनम् ।
ददर्श पम्पां शुभदर्शकानना-
मनेकनानाविधपक्षिसङ्कुलाम् ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
आरण्यकाण्डे पञ्चसप्ततितमः सर्गः ॥

आदितः श्लोकाः 9252 आरण्यकाण्डे आदितः श्लोकाः 2540

॥ इत्यारण्यकाण्डं समाप्तम् ॥



अस्यानन्तरं किष्किन्धाकाण्डः भविष्यति ।
तस्यायामाद्यः श्लोकः
स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलाम् ।
रामः सौमित्रिसहितो विललापाकुलेन्द्रियः ॥

॥ शुभं भूयात् ॥

॥ शुद्धिपत्रम् ॥

पृष्ठम्	श्लोकम्	पादम्	अशुद्धम्	शुद्धम्
17	21	2	महदन्यैसु	महदन्यैस्तु
,,	24	1	सक्ष्मणः	लक्ष्मणः
19	35	1	गमिष्यति	गमिष्यसि
29	14	1	धनुष्पाणिश्चाला	धनुष्पाणिश्चाला
49	37	2	वज्र	वज्रं
54	37	1	सत्त्व	सत्त्वं
84	5	2	उत्तिष्ठोत्तिष्ट	उत्तिष्ठोत्तिष्ट
85	12	1	मालिनी	मालिनि
91	14	1	सल्लीन	संल्लीन
96	23	1	बविष्यति	भविष्यति
102	40	1	रुक्मपुङ्खा	रुक्मपुङ्खा
110	1	2	त्रासो	त्रासो
112	23	2	धरणि	धरणीं
123	9	2	विसुब्धो	विसब्धो
141	31	1	माषः	माषाः
167	14	1	स्वरसम्पञ्च	स्वरसम्पच्च
234	3	2	व्यधितं	व्यथितं
282	10	1	दक्षिणौ	दक्षिणे